श्रीसोमनाथसंस्कृतविश्वविद्यालयसंशोधनग्रन्थमाला–०३

# शिशुपालवधस्य

## सन्देहविषौषधि–सर्वङ्कषाटीकयोर्विवेचनात्मकम् अध्ययनम्

प्रधानसम्पादकः

**प्रो. गोपबन्धु मिश्रः**

कुलपतिः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

संशोधकः सम्पादकश्च

**डॉ. अमृतलालः जी. भोगायता**

प्रधानाचार्यः

श्रीब्रह्मर्षिसंस्कृतमहाविद्यालयः, नडियाद

**श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्**

श्रीसोङ्कनाथसंस्कृतविश्वविद्यालयसंशोधनग्रन्थमाला–०३

# शिशुपालवधस्य

## सन्देहविषौषधि–सर्वङ्कषाटीकयोर्विवेचनात्मकम् अध्ययनम्

प्रधानसम्पादकः

**प्रो. गोपबन्धु मिश्रः**

कुलपतिः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

संशोधकः सम्पादकश्च

**डॉ. अमृतलालः जी. भोगायता**

प्रधानाचार्यः

श्रीब्रह्मर्षिसंस्कृतमहाविद्यालयः, नडियाद

**श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्**

**प्रकाशकः** - **डॉ. दशरथजादवः**
का. कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवन रोड, वेरावलम् - ३६२ २६६
गीर-सोमनाथजनपदम्, गुजरातम्
दूरभाषः - ०२८७६ - २४४५३२, फेक्स : २४४४१७
E-mail: sssu.veraval@gmail.com
www.sssu.ac.in

**सहायकसम्पादकः समन्वयकश्च**

डॉ. कार्तिकपण्ड्या
संशोधनाधिकारी
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

***© Shree Somnath Sanskrit University, 2019***

**प्रथमं संस्करणम्** - दिसम्बर - २०१९

**प्रतिकृतयः** - ३५०

**ISBN** - 978-93-83097-38-8

**मूल्यम्** - ₹६४०/-

**मुद्रकः** - झेनिथ ग्राफिक
१, पहली मंजिल, व्रज प्लाझा, जैन देरासर रोड,
वेरावल - ३६२ २६६,
गीर-सोनाथजनपदम्, गुजरातम्, भारत
दूरभाष - ०२८७६-२४६६१९

Shree Somnath Sanskrit University Research Grantha Series - 03

# A CRITICAL STUDY OF
# ŚIŚUPĀLAVADHA'S
# SANDEHAVIṢAUṢADHI
# AND SARVAṆKAṢĀ COMMENTARIES

*Chief Editor*

**Prof. Gopabandhu Mishra**

Vice-Chancellor

Shree Somnath Sanskrit University, Veraval

*Researcher & Editor*

**Dr. Amrutlal G. Bhogayata**

Principal

Brhmarshi Sanskrit Mahavidyalaya, Nadiyad

Shree Somnath Sanskrit University, Veraval (Gujarat)

Published by:
**Dr. Dashrath Jadav**
Registrar (I/c.),
Shree Somnath Sanskrit University,
Rajendra Bhuvan Road, Veraval-362 266
Dist. Gir-Somnath, Gujarat, India.
Phone: 02876-244 532
Fax: 02876-244417
www.sssu.ac.in

© ***Shree Somnath Sanskrit University, Veraval - 2019***

*All rights reserved. No part of this publication may be reproduced, stored in a retrieval system or transmitted in any form or by any means, electronic or mechanical, including photocopying, recording or otherwise, without written permission from the publisher.*

Assistant Editor & Co-ordinator:
**Dr. Kartik Pandya**
Research Officer
Shree Somnath Sanskrit University, Veraval

**Edition** : First

**Year** : December, 2019

**Copies** : 350

**ISBN** : 978-93-83097-38-8

**Price** : ₹640 /-

**Printed By** : Zenith Graphic
1st Floor, Vraj Plaza,
Jain Derasar Road, Veraval-362 266
Dist. Gir-Somnath, Gujarat, India.
Ph.: 02876-246619

# ।। शुभाशंसनम् ।।

ब्रह्मर्षिसंस्कृतमहाविद्यालयस्य प्रधानाचार्यः डॉ. अमृतलाल भोगायतावर्यः महाकविमाघविरचितस्य **''शिशुपालवधम्''** इति महाकाव्यस्य वल्लभदेवमल्लिनाथयोः सन्देहविषौषधि–सर्वङ्कषेति टीकाद्वयम् आश्रित्य यद् विवेचनात्मकम् अध्ययनं सम्पादितवान् अस्ति तस्य पुस्तकरूपमिदं श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा प्राकाश्यमायातीति महानयं प्रमोदावसरः। विद्यावारिधिपदवीम् उद्दिश्य डॉ. भोगायतावर्येण महता श्रमेण द्वयोः टीकयोः तुलनात्मकं विमर्शं विधाय सोदाहरणं सोद्धरणं च संस्कृतकाव्यसमीक्षणपरम्परां समृद्धतरां विहितवानस्ति। डॉ. भोगायतावर्यो यथा संस्कृतभाषायां प्रावीण्यमाधत्ते तथा काव्यरचनायां नैपुण्यं वैदुष्यं च तनुतेतराम्। एतेन प्रासङ्गिकेन शोधकर्मणा तस्य संशोधनकर्मपाटवं सम्यक् उररीकृतमेव। आधुनिके काले मूलेन काव्येन सह तट्टीकाग्रन्थानाम् अध्ययनं समीक्षणं च सुतराम् अपेक्षितमस्ति। तेन तत्तत्काव्यविदां तत्तट्टीकागतमर्मविवेचनेन बुद्धिः समधिकां व्याप्तिमाप्स्यति, किं च तत्तकाव्यानां टीकाप्रणेतॄणां तादृशो यत्नोऽपि सम्माननमवाप्य सार्थकतामधिरोक्ष्यति। अनया दृष्ट्या डॉ. भोगायतावर्यस्यायं संशोधनयत्नः उत्तमकोटिकफलवान् भवितेत्यत्र नास्ति सन्देहलेशः। तत्र च शिशुपालवधस्येव विद्वत्तापूर्णमहाकाव्यस्य रसास्वादनसम्पिपादयिषूणामपि महते सन्तोषायेदं संशोधनं प्रवर्तिष्यते इति विशेषः सुतराम् ऊहितुं शक्यते।

संशोधनकर्तुः डॉ. अमृतलालभोगायतावर्यस्य सारस्वतसाधनेयं प्रभूतं यशोऽवाप्नुयादिति परमेश्वरं श्रीसोमनाथं सम्प्रार्थये।

**(प्रो. गोपबन्धु मिश्रः)**
कुलपतिः,
श्रीसोमनाथसंस्कृतयुनिवर्सिटी,
वेरावलम्, गुजरातम्

दिनाङ्कः ३१–१२–२०१९

# अस्मदीयम्

## ॥ भवानीशङ्करौ वन्दे ॥

कुलदेवताया भगवत्या हरसिद्धेर्विद्याप्रदानाञ्च तत्रभवतां श्रीकौण्डिन्यगुरूणाञ्च पुण्यधनानां श्रीमतां श्रीकृष्णशङ्करशास्त्रिणां कृपया श्रीभागवतविद्यापीठे संस्कृतभाषायाम् अभिरुचि: अध्ययनावसरश्चाधिगतः।

तस्मात्कालादेव संस्कृतविषयमाश्रित्य विद्यावारिधिपदव्यर्थमदम्याभिलाषा मनस्यवर्तत। वाग्देवताप्रसादतः डॉ. श्रीवसन्तभाई भट्टमहोदयेन सह विन्दो: सिन्धुना, सिन्धोश्च पुन: सिन्धुनेव मे सङ्गमो जात:, विविधसरससुमानि विलोक्यास्वाद्यापि नितान्तमतृप्तस्य मधुकरस्य कमलिनीकुल एव तृप्तिस्तथैव विविधविषयावलोकनमास्वादनं च तेषां कृत्वाऽप्यसन्तुष्टैः ततः शिशुपालवध एवं कृष्णवत्तोषतीरंगतैस्तै: शिशुपालवधस्य वल्लभदेवमल्लिनाथयोः सन्देहविषौषधि-सर्वङ्कषाटीकयोर्विवेचनात्मकमध्ययनमिति विषयः प्रदत्तः। तत्र कारणं शिशुपालवधं बृहत्त्रयीमध्ये गणनार्हं माघरचितमुपमादिगुणत्रयवत्तया प्रशस्तं पाषाणकल्पं महाकाव्यं विद्यते, अत एव व्याख्यामाध्यमेनास्य रसामास्वादं सम्पादयितुं पूर्वै व्याख्याकारै: स्वीयव्याख्याभिरयं ग्रन्थो विषयीकृतः, परं सर्वेऽपि व्याख्याकारा एतौ सादरमपश्यन्, तस्मादेतौ महानुभावावुत्तमाविति सर्वसम्मतं मतं स्वीकृत्य तयोर्व्याख्ययोरत्र विवेचनात्मकमध्ययनं पुरस्कृतम्। अनेन व्याख्ययोर्मूलग्रन्थस्य चावबोधने साहाय्यमापद्येत।

नितान्तं नूतनेऽस्मिन् कर्मणि व्याकरणवारिधिपानैकागस्त्यैस्तत्रभवद्भिर्भट्ट-महोदयै: स्थले स्थले समये समये च मार्गदर्शनं दत्त्वा स्वीयानुग्रहेणैतस्य शोधप्रबन्धस्य रचनायां महाकविकालिदासवचनानुसारं वज्रसमुत्कीर्णे मणौ सूत्रस्येव मे प्रवेशः सरलीकृतः। तेषां गेहमपि विद्यालयीभूतमेवावर्ततातस्तेषां गृहजनानामपि स्मरणपूर्वकमुपकृतिमावहामि। प्रो. कमलेशभाई चोक्सी महोदया अपि सादरं स्मर्यन्ते यैः समये समये यथापेक्षितं साहाय्यं प्रदत्तम्। सुहृदा पण्ड्या नरेन्द्रेण यथासमयं सम्भूय परामर्शेन सहकृतम्, तथैव मित्रेण श्रीधरव्यासेनापि पुस्तकदानेन च सहदेवेनेव सहकृतमतो धन्यवादाः।

परमादरणीयौ मम पितरौ सादरं स्मर्येते ययोराशीर्वादपरम्पराऽत्रनिर्वादं कारणीभूता। तयो: कृपयेदं कर्म सम्पन्नमिति धन्यतामनुभवामि। मम पत्नी

अनसूया, (आली) भ्राता अनिल:, तनुजा भवन्ती, सूतो निसितश्च सर्वेऽपि यथावसरं सस्नेहं साहाय्यं कृतवन्तोऽतस्ते सर्वेऽपि धन्यवादभाजनीभूताः।

अत्र गुजरातयुनिवर्सिटी पुस्तकालयाय, भोजेभवनपुस्तकालयाय धन्यवादा: समर्प्यन्ते।

कल्याणभारतीनितिनभाईप्रभृतय: सर्वेऽपि येषां ग्रन्था अस्मिन् शोधप्रबन्धे आधारीकृता: तेषाञ्चात्राधमर्ण्यं प्रकटयामि।

अन्ते पुनश्च स्मर्यते यत् पुस्तकालये ग्रन्थान् विलोक्य मम स्थितिस्तु कौरवसैन्यं विलोक्य पार्थस्येवाभवत्, परं श्रीभट्टमहोदयै: कृष्णवदुपदेशो दत्तो येनेदं महत्कर्म पूर्णतां प्राप्तम्। अतस्तेषामुपकारभारमावहमि, येषामनुग्रहमन्तरैतस्य शोधप्रबन्धस्य सम्पादनमशक्यमेवा भविष्यदतस्तान् स्मरन्ननुभवामि यत्-

**भवे भवस्यात्र कृपा तथा नो**
**मासद्वयं तिष्ठति यद् वसन्त:।**
**कृपा कृपाब्धेर्महती नितान्तं**
**सदा वसन्तो मम जीवने वने॥**

**माघस्यामरभारती गहनतामर्थेष्वनल्पां दध-**
**त्यर्थोद्योतकरीं पदार्थविशदां व्याख्यां ललाषाऽखिलाम्।**
**काव्ये वल्लभमल्लिनाथकृतिनौ व्याख्ये व्यधत्तां तथा**
**याभ्यां वै वयमर्थबोधजनितानन्दै: कृतार्थीकृता:॥**

**व्याख्याद्वयीस्थवैशिष्ट्यं सुधियां तोषकारकम्।**
**मया शोधप्रबन्येऽस्मिन् यथामति निरूपितम्।।**
**।।अस्तु शम्।।**

# शोधप्रबन्धे विवृतानां विषयाणां सूचिः

**विषयाङ्ग:** **विषया:**


१ **विभाग :१** **भूमिकाखण्ड:** ___________________ **१२७-**

१.१ **प्रकरणम्१-** संस्कृतकाव्यसाहित्यस्य भेदप्रभेदचर्चा

१२. **प्रकरणम् २-** पञ्चमहाकाव्यानां प्राथमिक:परिचय : _

१ ३. **प्रकरणम् ३-** माघस्य समय:, जीवनम् कर्तृत्वम्

१४. **प्रकरणम्४-** शिशुपालवधस्य टीकाकारपरिचय:

१ ५. **प्रकरणम् ५-** प्रस्तुतविवेचनात्मकाध्ययनस्य लक्ष्याङ्कनिर्देश:

**२ . विभाग :** **विवेचनात्मकम् अध्ययनम्** ________________ **२८– २२६**

**२१.** **प्रकरणम्विचारविनिमय ६-:** ________________**२८७८-**

२.२.१ सर्गनरदसम्भाषणम् १-: ____________________ २८५४-

२३.२. सर्गमन्त्रवर्णनम् २-________________________ ५५७८-

२ २. प्रकरणम्यात्रावर्णनम् ७- __________________ ७९११४-

२ २.१. सर्ग ३-:पुरीप्रस्थानम् _______________________ ७९९४-

२ २.२. सर्गरैवतकवर्णनम् ४-: ____________________ ९५१०६-

२ २.३. सर्गसेनानिवेश ५-:: ______________________ १०७११४-

**२ ३.** **प्रकरणम्ऋतुचक्रानुभूति ८-:** ______________ **११५१८९-**

२.३.१ सर्गऋतुवर्णनम् ६-: ______________________ ११५१२४-

२ ३.२. सर्गपुष्पावचय ७-:: ______________________ १४१-१२५

२३.३. सर्गजलविहारवर्णनम् ८-: ________________ १४२१५७-

२ ३.४. सर्ग ९-:सन्ध्यावर्णनम्____________________ १६६-१५८
२ ३.५. सर्गमद्यपनसुरतक्रीडावर्णनम् १०-:__________ १६७१७८-
२ ३.६. सर्गप्रभातवर्णनम् ११-:____________________ १७९१८१-

**२ ४. प्रकरणम्यज्ञदर्शनम् ९- __________________ १९०२०६-**
२ ४.१. सर्ग १२-:सैन्यप्रस्थानवर्णनम्_______________ १९०१९३-
२.४.२ सर्ग सभावर्णनम् १३-: ___________________ १९४२००-
२.४.३ सर्ग १४-:श्रीकृष्णार्घ्यदानम्________________ २०२-२०१
२४.४. सर्गअपशकुनाविर्भाव १५-:: _______________ २०३२०६-

**२ ५. प्रकरणम्युद्धवर्णनम् १०-_________________ २०७२२६-**
२.५.१ सर्गदूतसंवाद १६-:: _____________________ २०७२१०-
२.५.२ सर्गउभयसैन्यवर् १७-:णनम् _______________ २११२१३-
२.५.३ सर्ग सङ्कुलयुद्धवर्णनम् १८-: ______________ २१४२१९-
२.५.४ सर्ग द्वन्द्वयुद्धम् १९-: _____________________ २२०२२२-
२.५.५ सर्गशिशुपालवध २०-:: _________________ २२३२२६-
उपसंहृति : _________________________________ २२६

**३. विभाग३-:**

**३ १. प्रकरणम् व्याकरणविवेचनम् ११- __________ २२७२३५-**
३ १.१. वल्लभदेवमल्लिनाथयोतद्धितविवेचनम् :टीकयो :
२ १.२. वल्लभदेवमल्लिनाथयोकारकविवेचनम् :टीकयो :
२ १.३. वल्लभदेवमल्लिनाथयोसमासविवेचनम् :टीकयो :
२ १.४. वल्लभदेवमल्लिनाथयोकृत्प्रत्ययविवेचनम्:टीकयो :
२१.५. वल्लभदेवमल्लिनाथयोतिङन्तविवेचनम् :टीकयो :

**३ २. करणम्साहित्यविवेचनम् १२- ____________ २३६२६२-**

३२.१.	वल्लभदेवमल्लिनाथयोअलङ्कारविवेचनम् :टीकयो :
३ २.२.	वल्लभदेवमल्लिनाथयोअन्वयविवेचनम् :टीकयो :
३ २.३.	वल्लभदेवमल्लिनाथयोकोशविवेचनम् :टीकयो :
३ २.४.	वल्लभदेवमल्लिनाथयोध्वनिविवेचनम् :टीकयो :
३ २.५.	वल्लभदेवमल्लिनाथयोरसविवेचनम् :टीकयो :
३ २.६.	वल्लभदेवमल्लिनाथयोचित्रालङ्कारविवेचनम् :टीकयो :
३ २.७.	वल्लभदेवमल्लिनाथयो वृत्तिविवेचनम् :टीकयो :
३२..८	:उपसंहृति

**४ . विभाग ४-:**
४१.	प्रकरणम्पाठभेद १३-: ____________________ २६३२७३-
४२.	प्रकरणम्क्रमभेद १४-: _________________________ २६७
४ ३.	प्रकरणम्प्रक्षिप्तश्लोका १५-: ________________ २६८२७३-
४३.१.	प्रक्षिप्तपद्यानि
४३.२.	कविवंशवर्णनम्
४३.३.	कारणचिन्तनम्
४३.४.	उपसंहृति:

**५. विभाग ५-: परिशिष्टम्	_________________________ २७४३३८-**
५ २.	पाठभेद:	_________________________ २७४३०१-
५ २.	क्रमभेद :	_________________________ २४४-३०२

**६ . बिभाग ६-: सन्दर्भग्रन्थसूचि: _________________________ ३३९३४४-**

# विभाग:-१
## भूमिकाखण्ड:

## प्रकरणम्-१
### संस्कृतसाहित्यस्य भेदप्रभेदचर्चा

सर्वप्राचीनं साहित्यं वैदिकं मन्यते। ततश्च वाल्मीकिना व्यासेन च रामायणस्य महाभारतस्य पुराणानाञ्च[1] रचना विहिता। एवं क्रमानुसारं लौकिककाव्यस्य हिमवतो गङ्गाया एवोद्भवो महाकवे र्वाल्मिकेर्जात:। ततश्च शनै: शनै: काव्यं निम्नलिखितप्रकारेषु विभक्तम्।




एवं क्रमानुसारं महाकाव्यस्य रचना जाता। ततश्च लाक्षणिकग्रन्थकारैर्महाकाव्यस्य लक्षणानि कानिचित् काव्यानि लक्ष्यीकृत्य लिखितानि। तत्र भामहदण्डिरुद्रटविश्वनाथादय: प्रमुखा: ग्रन्थाकारा:सन्ति।

---

[1] मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम्।
अनापलिङ्गकूस्कानि पुराणानि प्रचक्षते॥
मद्वयम्-मत्स्यपुराणम्-मार्कण्डेयपुराणम्, भद्वयम्-भविष्यपुराणम्-भागवतपुराणम्, ब्रत्रयम्-ब्रह्माण्डपुराणम्-ब्राह्मपुराणम्-ब्रह्मवैवर्तपुराणम्, वचतुष्टयम्-वामनपुराणम्-वराहपुराणम्- वायुपुराणम्-विष्णुपुराणम्, अ-अग्निपुराणम्, ना-नारदपुराणम्, प-पद्मपुराणम्, लि-लिङ्गपुराणम्, ग-गरुडपुराणम्, कू-कूर्मपुराणम्, स्क-स्कन्दपुराणम्।

# प्रकरणम्-२

## पञ्चमहाकाव्यानां प्राथमिक: परिचय:

'जाते जगति वाल्मीकौ कविरित्यभिधाऽभूत् कवी इति ततो व्यासे' तादृशीं यथार्थां ख्यातिं प्राप्तवतो: वाल्मीकिव्यासयोः रामायणमहाभारतग्रन्थद्वयं यथा हिमवान् गंगायाः जनकस्तथैव काव्यनिर्झरिणीनिर्माणसमर्थमिति सर्वे स्वीकुर्वन्ति। प्रायः कवयो रामायण महाभारतञ्च बीजभावेनाश्रयन्ति। एवं गच्छता कालेन शनैः शनै: काव्यानां महाकाव्यानां च विकासे जाते संस्कृतसाहित्ये पञ्चमहाकाव्यानि विशिष्टां कीर्तिमभजन्त। तत्र पञ्चमहाकाव्येषु येषां गणना भवति तेषां नामानि सन्ति कुमारसम्भवम्, रघुवंशम्, किरातार्जुनीयम्, शिशुपालवधम्, नैषधीयचरितञ्च। एषु महाकाव्येषु कुमारसम्भवरघुवंशयोरचना कविकुलगुरुणा कालिदासेन कृता, किरातार्जुनीयस्य भारविणा, शिशुपालवधस्य माघेन, नैषधीयचरितस्य च रचना श्रीहर्षेण कृता।[१] सारालङ्कारवत् काव्येषु महाकाव्यानि, महाकाव्येषु पञ्चमहाकाव्यानि पञ्च महाकाव्येष्वपि बृहत्त्रयी विशेषं स्थानं भजते।किरातार्जुनीयशिशुपालवधनैषधीयचरितादीनि त्रीणि महाकाव्यानि 'बृहत्त्रयी' नाम्ना ख्यातिं गतानि। यतः यथाक्रमं सर्वेषामेतेषां स्वल्प: परिचयोऽत्र लिख्यते।

## कुमारसम्भवम्

कुमारसम्भवमहाकाव्यरचनाऽपि महाकविना कालिदासेन कृता। १७ सर्गसमाप्यमिदं महाकाव्यं वर्तते। परं यथाऽऽदिमस्य सर्गाष्टकस्य यथाप्रौढा भाषा तथाऽग्रे नास्त्यतोऽग्रे केनचिदन्येन सर्गनिर्माणं कृतं स्यात् तथामल्लिनाथप्रभृतयष्टीकाकारा अपि नवमसर्गाद्व्याख्यां न कृतवन्तः तस्मात् सर्गाष्टकमेव विश्वसनीयं कालिदासकृतं च गण्यते। अत्र षडाननजन्मवर्णनं वर्तते,

---

[१] उत्तरोत्तरमुत्कर्षो वस्तुन: सार उच्यते॥७८॥ साहित्यदर्पण: (१०-७८) पृ.८३६

तस्मादेतस्य नाम कुमारसम्भवमिति कृतम्, परं रामायणादनेन[२] कुमारसम्भवमिति नाम कृतं स्यादिति विद्यावतां वचनम्। काव्यमाधुरीचतुरस्य कालिदासस्यास्य महाकाव्यस्य कथासारो विचार्यते चेदित्थम् – हिमालयवर्णनादस्य महाकाव्यस्य प्रारम्भः, यत्र भगवान् शिवः तपः करोति, पार्वतीवर्णनम्, ब्रह्माणं देवा प्रार्थयन्ति कारणं शिवस्य कुमार द्वारैव तारकासुरस्य, वधः शक्यः, इन्द्रद्वारा कामाय तपोभङ्गनिवेदनम्, वसन्तस्य सख्यम्, तपोभङ्गाय गतस्य कामस्य देहनाशः, रतिविलापः, तपसा भगवत्प्राप्तिः करणीयेति पार्वतीनिर्णयः, तस्यास्तपः, ब्रह्मचारिबटुकस्य रूपं धृत्वा शिवेन तस्याः परीक्षा विधीयते, चिरतुष्टेनाशुतोषेण सह तस्याः विवाहः, विहारश्च, एते प्रसङ्गाः कालिदासेनऽष्टसर्गेपु वर्णिताः। महाकाव्यस्यास्य संवादा:'[३] अतीव प्रशंसनीया: सन्ति। त्यागमयं दाम्पत्यमेव सफलतां व्रजतीति महाकाव्यादर्श: इति।

## रघुवंशम्

ई.स, प्रथमशताब्देः पुरा जातः कविकुलगुरुकालिदासः रघुवंशं कुमारसम्भवञ्चेति महाकाव्यद्वयं व्यरचयत्। तत्र रघुवंश १९ सर्गात्मकं महाकाव्यम्।

महाकाव्येऽस्मिन् कविना रघुवंशजानां राज्ञां चरित्रवर्णनं कृतम् । अत्र कथावैविध्यं नायकवैविध्यं रसवैविध्यञ्च दृश्यते। रघुवंशे कविना जगत: पितरौ पार्वतीपरमेश्वरौ प्रणम्यापुत्रस्य दिलीपस्य धेनुभक्तिः वर्णिता, नन्दिनीप्रसादात् रघुप्राप्तिः विश्वजिन्मखस्याश्वार्थमिन्द्ररघुयुद्धवर्णनम्, कौत्सप्रसङ्गवर्णनम्, ततः अजेन्दुमतीप्रणयवर्णनम्, पुष्पमालयेन्दुमतीमृत्युवर्णनम्, अजविलापवर्णनम्, दशरथस्य पराक्रमवर्णनम्, श्रवणप्रसङ्गवर्णनम्, रामकथावर्णनम्,

---

[२] एष ते राम गङ्गाया: विस्तारोऽभिहितो मया।
कुमारसम्भवश्चैव धन्य: पुण्यस्तथैव च॥
रामायणे बालकाण्डे (३९-३१) पृ. १०५.

[३] निवार्यतामालि किमव्ययं बटु: पुनर्विवक्षु: स्फुरिताधरोष्ठ:।
न केवलं यो महतोऽवभाषते श्रुणोति तस्मादपि यो स पापभाक्॥
कुमारसम्भवम् (५.८३); पृ. ९६

अयोध्यावर्णनम, अग्निवर्णस्य विलासवर्णनम् एवं वर्णनवैविध्यमत्र वर्तते। रघुवंशे रघ्वजलवकुशानां युद्धवर्णनेषु वीररसः, धेनुभक्तिवर्णने शान्तरसः, अजविलापे करुणरसः, रामविलापे विप्रलम्भशृङ्गाररसः 'अग्निवर्ग' विलासवर्णने संयोगशृङ्गाररसः वर्तते। एतस्य पठनेन वाचका नितरां ब्रह्मानन्दसहोदरानन्दं प्राप्नुवन्ति, तस्मादेव परम्परया "क इह रघुकारे न रमते" ? इत्युक्ति: प्रशंसार्थं स्थापिता। एतस्य महाकाव्यस्य पठनेन "वैदर्भी कविता स्वयं वृतवती श्रीकालिदासं वर"मिति प्रशंसावचनं नितान्तं यथार्थमेव प्रतिभाति। कविनाऽत्र वृत्तानामपि वर्णनानुसारं विन्यासः कृतः। सर्वप्रकारेणात्रौचित्यं विलोक्यते।

## किरातार्जुनीयम्

पञ्चमहाकाव्येषु तृतीयं महाकाव्यं किरातार्जुनीयम् वर्तते। ई.स. ५५० शताब्दौ जातेन भारविणा महाकाव्यस्यास्य रचना कृता। एकैनैवानेन महाकाव्येन 'भारवेः भारवेरिव' इति ख्यातिं प्रापितो भारविः, पण्डितयुगस्य प्रवर्तको गण्यते।

वीररसप्रधानम्, गौडीशैलीसमन्वितं च "किरातार्जुनीयम्" महाकाव्यमष्टदशसर्गसमाप्यं वर्तते। तत्र १०४० पद्यानि सन्ति। महाभारते वनपर्वगतकिरातार्जुनाख्यानमिति बीजमस्य महाकाव्यस्य। समस्ते महाकाव्ये सर्गान्ते लक्ष्मीशब्दस्य प्रयोगात् काव्यमिदं लक्ष्म्यङ्कमपि कथ्यते।

महाकाव्यस्यास्य सारचिन्तनं क्रियते चेत् प्रारम्भे द्वैतवने वसतो युधिष्ठिरस्य गुप्तचर आगत्य दुर्योधनस्य राजनीतिं राज्यव्यवस्थाञ्च वर्णयति। तच्छ्रुत्वा कृद्धा द्रौपदी युद्धाय युधिष्ठिराय निवेदयति, भीमोऽपि तथैव कथयति। परं संयमेन युधिष्ठिर: प्रत्युत्तरं ददाति, तत्रान्तरे महर्षि: व्यास: समायाति अर्जुनाय युद्धपूर्वमस्त्रप्राप्त्यर्थं शिवाराधनाय कथयति। यदा अर्जुनो हिमालयं प्रति याति तदा मार्गे वर्णनावसरं प्राप्य कविना ऋतूनाम्, जलक्रीड़ायाः, अप्सरसाम्, संध्यायाः सूर्यास्तस्य चन्द्रोदयस्य, रात्रौ सकामानां विलासानाञ्च वर्णनानि कृतानि। हिमालयं प्राप्तायार्जुनायेन्द्रः तपः कर्तुं कथयति। तपः कुर्वन्तं पार्थं परीक्षेतुं शिव आयाति। द्वयोर्मध्ये युद्धं भवति, अन्ते च प्रसन्नेन शिवेन पाशुपतास्त्र दीयते।

अनेन महाकाव्येन भारवेरर्थगौरवं प्रसिद्धिं गतम्। तस्य भाषा नारिकेलपाक इव कठोराऽन्तः मृद्वी च वर्तते।

विशिष्टकल्पनां विचिन्त्य परम्परया अस्मै महाकवये आतपत्र-भारविरिति नाम प्रदत्तम्।

## शिशुपालवधम्

भारवेः किरातार्जुनीयमिव ततोऽप्यधिकतरं काठिन्यपूर्णं शिशुपालवधं विरचितम् महाकविना माघेन। सप्तमशताब्दौ जातोऽयं कवि: भारविणा सहास्पर्धत।

विंशतिसर्गसमाप्यमिदं महाकाव्यमपि किरातार्जुनीयमिव शास्त्रकाव्यं वर्तते। महाभारते सभापर्वगतं शिशुपालवधाख्यानमेतस्य बीजम्। अनेन महाकाव्येन माघेन नितान्तनिर्मला कीर्ति: प्राप्ता। 'मेघे माधे गतं वयः' एवंविधानि प्रशंसावाक्यानि माघकाव्यस्य कीर्तिगानं कुर्वन्ति।

महाकाव्यस्यैतस्य सारो विचार्यते चेत् - द्वारिकायां प्रतिवसतः श्रीकृष्णस्य प्रासादे नारदमुनिर्देवेन्द्रस्य संदेशं कथयति यत् भगवता शिशुपालवधस्य वधो विचारणीयः। ततो युधिष्ठिरस्य राजसूययज्ञस्यामन्त्रणमायाति तस्मात् यज्ञे स्वोपस्थितिर्दातव्या वा शिशुपालवधाय गन्तव्यमिति विचारयितुं तेन बलरामोद्धवौ पृष्टौ ततश्च सविनयं यज्ञगमनस्योद्धववचनं स्वीकृत्य ससैन्यस्तत्र भगवान् प्रयाति। ततश्च वर्णनावसरं प्राप्य कविना द्वारिकायाः, रैवतकस्य, ऋतूनाम्, जलक्रीडायाः, सन्ध्यायाः, चन्दोदयस्य, प्रभातस्य, यमुनायाश्च कमनीयानि वर्णनानि कृतानि। यज्ञभूमिं प्राप्तस्य श्रीकृष्णस्यार्घ्यदानं कर्तव्यमिति श्रुत्वा कृद्धः शिशुपालो विरोधं करोति ततश्च युद्धे तस्य वधो भवति।

सर्गान्ते श्रीशब्द आयात्यत इदमपि श्र्यङ्कं काव्यमपि कथ्यते। रैवतकस्य हस्तिना सह तुलना कृता सूर्यचन्द्रयोर्घण्टया सह तुलना कृता तस्मात् परम्परया “घण्टामाघ” इत्युपनाम दत्तम्। गौडीशैलीसमन्वितमिदं काव्यं किरातार्जुनीयात् कठिनतरं[४] शास्त्रज्ञानपूर्णं महाकाव्यं वर्तते। माघश्च महान् पण्डितकविर्वर्तते।

## नैषधीयचरितम्

---

४ तावद्भा भारवेर्भाति यावन्माघस्य नोदयः। (कस्यापि)

ई.स. १२ शताब्दौ जातेन श्रीहीरमामल्लदेवी[५]पुत्रेण श्रीहर्षेण नैषधीयचरितं विरचितम्।

काव्यस्यास्य बीजं महाभारतस्य वनपर्वगता नलकथा वर्तते। २२ सर्गसमाप्यमिदं महाकाव्यं बृहत्त्र यीमध्ये सर्वोत्तमं गण्यते। शृङ्गाररसप्रधानेऽस्मिन् महाकाव्ये श्रीहर्षस्य शास्त्रज्ञानं सर्वत्र दृश्यते। एतस्य पदलालित्यं प्रसिद्धम् वर्तते।

एतस्य महाकाव्यस्य सारविचारो विधीयते चेत् - राज्ञो नलस्य वर्णनादस्य प्रारम्भो भवति। ततः वने भ्रमतस्तस्य हंसेन सह मैत्री भवति। स हंसो नलदमयन्त्योः प्रणये साहाय्यं करोति। हंसस्य दूतकर्मवर्णनम्, प्रणयावस्थावर्णनम्, दमयन्त्याः नखशिखवर्णनम्, दमयन्तीस्वयंवरवर्णनम्, इन्द्राग्नियमवरुणानां नलरूपं धृत्वा तत्रागमनवर्णनम्, नलवरणवर्णनम्, नलदमयन्त्योर्विवाहवर्णनम्, घन्यगृहस्थाश्रमवर्णनम् कविना कृतम्।

एतस्मिन् महाकाव्ये तथा काठिन्यमस्ति यतो विवेचकैः 'विद्वदौषधं नैषधमिति प्रोक्तम्। ओजस् पूर्णवैदर्भीशैली[६] समन्वितेऽस्मिन् काव्येऽलङ्काराणां प्राचुर्यं वर्तते। अस्मिन् काव्ये सारल्यं काठिन्यञ्चोभयं[७] वर्तते।

## टीकाया आवश्यकता

संस्कृतसाहित्ये पञ्चमहाकाव्यानि विश्वविख्यातानि सन्ति। तेषु किरातार्जुनीयम्, शिशुपालवधम् नैषधीयचरितञ्च त्रीण्येतानि बृहत्त्रयी' नाम्ना ख्यातिं गतानि महाकाव्यानि सन्ति। यतो हि तत्रानेके दीर्घातिदीर्घसर्गाः सन्ति । परं केवलं नात्र दीर्घतावैशिष्ट्यमेव काठिन्यमपि तत्रोत्तरोत्तरं वृद्धिं गतं कारणं

---

५ श्रीहर्ष कविराजराजिमुकुटालङ्कारहीरः सुतं श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
तच्चिन्तामणिमन्त्रचिन्तनफलेशृङ्गारभङ्ग्या महाकाव्ये चारुणि नैषधीयचरिते सर्गोऽयमादिर्गतः॥
नैषदीयचरितम् (१/१४५); पृ. ५८

६ तेनैव कविना श्रीहर्षेण लिखितम्-
साहित्ये सुकुमारवस्तुनि दृढन्यायग्रहग्रन्थिले,
तर्के वा मयि संविधातरि समं लीलायतेभारती।
शय्या वाऽस्तु मृदूत्तरच्छदवती दर्भाङ्कुरैरास्तृता,
भूमि र्वा हृदयङ्गमो यदि पतिस्तुल्या रतिर्योषिताम्॥, नैषधीयचरितम् (प्रस्तावना); पृ. ३

७ माधुर्यव्यञ्जकैर्वर्णैः रचना ललितात्मिका।
अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते॥ साहित्यदर्पणः (९.२); ६५९

भारविमाघश्रीहर्षाणां परस्परं स्पर्धा। तस्मात् किरातार्जुनीयं कठिनम्, शिशुपालवधं कठिनतरम्, नैषधीयचरितं कठिनतमञ्च वर्तते। एतस्माद्विवेचकै:‘बृहत्त्रयी' नाम्ना ख्यातं महाकाव्यत्रयं 'पाषाणत्रयी' इत्यपि नाम्ना ख्यातिं प्रापितम्।

ये सरलातिसरला ग्रन्थाः सन्ति तेषामपि टीकायाः आवश्यकता भवति, कारणं 'टीका गुरूणां गुरु:' इति सत्यमेव यदि सरलग्रन्थानामपि हार्दं प्राप्तुं टीकैव नान्यः पन्थाश्चेत् पाषाणवत् काठिन्यपूर्णानां ग्रन्थानां का कथा ? एतस्मात् कारणात् टीकाग्रन्थानामावश्यकताऽनिवार्या। तत्र प्राचीनटीकाकाराः यथा विवेचनं कुर्वन्ति तेभ्यः आधुनिका विवेचकाः कीदृशं विवेचनं कुर्वन्तीति विलोकनं कविकुलगुरुकालिदासवचना[८]दावश्यकम्, शिशुपालवधस्य विवेचकेषु द्वौ धुरन्धरौ विवेचकौ वर्तेते तत्रैक: सर्वप्राचीनो वल्लभदेवश्चान्यो मल्लिनाथो यस्तस्मादुत्तरवर्ती वर्तते। पूर्वविवेचितकारणानां बाहुल्यत्वात् प्रस्तुताभ्यासस्य नितान्तमावश्यकता।

## शिशुपालवधस्य महाकाव्यत्वसिद्धिः

आदौ वयं महाकाव्यस्य लक्षणचर्चां विधास्यामस्तत्पश्चात् तानि लक्षणानि। शिशुपालवधे कथं दृश्यन्ते तच्चर्चा करिष्यामः।

भामहेन काव्यालङ्कारग्रन्थे लक्षणानि लिखितानि यत्र सारं विचारयामस्तर्हि महाकाव्यं सर्गबद्धं भवति, प्रतिपाद्यविषयस्य गुरुता तत्रानिवार्या भवति, नायकस्यौदार्यं प्रसिद्ध भवति, नायकस्योत्कर्षो भवति, चतुर्वर्गफलप्राप्तिर्भवति, कस्यचिद् योग्यस्य वृतान्तोल्लेखो भवति, समाजदर्शनं भवति, रसवैविध्यं भवति, पञ्चसन्धयो भवन्ति, तथा च प्रकृतिवर्णनं भवतीति भामहनिर्दिष्टमहाकाव्यलक्षणैरवगम्यते।[९]

---

[८] पुराणमित्येव न साधुसर्वं न चापि काव्यं नवमित्यवद्यम्।
सन्त: परीक्ष्यान्यतरद् भजन्ते मूढ: परप्रत्ययनेयबुद्धि:॥ कालिदासग्रन्थावली (मालविकाग्निमित्रम्) (१.२); पृ. २५९

[९] सर्गबन्धो महाकाव्यं महतां च महच्च यत्।
अग्राम्यशब्दमर्थञ्च सालङ्कारं सदाश्रयम्॥१९॥
पञ्चभि: सन्धिभिर्युक्तं नातिव्याख्येयमृद्धिमत्॥

भामहेन काव्यालङ्कारे यानि लक्षणानि दत्तानि तत्र किमपि नाविन्यमपेक्षितमिति मत्वा दण्डिना अपि महाकाव्यलक्षणानि पुरस्कृतानि। भामहकृतलक्षणेषु यच्छैथिल्यं वर्तते तद्दुरीकर्तुं दण्डी प्रायतत।[१०]

दण्डिना लिखितं यन्महाकाव्यस्यारम्भः कथं करणीयः। कविनाऽऽदौ मङ्गलाचरणं कर्तव्यं भवति। महाकाव्यस्य वर्ण्यविषय इतिहासाद्वा कस्यचित् सच्चरिताद् ग्राह्यः। धर्मार्थकाममोक्षादिचतुर्वर्गफलसमेतं महाकाव्यं भवतु। पर्वतसमुद्रचन्द्रोदयनगराणाञ्च वर्णनानि भवन्तु, एवं समृद्धवर्णनसमृद्धिसमन्वितं महाकाव्यं भवतु। अलङ्कारैरलङ्कृतं भवतु, विस्तृतञ्च भवतु। रसान्वितं महाकाव्यं भवतु, कारणं रसस्तु काव्यस्मात्मा प्रोक्तः। महाकाव्ये सर्गस्य विस्तारोऽपि यथावसरं कार्यः। वृत्तानां चयनमपि समीचीनं श्रवणरोचकञ्च भवत्वित्यपि नितान्तमपेक्षितं कारणं महाकाव्यस्य श्रव्यकाव्येषु गणना वर्तते। अतः काव्यं श्रव्यं भवतु। क्रमशो नायकस्याभ्युदयो भवतु। तत्र प्रसङ्गवैविध्यं नितान्तमपेक्षितं भवति तथा च वाचकस्य मनो द्रवीकर्तुं सक्षमं भवतु। एतादृशं महाकाव्यं भवेत् तर्हि युगान्तेऽपि तस्य कीर्तिः स्थैर्यं भजते। एवं दण्डिना काव्यादर्शे आदर्शमहाकाव्यलक्षणविचार: प्रस्तुतः।

---

चतुर्वर्गाभिधानेऽपि भूयसार्थोपदेशकृत्।
युक्तं लोकस्वभावेन रसैश्च सकलैः पृथक्॥
नायकं प्रागुपन्यस्य वंशवीर्यश्रुतादिभिः।
न तस्यैव वधं ब्रूयादन्योत्कर्षाभिधित्सया॥
यदि काव्यशरीरस्य न स व्यापितयेष्यते।
न चाभ्युदयभाक्तस्य मुधादौ ग्रहणस्तवौ॥२३॥ काव्यालङ्कार: सं. पं. बलदेव उपाध्याय, प्रका जयकृष्णदास हरिदा गुप्त चौखम्बा; पृ. ३.

[१०] सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम्।
आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्॥
इतिहासकथोद्भूतमितरद्वा सदाश्रयम्।
चतुर्वर्गफलोपेतं चतुरोदात्तनायकम्॥
नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः॥
मन्त्रदूतप्रयाणानि नायकाभ्युदयैरपि।
अलङ्कृतमसंक्षिप्तं रसभावनिरन्तरम्॥
सर्गैरनतिविस्तीर्णैः श्रवणवृत्तैः सुसंधिभिः।
सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जकम्।
काव्यं कल्पान्तस्थायि जायेत सदलंकृति॥ काव्यादर्श: (१/१४) पृ. १६.

परं साहित्यदर्पणे विश्वनाथेन दण्डिनोऽपि समीचीनरीत्या काव्यलक्षणानि। लिखितानि सन्ति।[११]

यदा वयं शिशुपालवधस्य महाकाव्यत्वं परीक्षेतुं वा सिद्धं कर्तुं यतमाना: स्मस्तदा सर्वाण्यपि लक्षणानि माघकाव्ये दृश्यन्ते। एतदर्थं नायकस्य, विषयवस्तुनः सर्गाणाम्, रसानाम्, काव्यारम्भस्य, वृत्तानाम्, वर्णनानाम्, सन्धीनाम्, नामकरणस्य च मुख्यत्वेन चिन्तनमपेक्षितमिति लक्षणैः ज्ञायते।

एतस्य महाकाव्यस्य नायकः स्वयं भगवान् श्रीकृष्णो वर्तते। स: चंद्रवंशशिरोमणिः क्षत्रियो देवो धीरोदात्तश्च वर्तते। सः विनयान्वितः सुन्दरः, त्यागी, कर्मकुशल:, प्रियवक्ता, लोकप्रिय:, शुद्धः, बुद्धः, प्रवचनपटु:, उच्चवंशजः, स्थिरचित्तः, युवा, साहसी, स्मृतिसम्पन्न: कलाप्रेमी, स्वाभिमानी, निरभिमानी, सभ्य:, शास्त्रवेत्ता, शूरश्च तेजस्वी वर्तते।

---

११ सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः।।
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः।
एकवंशभवा भूपाः कुलजा बहवोऽपि वा।।
शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते।
अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः।।
इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम्।
चत्वारस्तस्य वर्गाः स्युस्तेष्वेकं च फलं भवेत्।।
आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा।
क्वचिन्निन्दा खलादीनां सतां च गुणकीर्तनम्॥
एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः।
नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह।।
नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते।
सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत्।।
सन्ध्या सूर्येन्दुरजनीप्रदोषध्वान्तवासराः।
प्रातर्मध्याह्नमृगयाशैलर्तुवनसागराः।।
संभोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः।
रणप्रयाणोपयममन्त्रपुत्रोदयादयः।।
वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह।
कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा॥
नामास्य सर्गोपादेयकथया सर्गनाम तु।
साहित्यदर्पण: (६.३१५); पृ. ५४९.

अस्य महाकाव्यस्य नायक: सज्जनानुग्रहाय दुर्जनग्रहाय च पृथिव्यामवतरितः। अयं विनम्र: शूरश्च वर्तते तत्तु नारदागमनेन[१२] सात्यकिवचनै[१३]श्चावगम्यते। मन्त्रणावसरे तस्य गाम्भीर्यं गम्यते। सर्वेषां प्रियश्च न तस्य सामान्यजनकर्मणि लज्जा च महत्साध्यकर्मणि गर्व इति युधिष्टिरस्प यज्ञे सुविदितमेवास्ते।[१४]

नारदवचनात् प्रतिज्ञाकर्मण आरभ्य शिशुपालवधपर्यन्तं कथावस्तु श्रीकृष्णाधीनमेव वर्तते। एवमत्र धीरोदात्तनायकस्य सर्वेऽपि गुणाः अस्मिन् नायके विद्यमानाः सन्ति।

महाकाव्यस्य कथानकमैतिहासिकं वा सदाश्रितं भवति। अत्र महाभारतस्य सभापर्वणः गृहीतं यत् श्रीकृष्णचरिताधीनम् वर्तते। स्वल्पमिदं विषयवस्तु महाभारतात् गृहीत्वा कविना सिन्धोर्बिन्दुं गृहीत्वा पुन: बिन्दो: सिन्धुरचना कृता। अतः सर्वोत्कृष्टकथानकमिति न संशयलव:।

महाकाव्ये न्यूनातिन्यूनमष्टसर्गाः भवन्ति सर्गाणामधिकाधिकसंख्या त्रिंशद्भवति। तर्ह्यत्र विशतिसर्गा:सन्ति, तथा च पञ्चाशतसंख्यातः न श्लोकानां न्यूनता तथा च पञ्चाशदधिकैकशतान्नाधिक्यं पद्यानामिति सर्गश्लोकानां संख्या नियमबद्धा वर्तते।

महाकाव्ये शृङ्गारवीरशान्तानां मध्ये कश्चिदेको मुख्यरसो भवति चान्ये तं पुष्टिं नयन्ति। अत्र वीर एव प्रधानरस: वर्तते, यस्यानुभूतिर्विशेषतस्तु युद्धवर्णने

---

१२ अशेषतीर्थोपहनाः कमण्डलोनिर्धाय पाणावृषिणाऽभ्युदीरिताः।
अघौघविध्वंसविधौ पटीयसीर्नतेन मूर्ध्ना हरिरग्रहीदप:
शिशुपालवधे (१.१८).

१३ प्रतिवाचमदत्त केशवः शपमानाय न चेदिभूभुजे।
अनुहंकुरुते घनध्वनिं न हि गोमायुरुतानि केसरी।।२५ ॥
शिशुपालवधम् (१६.२५).

१४ शासनेऽपि गुरुणि व्यवस्थितं कृत्यवस्तुषु नियुङ्क्ष्व कामतः।
त्वत्प्रयोजनधनं धनञ्जयादन्य एष इति मां च मावगाः॥१५।।
शिशुपालवधम् (१४.१५).

जायते। माघेन युद्धवर्णने[१५] वीराणामुत्साहस्य सजीवं चित्रमेव दर्शितम्। शृङ्गारादि[१६]रसानामपि यथावसरं समीचीनाऽनुभूतिर्भवत्येव।

महाकाव्यस्यारम्भ आशीर्वादात्मको, नमस्कारात्मको वा वस्तुनिर्देशात्मको भवति। एते मङ्गलाचरणप्रकाराः सन्ति। अनया दृष्ट्या विलोक्यते चेत् शिशुपालवधस्यारम्भस्तु वस्तुनिर्देशात्मको वर्तते।[१७] परं मल्लिनाथेनात्र श्रीशब्दो मङ्गलवाचक इति प्रोक्तम्। षोडशसर्गे[१८] 'दुर्जनदोषाश्च सज्जनगुणाः कविना वर्णिताः एवमत्र दुर्जननिन्दा सज्जनप्रशंसा च वर्तत एव।

ततो यदि वृत्तविचारः क्रियते चेदेकस्मिन् सर्गे केनचिदेकेनैव वृत्तेन भवितव्यं परमन्ते वृत्तवैविध्यमपेक्षते। तद्वृत्तपरिवर्तनमन्यसर्गकथां सूचयति। यथा प्रथमसर्गारम्भे वंशस्थवृत्तमन्ते पुष्पिताग्रा शार्दूलविक्रीडितं च वर्तते। परं चतुर्थसर्गे रैवतकपर्वतवर्णने कविना उपजाति, वसन्ततिलका,- पुष्पिताग्रा,- द्रुतविलम्बित,- शालिनी,- पथ्या,- प्रहर्षिणीप्रभृतिवृत्तानां प्रयोग: कृत इत्यपवादः। वर्णनविचारोऽथ प्रस्तूयते चेत् तृतीयसर्गे द्वारिकानगरीवर्णनं समुद्रवर्णनञ्च नितान्तं चेतोहरम्, चतुर्थसर्गे रैवतकपर्वतवर्णनं येन कविना घण्टामाघप्रसिद्धि- र्लब्धा। पञ्चमसर्गे श्रीकृष्णशिबिरवर्णनं वर्तते।

---

[१५] यातैश्चातुर्विध्वमस्त्रादिभेदादव्यासङ्गैः सौष्ठवाल्लाघवाच्च।
शिक्षाशक्तीः प्राहरन्दर्शयन्तो मुक्तामुक्तैरायुधैरयुधीयाः।।११।।
शिशुपालवधम् (१८.११)

[१६] प्रत्यंसं विलुलितमूर्धजा चिराय स्नानार्द्रं वपुरुदवापयत् किलैका।
नाजानादभिमतमन्तिकेऽभिवीक्ष्य स्वेदाम्बुद्रवमभवत्तरां पुनस्तत्॥६८।।
शिशुपालवधम् (८.६८)

[१७] श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि।
वसन्ददर्शावतरन्तमम्बराद्धिरण्यगर्भाङ्गभुवं मुनिं हरिः॥१॥
शिशुपालवधम् (१.१).

[१८] श्रीकृष्णस्य नारददर्शनरूपं वस्तु आदौ श्री शब्दप्रयोगपूर्वकं निर्दिशन् कथामुक्षिपति श्रिय इति।। तत्रादौ श्रीशब्दप्रयोगाद्वर्णगणादिशुरभ्युच्चयः। तदुक्तं च - देवतावाचकाः शब्दाः ये च भद्रादिवाचका:। ते सर्वे नैव निन्द्या स्युर्लिपितो गणतोऽपि वा।। इति मल्लिनाथः शिशुपालवधम् (वल्लभटीका-१.१); पृ. ६.

ततश्च षष्ठे सप्तमे चाष्टमे सर्गे क्रमानुसारं समायाति ऋतुवर्णनं जलक्रीडावर्णनञ्च। ततश्च चन्द्रोदयवर्णनम्।[19] दशमसर्गे नायकनायिकानां रात्रिक्रीडावर्णनम्। एकादशसर्गे प्रभातवर्णनं वर्तते। द्वादशसर्गे सैन्यप्रस्थानवर्णनं यमुनानदीवर्णनञ्च वर्तते। अन्तिमसर्गेषु युद्धवर्णनं वर्तते। एवमत्र महाकाव्यलक्षणानुरूपं वर्णनवैविध्यं रोचकं वर्तते।

महाकाव्ये नाट्यसन्धयोऽपि नितान्तमपेक्षन्ते। अत्रापि यथावसरं नाट्यसन्धयो दृश्यन्ते। यथा नारदेन शिशुपालवधस्य प्रार्थना कृता तत्र बीजसन्धिः, सर्गान्ते च भगवतः क्रोधो द्वयोः संयोगे मुखसन्धिः। ततश्च इन्द्रसन्देशो युधिष्ठिरयज्ञनिमन्त्रणञ्च द्वयोर्मध्ये कस्मै कर्मणे प्राधान्यं दातव्यमेतदर्थ मन्त्रणाऽन्ते त्वरितं प्रस्थानं करणीयमिति प्रतिमुखसन्धि:। ततश्च राजसूययज्ञे श्रीकृष्णस्याग्रपूजा तथा शिशुपालस्य विरोध एतद्विघ्नवर्णनमपशुकनादिफलप्राप्तिरेवमत्र गर्भसन्धिर्जातः। ततः शिशुपालेन सह भगवतो युद्धं विजयचिह्नानि चात्रावमर्शसन्धिः स्पष्टः। अन्ते च शिशुपालवघेन जाते च कार्ये शिशुपालस्य तेज: कृष्णदेहे समाहितं भवतीति उपसंहृतिसन्धिः।

एकमत्र माघकाव्ये नाट्यसन्धीनां यथावसरं समीचीनं दर्शनं जायते। अस्य महाकाव्यस्य नाम विषयमाश्रित्य शिशुपालवधं स्थापितं वर्तते। परं कविनाम्नाऽपि माघकाव्यमिति काव्यस्यास्य ख्यातिर्वर्तते। पूर्वोक्तरीत्या सर्वाण्यपि लक्षणान्यत्र यथार्थं स्थानं लभन्तेऽत: शिशुपालवधं[20]महाकाव्यपदमर्हति।

✹✹✹

---

[19] वसुधान्तनि:सृतमिवाहिपतेः पटलं फणामणिसहस्ररुचाम्।
स्फुरदंशुजालमथ शीतरुचः ककुभं समस्कुरुत माघवनीम्॥२५।।
शिशुपालवधम् (९.२५);

[20] नेतास्मिन्यदुनन्दनः स भगवान्वीरः प्रधानो रसः
शृङ्गारादिभिरङ्गवान्विजयते पूर्णा पुनर्वर्णना।।
इन्द्रप्रस्थगमाद्युपायविषयश्चैद्यावसादः फलम्
धन्यो माघकविर्वयं तु कृतिनस्तत्सूक्तिसंसेवनात्।।
शिशुपालवधम् (मल्लिनाथटीका १.१); पृ. १.

# प्रकरणम्-३

## माघस्य समय:, जीवनम्, कर्तृत्वम्

सति देहान्तेऽपि जीवितुमिच्छन्तो महायशसः कवयः काव्यदेहे कीर्त्या च नितान्तं जीवन्त्येव। तस्मादेव काव्यस्य यशसे रचनेति काव्यप्रकाश[1]कारेणोक्तम्, कवय: स्वविषये प्रत्यक्षं न किमपि लिखन्तोऽपि पात्रवर्णनेषु स्वीयां प्रकृतिं प्रकटयन्ति, प्राचीनकवय आत्मश्लाघाभीता: सन्त आत्मनामो[2]ल्लेखमपि विनयनयमाश्रित्य नोऽकुर्वन्। अतः तेषां जीवनविषये स्पष्टं वक्तुं न शक्यते। तथापि कतिपयाधारभूतोल्लेखानाश्रित्य माघस्य जीवनपरिचयार्थं यत्नो विधीयते।

महाकविना माघेन शिशुपालवधमहाकाव्यस्यान्ते कविवंशवर्णनं विदधता पञ्चलोका विरचिताः। तदर्थचिन्तनं क्रियते तर्हि - 'श्रीवर्मलनाम्नो नृपस्य पुण्यकर्मणि प्रवृत्त:, असक्तदृष्टि:, नितान्तनिर्मल: सुप्रभदेवनामा सर्वाधिकारी आसीत्। तस्य वचनेषु राज्ञः परमविश्वास आसीत्। तस्य सुप्रभदेवस्य दत्तकनामा महामनाः, क्षमायुक्तः, कोमलहृदयः, धर्मतत्परः पुत्र आसीत्। यं विलोक्य जना: व्यासस्याजातशत्रुवचसि प्रत्ययमकुर्वन्। सोऽद्वितीय:, सज्जनानां मुख्यश्चासीत् तस्य सर्वाश्रय इति द्वितीयं गौणं नामावर्तत। तस्य दत्तस्य पुत्रेण शिशुपालवधमहाकाव्यस्य रचना कृता।

एवं पञ्चपद्यानि[3] माधपरिचये साहाय्यं कुर्वन्ति। परमिमे श्लोका: प्रक्षिप्ता इति केचन भणन्ति। तत्र ते कारणं दर्शयन्ति यद् वल्लभदेवेनैतेषां श्लोकानामुपरि

---

[1] काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे॥२॥ - प्रथमोल्लास: पृ. ५.
काव्यप्रकाशः - चौखम्बा विद्याभवन, वाराणसी-२२१००, मुद्रक-फूल प्रिन्टर्स,वाराणसी

[2] आत्मनाम 'गुरोर्नाम नामातिकृपणस्य च।
श्रेयस्कामो न गृह्णीयात् ज्येष्ठापत्यकलत्रयोः।।(कस्यापि)

[3] सर्वाधिकारी सुकृताधिकार: श्रीवर्मलाख्यस्य बभूव राज्ञः।
असक्तदृष्टिर्विरजाः सदैव देवोऽपरः सुप्रभदेवनामा॥१॥

टीका कृता परं मल्लिनाथादिटीकाकारैः टीका न कृता, तस्मादेते श्लोकाः प्रक्षिप्ताः स्युः। यद्यपि मल्लिनाथस्य ध्याने वल्लभदेवस्य टीका वर्तते एव तथापि तेन श्लोकास्त्यक्ता यतो हि कुमारसम्भवस्य कतिपयसर्गवदिमेऽपि प्रक्षिताः स्युः। परं केचन विद्वांसो वदन्ति यत् केवलं परिचय एवं वर्तते तस्मात् मल्लिनाथेन त्यक्ताः। अन्यच्च माघस्य वसन्ततिलकावृत्तं प्रियमत्रापि पञ्चमे पद्ये विलोक्यते। अन्यच्च माघस्य श्लेषक्लिष्टा वाण्यपि विलोक्यते अपरमत्र प्रक्षेपविषये नान्यों विशेषो हेतुरपि दृश्यते तस्यादिमे श्लोकाः माघकृता एवेति स्वीकृतिर्न दोषाय। मेरुतुंगाचार्यविरचिते प्रबन्धचिन्तामणिग्रन्थे च बल्लालसेनविरचिते भोजप्रबन्धग्रन्थे माघस्य विषये लिखितं प्राप्यते परमत्र सम्पूर्णलेखनं सत्यमेवेति वक्तुं न शक्यते कल्पनाप्राचुर्यात्। तदित्थम् माघस्य पितामहः सुप्रभदेवः वर्मल-नृपस्य मुख्याधिकारी आसीत्। माघस्य पितृनाम दत्त आसीच्च मातृनाम ब्रह्मी। तयोर्निवासस्थानं श्रीमालनगरमासीत् दत्तो धनिकः काव्यतत्वज्ञोऽप्यवर्तत। माघजन्मानन्तरं केनचित् ज्योतिषज्ञेनोक्तं यत् बालोऽयं धनिको भविष्यति, परमन्तिमावस्थायां दारिद्रयं प्राप्स्यति। पादपीडया तस्य जीवनान्तो भविष्यति। तदर्थञ्च पित्रा तथा व्यवस्थाऽपि कृता। तस्य विवाहो मल्हणादेव्या सह जातः।

माघः काव्यानि विलिख्य पितरमदर्शयत् परं पिता न तुष्टः, तेनोक्तं त्वमन्येषां कवीनां काव्यानि पठेति। ततश्चैकदा माघेन शिशुपालवधस्य रचना कृत्वा पित्रे तत् काव्यं समर्पितम्, परं तेन स्वरचना वर्तते तथा नोक्तम्, पित्रा प्रशंसा कृता ततस्तेत स्वरचनेत्युक्तम्। तेन वृद्धेन दत्तेन शापो दत्तः, यथा तवेयमद्वितीयरचना भविष्यति। सत्यमपीदमेव यतोहि माघस्येयं रचनाऽद्वितीया वर्तत एव।

अपरञ्च माघस्य राज्ञा भोजेन सह मैत्री आसीत्। एकदा सः भोजभवनं गतवात् किन्तु तदातिथ्येन तस्य मनः प्रसन्नं नाभवत्। माघेन भोजाय निमन्त्रणमपि

---

काले मितं तथ्यमुदर्कपथ्यं तथागतस्येव जनः सचेताः।
विनानुरोधात्स्वहितेच्छयैव महीपतिर्यस्य वचश्चकार॥२॥
तस्याभवद्दत्तक इत्युदात्तः क्षमी मृदुर्धर्मरस्तनूजः।
यं वीक्ष्य वैयासमजातशत्रोर्वचो गुणग्राहिजनैः प्रतीये॥३॥
सर्वेण सर्वाश्रय इत्यनिन्द्यमानन्दभाजा जनितं जनेन।
यश्च द्वितीयं स्वयमद्वितीयो मुख्यः सतां गौणमवाप नाम।।४।।
श्रीशब्दरम्यकृतसर्गसमाप्तिलक्ष्मलक्ष्मीपतेश्चरितकीर्तनमात्रचारु।
तस्यात्मजः सुकविकीर्तिदुराशयादः काव्यं व्यधत्त शिशुपालवधाभिधानम्॥
शिशुपालवधम् (वल्लभदेवस्य टीकायाम्) पृ. ७५१.

दत्तम्। एकदा राजा भोजो माघभवनं गतः। इन्द्रप्रस्थवद् माघवैभवं भवनरचनाञ्च विलोक्य दुर्योधनस्येव तस्यापि जलस्थलविभ्रमोऽभवत्।

माधवैभवं विलोक्य भोजस्तु नितान्तं प्रसन्नः सन् भोजस्वामिप्रासाद-पुण्यफलं दत्त्वा स्वभवनं गतः। गच्छता कालेन भाविवशात् तस्य वैभवपूर्णजीवनचन्द्रे ग्रहणमागतम्। तेन तदा धारानगरीनिवासी भोजः स्मृतः, तेन स्वभार्या तत्र शिशुपालवधं गृहीत्वा प्रेषिता। राज्ञा तत्र कुमुदवनमपश्रि.....(११-६४) पद्यं पठितम्। प्रसन्नेन राज्ञा भावो ज्ञातः तस्यै सुवर्णदानं कृतम्। अध्वनि याचका मिलितास्तेभ्यस्तद् धनं समर्पितम्, रिक्तहस्ता सती गृहमागता। अन्ये याचकाः आगताः परं धनाभाव आसीत्। भविष्यकथनानुसारं माघः दारिद्र्यपूर्णं जीवनं यापयन् पादपीडया दिवं गतः। नर्मदातटे मृतदेहस्याग्निसंस्कारो जातः। माधपत्न्यपि भर्तारमन्यगच्छत्। यत्र माघः श्रीहीनः जातः तस्य श्रीमालनगरस्य नाम राज्ञा भोजेन 'भिनमाल' इति स्थापितम्।

माघो ब्राह्मणकुलोत्पन्न आसीत्, परं तस्य वैभवं विलोक्य तस्य कृते 'श्रेष्ठिन्' विशेषणं पठित्वा केचन तस्य वैश्यवर्गे गणनां कुर्वन्ति। परं नेदमुचितं। कारणं पूर्वस्मिन् काले ब्राह्मणा अपि वैभवसम्पन्ना आसन् तथा च 'श्रेष्ठिन्' विशेषणं तस्य श्रेष्ठतां दर्शयति नतु वर्गम्। तस्य चतुर्दशसर्गस्य यज्ञविधिवर्णनं तस्य ब्राह्मणत्वं दर्शयति।

अनेन ज्ञातुं शक्यते यत् माघः ब्राह्मणकुलोत्पन्न आसीत्। स वैभवसम्पन्न आसीत्। तस्य ज्ञानविषये शिशुपालवधमेव प्रमाणमिति तत्र वक्तुमवसर एव नास्ति।

## माघस्य समयः

आयुर्नश्यति पश्यतां प्रतिदिनम्
कालो जगद्भक्षकः ........।।

अनेनेदं सुविदितं यत् समयः सर्वेषां निर्णयं विदधाति। 'कालः पचति भूतानि' इति नियमानुसारं कालेन नैके जनाः नाशं नीताः, तत्र कवयो विद्वांसोऽपि नापवादभूताः। परमन्ये कवयः स्वीयं परिचयं दत्त्वा दिवं प्रयातास्तत्र संस्कृतस्य

प्रायः कवयोऽपवादभूताः। देववाण्याः प्राचीनकविभिः आत्मश्लाघादोषदूषितैर्न भाव्यमिति मत्वा स्वपरिचयो न दत्तः। तस्मात् कारणात् तेषां समयं ज्ञातुं न शक्यते, तदर्थं केवलमनुमानप्रमाणमेव प्रमाणम्। माघस्य समयनिर्णयाय कानिचिदनुमानानि निम्नलिखितानि सन्ति। यथा-

माघकविना शिशुपालवधमहाकाव्यस्य द्वितीये सर्गे[४] कतिपयव्याकरण-ग्रन्थानां पद्येष्वुल्लेख: कृत: ये पाणिनीयपरंपराश्रिता: सन्ति। तत्र 'न्यास', 'वृत्ति शब्दयोरुल्लेखो दृश्यते। अत्र न्यासपदेन इ.स. ७०० शताब्दौ जातस्य जिनेन्द्रबुद्धेः काशिकाग्रन्थोपरि तन्नामधेयष्टीकाग्रन्थः इति केषाञ्चिन्मतम् अन्ये केचन 'न्यास' इति चुल्लिकुणिसङ्गत: प्राचीनतम: ग्रन्थ इति विचारयन्ति। ये विद्वांसो माघं सप्तमशताब्देरुतरार्धे जातं मन्वते ते द्वितीयमतं स्वीकुर्वन्ति तथा च येऽष्टम्यां नवभ्यां वा शताब्दौ जातं मन्यन्ते त एव जिनेन्द्रबुद्धे- र्न्यासं वदन्ति। अत्र च वृत्तिपदेन प्राय: जयादित्यवामनेन ६५० पर्यन्तं रचितस्य काशिकाग्रन्थस्योल्लेखो वर्तते तस्मादिदं स्पष्टं यत् सप्तमशताब्देरुत्तरार्धात् पूर्वं माध: जात इति वक्तुं न साम्प्रतम्।

इ.स. ८५० शताब्दौ जातस्यानन्दवर्धनस्य ध्वन्यालोकग्रन्थे माघस्य पद्यद्वयं दृष्टान्तरूपेण दर्शितम्। नवम्यां शताब्दौ जातस्य वामनस्य काव्यालङ्कारग्रन्थेऽपि माघकाव्यस्य काव्यं दृश्यते। अनेनेत्थं वक्तुं शक्यते यत् माधः ९ शताब्दे: पूर्वं जातः।

ततश्च दशम्यां शताब्दौ जातस्य राजशेखरस्य काव्यमीमांसायां माघभारव्युल्लेखो दृश्यते। ततश्च सोमदेवस्य यशस्तिलकचम्पूकाव्ये, धनपालस्य तिलकमञ्जर्यां,[५] भोजस्य सरस्वती कण्ठाभरणे, क्षेमन्द्रस्य औचित्यविचारचर्चायां च माघस्योल्लेखो दृश्यते।

अथ सप्तमशताब्दे: उत्तरार्धात् नवमशताब्दे: प्रारम्भे माघ: जात: तत्र समयं ज्ञातुं साहाय्यं करोति डो. किलहोर्नमहोदयेन संशोधनं कृत्वा प्राप्तः शिलालेख: आबूपर्वतस्य समीपस्य वसंतगढग्रामस्य क्षेमाय्याया: मन्दिरस्य वर्तते। तत्र

---

[४] अनत्सूत्रपदन्यासा सद्वृत्तिः संन्निबन्धना।
शब्दविद्येव नो भाति राजनीतिरपस्पशा ॥११२॥ शिशुपालवधम्, २/१३२.।

[५] माघेन विघ्नितोत्साहा नोत्सहन्ते पदक्रमे।
स्मरन्ति भारवेरेव कवयः कपयो यथा॥२८॥ - तिलकमंजरी पृ. ५४.!

वर्मलनृपस्येल्लेखो वर्तते। शिलालेखस्य समय: ६८१ दत्त:। प्राय: विद्वांसः विक्रमसंवत्समयं स्वीकुर्वन्ति। तदनुसार सः शिलालेखः इ.स. '६२५' समयं सूचयति वर्मलातनृपस्योल्लेखो दृश्यते स वर्मलनृप एव यस्योल्लेख: कविना माघेन कविवंशवर्णने कृत:, अनेन माघस्य पितामहस्य सुप्रभदेवस्य समय: इ.स. '६२५' स्वीकर्तुं शक्यते। अत: माघ: इ.स. '६६०' जात इति कल्पना कर्तुं शक्यते। अनेन च चुल्लि, कुणि विद्वांसौ जातौ तौ सप्तमीशताब्दे: पूर्वार्धे जातौ अथवा तत्पूर्वमपि जातौ स्याताम्। तयोरेकस्य न्यासः स्वीकार्यः, अन्यच्च वृत्तिपदेन काशिकाया उल्लेखोऽपि सङ्गत एव। अनेन माघः सप्तमीशताब्देदुत्तरार्धे जातः इति मतं प्रायः सर्वसम्मतं मतं वर्तते।

## वसन्तगढ़ का शिलालेख

इस लेख का काल (विक्रमसंवत ६८२)

(१) ॐ नमः ॥ धातुपूर्या योगनिन्द्र (जलन)-(नस्या) कृतिर्व्विश्वयोनेः कैलासोच्चाङ्कश्रिङ्गं प्रतिनियतमुदावासिनोर्धाङ्कसक्ता या ✳

(२) रात्रिस्सर्व्वलोके स्मृतिरमि च सतां या श्रुति ब्रह्मगीता सा देवी दुर्गमेषु प्रदिशतु जगते मङ्गलानीह दुर्ग्गाः॥ (१) नियतमति प्रणतिपर –

(३) स्याजौ यागे कपाफलेष्वसकृतम् (१) क्षेमाय्य क्षेमकरी विदधातु शिवानी नस्सततं (२) जयति जय लक्ष्मल क्षितवक्षस्थलसंश्रित श्रियांधारः (१)

(४) श्रीवर्म्मलातनृपति - पतिरवनेरधिक बलवीर्यः॥ (३) केचित्सन्देशमात्रैरति विशद पद मुद्रया पारगंत्रया केचिच्चान्ये प्रकामं प्रतिवचन युतैड्क (१) (चर्य) जापैसजस्त्र ✳

(५) अन्ये वे मण्डलान्ते कृतबालिकुहकैर्मूतिदानेन चान्ये तेनेत्यं सन्नरेन्द्रव्रतम-नुचरता शासिता भूमिपालाः (४) तस्याशेषविशे (ष)

(६) दोष रहितानुष्णानि भक्तया गुणान् (१) नाम्ना वज़मटेति मृत्यपदवीमाश्रित्य सत्याश्रयः (१✳) ख्यातः कीतिमतामलघ्यचरितः श्रीमातुरप्यज्जने किन्न

(७) -(ज्ञा) तगुण: प्रभुर्हिमवतस्सूनो संरक्षणे। (।।) (५) तस्य सूनुरधिकं प्रिय ⌬ प्रियै ⌬ प्रश्रयादि सकलेम्महागुण (१✳) राजिलोभवशेषराज व्याप्तकीर्ति

(८) रमले कुले नृप: (ll ०) (०) ब्राह्मणातिथि-मृत्या–दिकलावत्स विशेषत:१४ (१✳) सौधिकं द्रविणै शखवटे वैश्रवणायते। (७✳) तस्मिन्त्राजनि देव्यारशासति राज्यं

(९) वटाकस्थाने (१✳) गोष्ट्या कारितमेतद्भवनं भुवनस्य चिह्मिव। (८) काशपकस्तु सूनुः पितामहायस्यः सत्यदेवाख्यः (१✳) गोष्ट्या प्रसादपरया निरूपितोज

(१०) (न्म)ना स वणिक्। (ll) (९) यावन्मेरोस्तटानि प्रचुरहिमकणोतंग-शैलाधिपश्च स्यन्दि (न्यौ) यावद् (त्या) अपतक (लु) पा(✳) यावच्चन्द्रार्कमास –

(११) (स) तरलजलधे (रू) म्भयो यादच्चस्ताव (दे) वालये (निस्थि) तमिह भवत् त्रास पौरजाना (१०✳) द्विरशीत्यधिके काले पण्णां वर्ष स्तोत्र (१✳) जगन्माता

(१२) (रिद) स्थान स्था (षि) ते (गो)ष्टि पुंगवैः ।। (११) दिवाकरसुतस्ये धूर्तराशद्धि जन्मनः। (५✳) पूर्वातिमृदुभिः प्रोत्कीर्णानामुण्डिना(।) (१२) ।।। : ।।।

(१३) (गो) उठिकाय (l) राजिल। बकट। चन्द्रक। प्रतिहार बोटक ।राजस्थानीयादित्यभर। जा (१) व (१)। मातृदासंबंगदेवकुलवद्र्धन। धनदत्त (ब) सु (।)

(१४) घुघक। धौन्धकपुत्रसत्यदेव। सेनाक। रतिदास। तरण। दत्त

(१५) दृढगुर। धनगर। बपाणादि।.... । राजक। भद्रदेव। रुद्रक। दतमिल्यमालकुय खिलकु। आर्ग्दिंण्ड। णणु। णण्णारटनाग

(१६) –त–ता। भिलमालकु। सतमदेव ।
बंगदास......। श्री मातागणिका बृटानाम्नी। एवमेपा गोप्ठिकाराणां न

(१७) ....वसन्तगढ का यह राजा वर्मलात सम्बन्धी शिलालेख इस समय अजमेर मैगजीन के राजपूताना म्यूजियम के अधीनस्थ प्राचीनमूर्तियों एवं अन्य शिलालेखों के साथ सुरक्षित है। ४ कौलासोख्यशृंग पठिये। ५ दुग्ग पठिये - यह स्रग्धरा छंद है। ६ क्रिया पढिये ७ - आर्या छन्द है और इसके बाद वाला भी आया है। ८ श्रयाधार दृषित है छंद के अनुसार भी ठीक नहीं बैठता ९ पद मुद्रा पढिये। १५ स्रग्धरा छन्द है। १२ मूल्य पठिये। २३ 'प्य' अक्षर (र) के साथ उसी पंक्ति में नहीं लिखा हुआ है जिसमें 'जज' भी है किन्तु 'र' अपर 'इन' दो अक्षरों के ठीक नीचे उत्कीर्ण है। २४ - 'ज' के स्थान पर कदाचित् 'च' है। १५ शार्दूलविक्रीडित छन्द है। ६ गुण: पढ़िये। १७ विशेषत: पढिये। १९ द्रविणे: पढिये। २० – शखद्वये पढिये २१ - अनुष्टुप छन्द है। २२ आर्या छन्द है और इसके बाद का भी नहीं छन्द है। २३ - 'य' अक्षर पंक्ति के नौ उत्कीर्ण है २४ संग्राम छन्द हैं। २५ - अक्षर,। रिंद, बहुत ही अस्पष्ट हे ।३६ लोक है २७ राशद्धि अत्र पढिये। २८ गोष्ठिका अत्र पढ़िये। २९ नामानि पढ़िये

('महाकवि माघ का जीवन तथा कृतिया' डॉ. मनमोहनलाल जगन्नाथ शर्मा, प्रका. नवयुग प्रकाशन, दिल्ली-६).

## कर्तृत्वम्

महाकवेर्माघस्येयमेकैव शिशुपालवधम्' इति रचना प्राप्यते। परम् एकश्चन्द्रस्तमो हन्ति' तथैवास्य महाकाव्यस्य विषये वक्तुं शक्यते। माघस्याद्वितीयेयं रचना वर्तते

✵ ✵ ✵

# प्रकरणम्-४

## शिशुपालवधस्य टीकाकारपरिचय:

## वल्लभदेवस्य परिचय:

अन्य भारतीयसंस्कृतसाहित्यकाराणामिव वल्लभदेवस्यापि सम्यक्परिचयोपलब्धिर्न जायते। परं शिशुपालवधस्य पुष्पिकयेदं ज्ञायते यत् तस्य पिता 'आनन्ददेव' आसीत्।[१]

वल्लभदेव: स्वजनकं युद्धभूमिगतं प्रकाशमानं सवितारं कथयति।[२] मेघदूतखण्डकाव्यस्य टीकायाः पुष्पिकायां स्वजनकस्य 'राजानक' रूपेणोल्लेख: कृत:।[३] राज्ञ: पश्चादिति राजानक इत्यर्थः। तत्रैव स्वस्य द्वितीयं नाम वल्लभदेवः 'परमार्थचिह्नम्' इति ददाति। अनेनेदं वक्तुं शक्यते यत् तस्य पिता कश्मीरप्रदेशे कश्चित् सर्वकारसंलग्नः कार्यकर्ता युद्धवीरश्च भवेदिति। तस्य पुत्रस्य पौत्रस्य च परिचय: प्राप्यते। तस्य पौत्रेण कैय्यटेन आनन्दवर्धनस्य 'देवीशतकम्' इति ग्रन्थस्योपरि टीका लिखिता। तत्र तेन वल्लभदेवस्य पितामहरूपेण समानमुल्लेखः कृतः। अत्रेदमपि स्मरणीयं यत् महाभाष्योपरि प्रदीपटीका येन विरचिता स: कैयटोऽस्माद् भिन्न:, कारणं प्रदीपकारेण मङ्गलाचरणे स्वपरिचयं यच्छता ‘कैयटो जैयटात्मज:’ इति लिखितम्।[४]

---

१ इत्यानन्ददेवायनिवल्लभविरचितायां शिशुपालवधसारटीकायां सन्देहविषौषधिव्याख्यायां। नारदागमनं नाम प्रथमसर्गः। (वल्लभदेवटीका) शिशुपालवधम्, पृ. ४४.

२ सूनुरानन्ददेवस्य रणभूव्योम्नि भास्वत:।
वक्रोक्तिवर्णने रत्नं टिप्पणं वल्लभो व्यघात्॥
कुमारसम्भवम् (वल्लभदेव) सं. गौतम पटेल, अहमदावाद १९८६, भूमिका पृ. १३.

३ इति राजानकानन्ददेवात्मजपरमार्थचिह्नापरनामवल्लभदेवविरचिता मेघदूतविवृत्ति.....
कुमारसम्भवम् (वल्लभदेव) सं. - गौतम पटेल, अमदावाद, भूमिका पृ. १३.

४ पदवाक्यप्रमाणानां परं यातस्य घीमत: ।
गुरोर्महेश्वरस्यापि कृत्वा चरणवन्दनम् ॥४।।
महाभाष्यार्णवावारपारीणं विवृतिप्लवम्।
यथागमं विधास्येऽहं कैयटो जैयटात्मज:॥५॥
व्याकरणमहाभाष्यम् सं. - श्री पण्डित युधिष्ठिरमीमांसकः, प्रका० – चौखम्बा विद्याभवन, वाराणसी-१, १९६७, पृ. २.

अन्यच्च कैयटस्य पितृरूपेण चन्द्रादित्यस्य नाम प्राप्यते। पुष्पिकायां यः तिथिनिर्देशो वर्तते स कलिवर्षस्य ४०७८-१०७७'७८ अस्ति। वंशवृक्षस्य निर्देशः क्रियते तदा तदित्थं ज्ञायते।

आनन्ददेव:

↓

वल्लभदेवः

↓

चन्द्रादित्यः

↓

कैय्यट:

एतावानेव परिचयो वल्लभदेवस्य प्राप्यते। शिशुपालवधस्य सन्देहविषौधिटीकायाः मङ्गलाचरणेन कदाचित् स शैव: स्यादिति विचार आयाति न तथा स्पष्टम्। मङ्गलाचरणेनेदमपि ज्ञायते यत् सोऽतीव विनम्रो विशेषज्ञः पण्डितश्चासीत्।[५] सः कुशलो व्याकरणशास्त्रनिपुणश्चासीत्।

**वल्लभदेवस्य कालनिर्णय:** वल्लभदेवस्य रत्नाकरकृत 'वक्रोक्तिपञ्चाशिका' टीकायाः सम्पादने दुर्गाप्रसादस्य एव परबकैय्यटस्य आनन्दवर्धनकृतदेवीशतकस्य' टीकायाः सन्दर्भस्योल्लेखे कैय्यटस्य समयः कलिवर्ष ४०७८ (लोकिय वर्ष ५२ प्रायः ई. स. ९७८) वर्तते। तदा काश्मीरप्रदेशो भीमगुप्तस्य राज्यमासीत्। अयं भीमगुप्तः प्रसिद्धः राज्ञीदिद्दायाः पौत्रः आसीत्। तस्य राज्यकालः ई. स. ९७५ तः ई.स. ९८० आसीत्। वल्लभदेवः कैय्यटस्य पितामहस्तस्मात् तस्य समय ई.स. ९२५ इति वक्तुं शक्यते। **वल्लभदेवः दशमशताब्देः पूर्वार्धे जात इति सर्वस्वीकृतमतम्।**

**वल्लभदेवस्य कृतयः -**

वल्लभदेवस्य निम्नलिखिताः कृतयः प्राप्यन्ते

---

[५] यस्य भृङ्गावलिः कण्ठे दानाम्बुराजिभूषिते
भाति रुद्राक्षमालेव स वः पायाद्गणाधिपः।।
कृता महद्भिर्यत एव टीका ममापि यत्नस्तत एव युक्तः।
ब्रह्माच्युताभ्यर्चितपादपद्मो न पूज्यते किं मनुजै गिरीशः ॥
शिशुपालवधम् (वल्लभटीका) पृ. ०१.

(१) कुमारसम्भवस्य टीका

(२) मेघदूतस्य टीका

(३) रघुवंशस्य टीका

(४) वक्रोक्तिपञ्चाशिकाटीका

(५) शिशुपालवधस्य टीका

(६) सूर्यशतकस्य टीका

(७) सुभाषितवल्यां कतिपयपद्यानि वल्लभदेवनाम्ना प्राप्यन्ते।

(८) रुद्रटस्य 'काव्यालङ्कार' टीका (न प्राप्यते)।[६]

## मल्लिनाथस्य परिचयः कालनिर्णय

कृष्णमाचारियारस्य[७] मतानुसारं मल्लिनाथः कोलाचलस्य काश्यपगोत्रस्य तेलगु ब्राह्मणोऽवर्तत। कपर्दिनस्य पुत्रः तथा च मल्लिनाथस्य पौत्र आसीत्। पेड्डिभट्टो वा पेडयार्यः एवं कुमारस्वामिन् इति तस्य पुत्रद्वयमासीत् कुमारस्वामिन् प्रतापरुद्रीयस्य' टीकाकारोऽवर्तत। एवमस्यैतावानेव परिचय: प्राप्यते। मल्लिनाथो महोपाध्यायनाम्नाऽपि ख्यात इति तस्य शिशुपालवधटीकायाः मङ्गलाचरणेन[८] ज्ञायते, तस्यानया टीकया तदपि ज्ञायते यत् स विद्वान् सर्वशास्त्रनिपुणो महान् पण्डितश्चासीदत्र न कश्चित् सन्देह:।

**कालनिर्णयः** - कुमारस्वामिन् 'प्रतापरुद्रीयोपरि टीकां कृतवान्।'प्रतापरुदीये' काकटीयज्ञ: प्रतापरुद्रस्य नैकवारमुल्लेखो वर्तते, एवं तेन राज्ञा यादवनरेशस्य रामचन्द्रस्योपरि आक्रमणं कृतमासीत्, एवं ई.स. १२९८ त: इ.स. १३२३ पर्यन्तं

---

[६] एतदस्माभी रुद्रटालङ्कारविवेचितम् । सर्ग - ४/२१ शिशुपालवधम् (वल्लभटीका) पृ. १५०.

[७] History of classical Sanskrit literature by M. Krishna Machariar, Pub. Motilal Banarasidasss, Delhi, 1970, Page 120-121

[८] मल्लिनाथः सुधीः सोऽयं महोपाध्यायशब्दभाक्।
विधत्ते महाकाव्यस्य व्याख्यां सर्वङ्कषाभिधाम्।।
इहान्वयमुखेनैव सर्वं व्याख्यायते मया।
नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते।।
शिशुपालवधम् (मल्लिनाथटीका), पृ. २.

तस्य शासनमासीत्। 'रघुवंशस्य', 'मेघदूतस्य', कुमारसम्भवस्य च' टीकाया: भूमिकाया: द्वितीय: श्लोक: शकसंवत् १९५५ (इ.स. १५३३) समये शिलालेखे उद्घृत:। एवं मल्लिनाथ: १४ शताब्दे: उतरार्धे जात:। मल्लिनाथस्य सर्वज्ञशिंगभूपालेन कनकाभिषेकः कृतः आसीत्। चतुर्भिः भ्रातृभिः चतुर्भिः पुत्रैः चतुभिः जामातृभिः, चतुर स्वजनैश्च सह य: षोडशयज्ञ: शिंगभूपालेन कृत: तदा तस्याभिषेक: कृत इति कुमारस्वामिन् लिखति।

विजयनगरस्य देवराशा निम्न्त्रणं दत्तमासीत्, तत् कांजीवरस्यैकस्मिन् शिलालेखे 'वैश्य' एवं 'व्यापारी' अनयोः शब्दयोरर्थघटनस्य कृते मैसूरनगरस्य सर्वकारकार्यालयपुस्तकालयस्यैकस्यां पाण्डुलिप्यां तस्य निर्णयस्योल्लेखः कृतः। अतस्तस्य समय: इ.स. १४७० त: इ.स. १४१४ पर्यन्तं निर्धारित:।

***

# प्रकरणम्-५

## प्रस्तुतविवेचनात्मकाध्ययनस्य लक्ष्यांकनिर्देशः

यथा वयं जानीम: यत् 'प्रयोजनमनुद्दीश्य मन्दोऽपि न प्रवर्तते' तस्मात् कस्यचिदपि कर्मणः केनापि लक्ष्येन भवितव्यमेव। यथा धर्मग्रन्थेषु रामायणमहाभारतभागवतादयो ग्रन्थाः आद्यस्थानं 'भजन्ते तथा च वाचकानां विशेषानुरागवन्त: सन्त: लोकप्रियतां गताः तथैव काव्यजगति लोकप्रियतां प्राप्तानि पञ्चमहाकाव्यानि। तत्र वाचकवर्गस्तु वर्ततेऽपर्याप्तः परं तेषां ज्ञानं पर्याप्तमत: कवेर्भावं ज्ञातुं समर्थाः सर्वे न भवन्ति, यतः टीकाग्रन्थानामनिवार्यता दृश्यते। विशेषतः पञ्चमहाकाव्येषु 'पाषाणत्रयी' पदं गतानि त्रीणि महाकाव्यानि टीकाग्रन्थानां विशेषावश्यकता भजन्ते।

टीकाग्रन्थेषु यदि टीकानामभ्यासो विधीयते तदा प्रायः मुख्यत्वेन त्रयो मार्गा दृश्यन्ते टीकानाम्। यथा -




पाठदृष्टिसम्पन्नटीका व्याकरणादृष्टिसम्पन्नटीका साहित्यदृष्टिसम्पन्नटीका

तत्र त्रयो विभागा दृश्यन्ते तेषामपि यदि समीचीनोऽभ्यासः क्रियते तदा प्रथमविभागे-

(१) मूलपाठ:। नवीना: श्लाका: त्यक्तश्लोका:। श्लोकक्रम: प्रक्षिप्तश्लोकाः। सन्दिग्धश्लोकाः। पाठभेद इत्यादीनामभ्यासो भवति।

(२) व्याकरणदृष्टिसम्पन्नटीकायाम् -अन्वय:। रूपपरिचय:। कोशगतार्था:। आर्षप्रयोगाः इत्यादीनां विशेषरूपेणाभ्यासो भवति।

(३) साहित्यदृष्टिसम्पनटीकायाम् ध्वन्यर्थचिन्तनम्, रसादिचिन्तनम् अलङ्कारविवेचनम्, शब्दशक्तिपरिचयः, गुण-दोषचर्चा, वृत्तपरिचयः, काव्यलक्षणचर्चा इत्यादीनां विशेषोऽभ्यासो भवति।

एतेषां त्रयाणामपि मार्गाणां क्वचिदेकत्र दर्शनं भवति, किन्तु कस्यचिदेकस्य कृते पक्षपातस्तु नितान्तं भवत्वेव। तत्र कारणं यदि टीकाकारः समीचीनो वैयाकरणो भवति चेत् स व्याकरणदृष्ट्या विशेषं विवेचनं करिष्यति। यदि स रससम्प्रदायानुयायी भवति चेत् रसदृष्टिस्तस्य स्वाभाविकी।

अत्रापि तथैव वल्लभदेवः व्याकरणस्य प्रखरः पण्डितो वर्तते यद्यपि तस्यालङ्कारशास्त्रेऽपि पाण्डित्यं समीचीनमेव तथापि व्याकरणे नितान्तं पक्षपातो दृश्यते। एवमात्र मल्लिनाथ: समीचीनोऽलङ्कारशास्त्रनिपुणो यद्यपि तस्य व्याकरणविषयगतं पाण्डित्यं विगतशङ्कमेव तथापि साहित्यरुचिर्विशेषरूपेण स्पष्टा।

अन्यच्च यथा शिशुपालवधं माघेन किरातार्जुनीयं लक्ष्मीकृत्य स्पर्धया विरचितं तस्माच्च वाचकानां विशेषरुचिकरं सञ्जातं वर्तते। तथैव वल्लभदेवं लक्ष्मीकृत्य स्पर्धादृष्ट्यैव टीकाकर्म मल्लिनाथस्येति कतिपयस्थलेषु विलोक्यते। यथा भारविमतिक्रम्य स्थातुं माघस्य लक्ष्यं स्पष्टं तथैव वल्लभदेवमतिक्रम्य स्थातुं मल्लिनाथस्य लक्ष्यं स्पष्टम्। वल्लभदेवाद् मल्लिनाथेन स्वटीकाग्रन्थस्येतिकर्तव्यता भिन्नैव कर्तव्येति विचार्य स्वीकृता। अत एव वल्लभदेवस्य टीकायां यद्यन्न्यूनं तत्तत्पूरयितुं मल्लिनाथेन सापेक्षो यत्नो विहितः।

वयं प्राचीनसमयाद्विलोकयामो यद् यत्र स्पर्धा तत्र समेषामपि विशेषा रुचिर्भवति। तस्मादेवं कर्णार्जुनतुल्यानि पात्राणि विशेषरुचिकराणि सञ्जातानि। तदैवात्रापि कविस्पर्धा ततश्च टीकाकारस्पर्धा दृश्यते। यत्र स्पर्धा भवति तत्र वैशिष्ट्यं दर्शयितुं मतभेदा नाविन्यञ्च भवत्येव। तत्र नाविन्यं मतभेदा प्रवर्तन्ते तत्र विशेषाभ्यासस्यावश्यकता भवत्येव।

अस्माभिरप्यत्र वल्लभदेवमल्लिनाथयोः टीकयोः कुत्र व्याकरणालङ्कारपाठदृष्ट्या भेदा वैशिष्टयं च वर्तते तत् सर्वं स्पष्टं कर्तुं प्रयत्नो विधास्यते

* * *

# विभागः-२

## विवेचनात्मकम् अध्ययनम्

## प्रकरणम्-६

## विचारविनिमयः

## सर्गः-१

## नारदसम्भाषणम्

शिशुपालवधमहाकाव्यस्य प्रथमसर्गे महाकविना माघेनेत्थं वर्णनं कृतम्।

भगवान् श्रीकृष्ण: वसुदेवस्य प्रासादे निवसन् प्रजापालनमकरोत्। तदा तेनाकाशादवतरन्नारदमुनिर्दृष्ट:। तस्यागमनानन्तरं भगवता सादरं तस्य स्वागतं कृत्वाऽऽगमनहेतुः पृष्टः। नारदमुनिनेन्द्रसन्देशः कथितः। यथा साम्प्रतं शिशुपालवधो भवता कर्तव्यः। तस्य सामर्थ्यं दर्शयितुं हिरण्यकशिपुरावणयोर्दुर्वृत्तवर्णनमपि कृतम्। भगवता कृष्णेनापि भ्रुकुटिबन्धच्छलेन शिशुपालं प्रति क्रोधो दर्शितः। महाकाव्यलक्षणानुसार 'मुखेति' सन्धिरपि भवत्यत्र।[1] तेनाग्रे शिशुपालवधो भवितेति दर्शितम्।

अथैतच्चिन्तनीयं यत् प्रथमसर्गे वल्लभदेवमल्लिनाथयोर्विवेचने प्रायेण कुत्र कस्य विषयस्य न्यूनाधिक्यं दृश्यते। द्वयोरपि कथनपद्धतिस्तु नितान्तं भिन्नेव दृश्यते। तत्र वल्लभदेवस्य टीकायामर्थसारल्यं सर्वत्रापि दृष्टिगोचरं भवति। परं मल्लिनाथस्य टीकायां चेतसाऽर्थग्रहणे किञ्चित्काठिन्यमनुभूयते। तत्र कारणं मल्लिनाथेनादौ केषां कृते टीकेयं विरच्यते तत्स्पष्टं कृतमेवास्ति। यथा-

**ये शब्दार्थपरीक्षणप्रणयिनो ये वा गुणालङ्क्रिया**
**शिक्षाकौतुकिनो विहर्त्तुमनसो ये च ध्वनेरध्वनि।**
**क्षुभ्यद्भावतरङ्गिते रससुधापूरे मिमङ्क्षन्ति ये**
**तेषामेव कृते करोमि विवृतिं माघस्य सर्वङ्कषाम्॥**

---

[1] मुखं प्रतिमुखं गर्भो विमर्श उपसंहृतिः।
यत्र बीजसमुत्पत्तिर्नानार्थरससम्भवा।
प्रारम्भेण समायुक्ता तन्मुखं परिकीर्तितम्।।
**साहित्यदर्पण:** (६-७८); सं. डो. सत्यव्रतसिंह, प्रका० चौखम्बा विद्याभवन; वाराणसी; ई. १९८९; पृ. ४०८.

वल्लभदेवेन व्याकरणविषये विस्तृता चर्चा कृता। मल्लिनाथेनापि तथैव चर्चा कृता। अलङ्कारचर्चायां वल्लभदेवान्मल्लिनाथस्य दृष्टिर्विशिष्टेति दृश्यते।[२] वल्लभदेवस्य दृष्टिसृष्टौ किरातार्जुनीयमपि वर्तत एव। तथैव मल्लिनाथेनापि किरातार्जुनीयस्योल्लेखः कृतः।[३] परमन्येषामपि महाकाव्यानां दर्शनं कृतमिति तस्यालङ्कारचर्चया ज्ञातुं शक्यते। वल्लभदेवेन प्रथमश्लोकेऽलङ्कारचर्चा विस्तारपूर्वकं कृता, ततस्तु केवलं कुत्रचिदेव नामोल्लेखः कृतः। तथैव पुराणादिप्रमाणान्यपि प्रथम एव पद्ये दृश्यते। वल्लभदेवः क्वचित् पद्यरचना कथं कर्तव्येत्यपि सूचयति।[४] पर्यायविषयेऽपि मल्लिनाथेन विश्वामरवैजयन्ती-हलादिकोशानां पद्यांशा लिख्यन्ते। तस्मात् वल्लभदेवस्यापेक्षया मल्लिनाथस्य कोश: समृद्धः। अथवा वल्लभदेवसमये तथा लेखनशैली प्रसिद्धा न भवेत्। कारणं कठिनशब्दानामपि समानार्थिन: शब्दास्तु वल्लभदेवेनापि सर्वत्र लिखिताः सङ्गीतविषयकं ज्ञानमुभयोरपि टीकाकारयोर्योग्यमिति निश्चितम्। वल्लभदेवेन श्लोकटीकायां स्वस्यापि 'महात्मानो हि स्मितपूर्वाभिभाषिण:' सदृशानि मधुराणि सूक्तिसमन्वितानि वाक्यानि लिख्यन्ते।

मध्ये क्वचिदन्यग्रन्थानामपि प्रसङ्गानुरूपाः श्लोकाः वल्लभदेवेनापि लिख्यन्ते।[५] तस्मात् कारणादर्थो विशेषतो विज्ञायते। पाठान्तरस्याप्युल्लेखो

---

[२] प्रथमश्लोकस्यैव टीकात्र प्रमाणम्।
**शिशुपालवधम्** सं दुर्गाप्रसाद: प्रका० पान्डुरंग जावजी; निर्णयसागरप्रेस; मुंबई, ई. १९२३; पृ. २-३

[३] उत्फुल्लस्थलनलिनी वनादमुष्मादुद्धृत: सरसिजसम्भव: पराग:।
वात्याभिर्वियति विवर्तितः समन्तादाधत्ते कनकमयातपत्रलक्ष्मीम्।।
**किरातार्जुनीयम्** (५-३९); सं. श्रीमदादित्यनारायण पाण्डेय; प्रका० चौखम्बा सं. सीरीज ओफिस; वाराणसी, ई. १९६८, पृ. ११२.

[४] द्विधा कृतात्मा किमयं दिवाकरो विधूमरोचि: किमयं हुताशन:॥ इति वल्लभदेव:।
**शिशुपालवधम्** (१-२); सं. रामचन्द्रकाक एवं हरभट्ट शास्त्री; प्रका० The kashmir Mercantile Press; Srinagar; ई १९३५, पृ.०३.

[५] रुद्रस्य वीणा नालम्बी महती नारदस्य च।
कच्छपी तु सरस्वत्या गणानां च प्रभावती॥ - इति वल्लभ: ॥
**शिशुपालवधम्** (१-१०); प्रका० चौखम्बा संस्कृत सीरिज; बनारस; पृ. ८ .

वल्लभदेवेन क्रियते तदस्य विशेषो गुण:।[६] उभावपि काव्यदोषदर्शनचतुरौ स्त:। श्लोकस्य सूचितार्थमुभावपि टीकाकारौ दर्शयत:। परं ध्वन्यर्थविषये मल्लिनाथश्चतुर:[७] वृत्तपरिचयमुभौ यच्छत:। मल्लिनाथेन रसचर्चाऽपि क्रियते एव।[८]

प्रथमसर्गस्य पर्यालोचनं कृत्वेदं ज्ञातुं शक्यते यत् द्वावप्येतौ टीकाकारौ स्वस्थानचर्चानिपुणौ स्तः। अर्वाचीनत्वात् मल्लिनाथस्य टीका प्रमाणादिभिर्वैशिष्ट्यं धारयतीति नि:शङ्कं वक्तुं शक्यते। वल्लभदेवस्येदं वैशिष्ट्यं यत् तस्य श्लोकार्थ: सरलतया ज्ञातुं शक्यते। मल्लिनाथस्य टीकायां पद्यार्थग्रहणे शास्त्रार्थचर्चा बाधां करोति। एवमत्रोभावप्येतौ योग्यताविषये स्वस्वस्थाने नितरां योग्यौ वर्तेते इति भाव:।

इदानीं द्वयोरपि टीकाकारयोः साम्यं वैशिष्ट्यञ्च परीक्षेतुं कांश्चन श्लोकान् उद्धृत्योदाहरणमुखेन चर्चा वितन्यते।

श्लोक:-१

**श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि।**
**वसन्ददर्शावतरन्तमम्बराद्धिरण्यगर्भाङ्गभुवं मुनिं हरिः॥(१-१)**

श्लोकस्यास्य सामान्यार्थोऽयं यथा - भगवान् कृष्ण: नारदं ददर्शेति। तत्र वल्लभदेवः श्रीमच्छब्दस्यार्थे शिशुपालवधो निश्चयेन भवितेति सूचयति। एवञ्च 'हिरण्यगर्भाङ्गभुवम्' इत्यत्र ब्रह्मणो मानसपुत्रं नारदं ददर्शेति ग्राह्यम्। तदर्थं दृढीकर्तुं किरातार्जुनीयस्यैकं पद्यमुद्धृत्य तत्र सरसिजशब्द: स्थलकमलेऽपि प्रयुक्तः,[९] अतोऽत्रापि 'अङ्गभूशब्दो' मानसपुत्रार्थं प्रयुक्त इति ज्ञेयम्। परं

---

[६] यमिति पाठान्तरम्॥ - इति वल्लभदेवः॥
**शिशुपालवधम्** (१-३९); सैव श्रीनगरस्यावृत्तिः पृ. २५.

[७] त्वमिति मुमुक्षोरिति ध्वनिः॥ - इति मल्लिनाथः ।।
**शिशुपालवधम्** (१-३२); निर्णयसागरप्रेस; पृ. १३.

[८] अनेन वाक्यार्थभूतस्य वीररससहकारिणो रौद्रस्य स्थायी क्रोध: स्वानुभावे भ्रुकुट्या कारणभूतोऽनुमेय इत्युक्तम्॥
- इति मल्लिनाथः॥
**शिशुपालवधम्** (१-७५); निर्णयसागरप्रेस; पृ. २९.

[९] उत्फुल्लस्थलनलिनी वनादमुष्मादुद्धृत: सरसिजसम्भव: पराग:।
वात्याभिर्वियति विवर्तितः समन्तादाधत्ते कनकमयातपत्रलक्ष्मीम्।।

मल्लिनाथः 'अङ्गभूशब्दस्य' यथार्थतां सूचयन् भागवतपुराणस्य श्लोकाशं विलिख्य नारदस्य जन्म ब्रह्मण उत्सङ्गाज्जातमिति सप्रमाणं लिखति।[१०] अन्यच्चात्र 'वसुदेवसद्मनि वसन्' विशेषणमिदं वृत्ताभरणाय न, किन्तु शब्दालङ्कारं दूरीकृत्यार्थालङ्कारेणालङ्कृतमत: 'जगन्निवासोऽपि वसुदेवसद्मनि वसन्' इति विरोधालङ्कारः।[११] अत्र विरोधार्थं वसुदेवसद्मनि वसन्निति यथार्थं पदम्, किन्तु शब्दालङ्कारं दूरीकर्तुमेतस्य लेखनमिति युक्तियुक्तं न भात्यत: मल्लिनाथस्तत्स्पष्टीकर्तुं लिखति यत् श्लोकेऽस्मिन् 'जगज्जगन्निवासः' एवमत्र वृत्यनुप्रासः[१२] तथा च जगन्निवासो वसुदेवसद्मनि वसन् इत्यत्राधिकविरोधौ[१३] कारणं सामान्यतः आधार आधेयाद्दीर्घः भवति।

किन्तु यदि तत्रानुरूपताऽभावो भवति चेदधिकालङ्कारो भवति। अत्र प्रलयसमये समस्तं विश्वं भगवति तिष्ठत्यत: स दीर्घो जगत आधारभूतो भगवान् साम्प्रतं वसुदेवसद्मनि इति स्वल्पस्याधारं गृहीत्वा तिष्ठत्यतोऽधिकालङ्कार:।

---

**किरातार्जुनीयम्** (५-३९); सं. श्रीमदादित्यनारायण पाण्डेय; प्रका० चौखम्बा सं. सीरीज ओफिस; वाराणसी, ई. १९६८, पृ. ११२.

[१०] उत्सङ्गान्नारदो जज्ञे दक्षोऽङ्गुष्ठात्स्वयंभुवः।

**श्रीमद्भागवतम्** (१-१२-१३); सं. प्रका० गीताप्रेस गोरखपुर; संवत्-२०४५; संस्करणम्-७, पृ. ९५. ११.

[११] विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः।

**काव्यप्रकाश:** (१०-१६६); सं. सत्यव्रतसिंह,; प्रका० चौखम्बा विद्याभवन, वाराणसी-१, ई. १९९५, संस्करणम्-१०, पृ. ३९५.

[१२] अनेकस्यैकधा साम्यमसकृद्वाप्यतेकदा। एकस्य सकृदप्येष वृत्त्यनुप्रास उच्यते॥

**साहित्यदर्पण:** (१०-८); पृ. ६६८.

[१३] महतोर्यन्महीयांसावाश्रिताश्रययोः क्रमात्। आश्रयाश्रयणौ स्यातां तनुत्वेऽप्यधिकं तु तत्॥

**काव्यप्रकाशः** (१०-१२८); पृ. ४३०.

जातिश्चतुर्भिजात्याद्यैर्गुणो गुणादिभिस्त्रिभिः॥ ६८ ॥
क्रिया क्रियाद्रव्याभ्यां यद् द्रव्यं द्रव्येण वा मिश्रः।
विरुद्धमिति भासेत विरोधोऽसौ दशाकृतिः॥ ६८ ॥

**साहित्यदर्पण:** (१०.६७/६८); पृ. ८१८.

एवञ्च जगन्ति यत्र निवसन्ति स जगन्निवासो वसुदेवसद्मनि वसत्यत्र विरोधस्तु स्पष्ट एव।

**गतं तिरश्चीनमनुरुसारथे: प्रसिद्धमूर्ध्वज्वलनं हविर्भुज:।**
**पतत्यधो धाम विसारि सर्वतः किमेतदित्याकुलमीक्षितं जनः ।।(१-२)**

श्लोकस्यायं प्रसङ्गो यथा-प्रथमसर्गारम्भे नारदस्य गगनमार्गादवतरणं भवति। नारदमुनिः शक्रसन्देशं दातुं द्वारिकानगर्यां श्रीकृष्णसद्म समायाति। तदा दूरात् गगनादवतरन्तं नारदं वीक्ष्य सामान्यजनानां मनस्सु नैके विचारा आयान्ति, तान् विचारान् कविर्वर्णयति।

प्रथमं जनाः नारदमुने: तेज: विलोक्य किं सूर्योऽयमिति तर्कयन्ति, परं तस्य तु गमनं तिर्यग् भवति तस्मान्नायं सूर्यः। तर्हि किमिदमग्नेस्तेजोभवेत् ? किन्तु तदपि भवितुं नार्हति कारणं वह्नेस्तेजस्तूर्ध्वं याति। इदं तेजस्तु तद्विरुद्धं सदधः पतति, एवञ्च सर्वत्र प्रसरति, तस्माद्विशिष्टं तेजः किं भवेदित्ति जनैः साश्चर्यं विलोकितम्।

अत्र श्लोकस्यालङ्कारविषये विभिन्नमतौ वल्लभदेवमल्लिनाथौ तस्मादत्रालङ्कार चर्चा प्रस्तूयते।

वल्लभदेवमल्लिनाथावुभावप्यत्रालङ्कारं स्वीकुरुत:। परं भिन्नमतौ स्तः। प्रथमं तावत् पुरोगामित्वात् वल्लभदेवमतं प्रस्तूयते।

वल्लभदेवेनात्र ससन्देहालङ्कारः स्वीकृत:।[१४] अस्मिन्नलङ्कारे यथोपमेयमुपमानमस्ति तथा सन्देहो दर्शितो भवति। अत्र ससन्देहालङ्कारः कस्मात् कल्पितस्तत्र कारणं द्वारिकानगर्याः जनाः मुनिं विलोक्य प्रथमन्तु किमिदं तेज: सूर्य इति सन्देहं कुर्वन्ति तत: सूर्यस्य तेजस्तु तिर्यग् गच्छति, तस्मादिदं तन्नेति निश्चितं कृत्वा पुनः तर्कं कुर्वन्ति, किमिदं तेज: वह्नेः भवेत्, परं न, कारणं वह्नेः ज्वालास्तूर्ध्वं यान्ति। अतः नेदं तेज: सूर्य: वह्निः वेति निश्चयः। एवं प्रकारेणात्र निश्चयत्वात् निश्चयान्तससन्देहालङ्कारेण भवितव्यम्।

पूर्वकथनं विशेषं स्पष्टं कर्तुं काश्चन व्याख्याः ससन्देहालङ्कारस्य विलोक्यन्ते। भामहमते प्रथममुपमानमेवोपमेयं विद्यते तथा कल्पनां कृत्वा ततस्तयोर्मध्ये भेदं दर्शयित्वोपमेयमुत्कृष्टमिति वर्णयति तदा तत्र ससन्देहालङ्कारो

---

[१४] सन्देहस्तु भेदोक्तौ तदनुक्तौ च संशयः।१

**काव्यप्रकाशः** (१०.१३७); पृ. ३५५.

ज्ञेय:।[१५] अस्यैवालङ्कारस्य हेमचन्द्राचार्येण लक्षणं दीयते यथा उपमेयस्य प्रशंसायै यत्रोपमेयोपमानयोर्मध्ये संशयो भवति स सन्देहालङ्कारो ज्ञातव्यः।[१६]

ततो विचार्यते विश्वनाथमतं तद्यथा - सन्देहे चमत्कृत्या भवितव्यम्, अन्यथा तु 'स्थाणुर्वा पुरुष:' तत्रापि सन्देहालङ्कारो भविष्यति। [१७]

एतेषां मतानामत्र विवेचनमप्रासङ्गिकं नास्ति, कारणमत्र किं सङ्गतमिति विवेचनीयं वर्तते। हेमचन्द्राचार्येणोपमेयस्य स्तुतिरनिवार्येति भणितम्, तदनुसारं श्लोकेऽस्मिन् सूर्यतेजसो वह्नेश्च मुनितेजस आधिक्यं तु दर्शितं कारणं मुनेर्धाम तु सर्वतो विसारि वर्तते। परमत्र न चमत्कृतिः। वल्लभदेवमानसेऽपि विश्वनाथमतानुसारं चमत्कृतिरनिवार्येति भवेत्तस्मात् तेनात्र किञ्चित् परिवर्तनं सूचितम् तद् यथा -

"द्विधा कृतात्मा किमयं दिवाकरो
विधूमरोचि: किमयं हुताशन:।"

एवं पूर्वार्धपरिवर्तने कृते सति शब्दार्थचमत्कृतिर्भविष्यति। एवं कृतेऽर्थस्तु किञ्चिदित्थं स्यात्। एकसूर्यस्तु गगने वर्तत एव तस्यैव सूर्यस्यास्यापरो भागोऽधः पतति। तथा च धूमैर्विहीनो वह्नि: पतति किम् ? तत्र वह्नौ धूमदोषो दर्शितः।

---

[१५] उपमानेन तत्त्वं च भेदं च वदत: पुन:।
ससन्देहं वचः स्तुत्यै ससन्देहं विदुर्यथा।। - इति भामहः ।।
**काव्यालङ्कार** (३.४३); सं. डॉ. रमणकुमार शर्मा, प्रका० विद्यानिधि दिल्ली . १९९५, पृ. ७८.
अर्थयोरतिसादृश्यात् यत्र दोलायते मनः। तमेकानेकविषयं कवयः संशयं विदुः॥
सरस्वतीकण्ठाभरणम् (४.४१); सं. डो. कामेश्वरनाथ मिश्र; प्रका० चौखम्बा ओरिएन्टालिया; वाराणसी; ई. १९९२, पृ. २०४.

[१६] स्तुत्यै संशयोक्तिः ससन्देहः॥ - इति हेमचन्द्राचार्यः ।।
**काव्यानुशासनम्** सं. रसिकलाल परिख, प्रका० श्री महावीरजैन विद्यालय मुंबई, ई. १९३८, पृ. ३८५.

[१७] सन्देहः प्रकृतेऽन्यस्य संशय: प्रतिभोत्थित:।
**साहित्यदर्पणः** (१०–३५); १, ७२८.
यस्मिन्नुतप्रेक्षितं रूपं सन्देहमेतिवस्तुनः।।
उत्प्रेक्षान्तरसद्भावाद् विच्छित्यै.........॥ १ ॥
**वक्रोक्तिजीवितम्** सं. राधेश्यामिमिश्र; प्रका० चौखम्बा विश्वभारती, वाराणसी, द्वितीयसंस्करणम् ई. १९७७, पृ. ४०१.

एवञ्चोत्तरार्धे तु 'सर्वतो विसरि धाम' स्तुतिवचनन्त्वस्त्येव। एवं कृतेऽत्र चमत्कृतिर्दृश्यते।

परं पूर्वार्धपरिवर्तनं विना वल्लभदेवेनात्र स सन्देहालङ्कारः स्फुटो न स्वीक्रियते।

ततश्च पुनस्तत्रैव वल्लभदेवेनोत्तरालङ्कारस्य सम्भावना दर्शिता। काव्यप्रकाशकारो मम्मट उत्तरालङ्कारविषये लिखति यत् श्रवणेनैव यत्र प्रश्नस्य कल्पना भवति, यत्र तत्क्षणमेवासंभाव्योत्तरमनेकप्रकारेण कल्प्यते तत्रोत्तरालङ्कारो भवति।[१८]

अलङ्कारसर्वस्वकारस्तूत्तरालङ्कारस्य व्याख्यायां लिखति यत् उत्तरेण यस्मिन् प्रश्न उद्भवति, ततः नैकवारमसंभाव्योत्तरनिरूपणमेवोत्तरालङ्कारः।[१९]

रुद्रटमते तूत्तरं श्रुत्वा प्रश्नज्ञानं वा प्रश्नं ज्ञात्वोत्तरनिरूपण-मेवोत्तरालङ्कार:।[२०]

विश्वनाथमते तु यत्रोत्तरद्वारा प्रश्नस्य कल्पना भवति। एवं पुनः पुनः भवति ततोऽशक्योत्तरकल्पनैवोत्तरालङ्कारः।[२१]

उत्तरालङ्कारव्याख्यायां प्राय: सर्वे समानमताः सन्ति। सर्वेऽपि प्रश्नद्वारा संभाव्यमुत्तरं सूचयन्ति। तथा सति पद्येऽस्मिन् यदि नायं सूर्य: नायं वह्निस्तर्हि को वाऽयं किं वेदमिति प्रश्न उद्भवत्येव। परमत्रासंभाव्यमुत्तरं नास्ति तात्पर्यं चमत्कृतिर्नास्ति। तस्मात् वल्लभदेवेनात्रोत्तरालङ्कारोऽपि स्फुटो न स्वीक्रियते।

---

[१८] प्रश्नस्योन्नयनं यत्र क्रियते, तत्र वा सति।
असकृद् यदसंभाव्यमुत्तरं स्यात् तदुत्तरम्।।
**काव्यप्रकाशः** (१०.१२१); पृ. ४२१. ९.

[१९] उत्तरात् प्रश्नोन्नयनमसकृदसंभाव्यमुत्तरं चोत्तरम् ।। - इति रुय्यकः ।।
**अलङ्कारसर्वस्वम्** सं. कुमारी एस. एस. जानकी प्रका० मेहरचन्द्रलक्ष्मणदास; दिल्ली; ई. १९६५, पृ. १९६.

[२०] यत्र ज्ञातादन्यत्पृष्टस्तत्त्वेन वक्ति तत्तुल्यम्। कार्येणानन्यसमख्यातेन तदुत्तरं ज्ञेयम्॥ इति रुद्रटः ।।
**काव्यालङ्कारः** सं. डॉ. सत्यव्रत चौधरी; प्रका० वासुदेव प्रकाशन; माडलटाउन, दिल्ली; ई. १९९५; पृ. २७७. २१.

[२१] उत्तरं प्रश्नस्योत्तरादुन्नयो यदि।
यच्चासकृदसंभाव्यं सत्यपिप्रश्न उत्तरम्॥ - इति विश्वनाथः ॥
**साहित्यदर्पण:** (१०.८२); पृ. ८४४. २२.

तृतीयकल्पनायां वल्लभदेव: ससन्देहोत्तरमिश्रणं कृत्वा सङ्करालङ्कारं स्वीकरोति। तथा च नात्र पूर्वार्धपरिवर्तनस्यापि आवश्यकता भविष्यति।

यत्रैकाधिकालङ्काराः स्वातन्त्र्येण स्पष्टा न भवन्ति तथा परस्परं चाङ्गाङ्गिभावेन तिष्ठन्ति, तादृशमलङ्कारमिश्रणमेव सङ्करालङ्कारः कथ्यते।[२२]

लेखनस्य तात्पर्यमिदमेव प्रथमं वल्लभदेवेन ससन्देहः सूचितः, परं तत्र पदपरिवर्तनमनिवार्यमासीत् । ततश्चोत्तरालङ्कारः, परं न तत्र चमत्कृतिः। एवं बहुविधां चिन्तां चिन्तयित्वाऽन्ते संदेहोत्तरालङ्कारयोः नीरक्षीरवदविभाज्यं मिश्रणं स्वीकृत्योभयोरलङ्कारयो: संकीर्णस्बरूपं मत्वा सङ्करालङ्कारं निर्बाधं स्वीकृतवान् ।

परमेतत् द्राविडप्राणायामवत् प्रयत्नसाध्यं दृश्यते। अनेकलक्षणैः कष्टसाध्यमिदं समाधानं वाचकानां सारल्येनावगतं न स्यात्।

अथ मल्लिनाथमतं प्रस्तूयते, तद् यथा - मल्लिनाथेनास्य वल्लभदेवमतस्य सम्यक् चिन्तनं कृतं स्यात्, तस्मादेव श्लोकेऽस्मिन् संदेहोत्तरालङ्काराणां कल्पनां केचित् कुर्वन्ति, तथा निर्दिष्टम्। ततः स्वयं तद्भिन्नं व्यतिरेकालङ्कारं स्वीकरोति।

काव्यप्रकाशकारस्तूपमानादुपमेयस्याधिक्यं यत्र वर्ण्यते स व्यतिरेक इति निवेदयति।[२३]

अन्यव्याख्या विलोक्यन्ते यथा -

तत्र लाक्षणिकदृष्ट्या द्वौ भेदौ स्त: तयोः 'अ' एवं 'ब' विभागयोः विभाजनं क्रियते।

(अ) (१) उपमेयस्य विशेषनिदर्शनं व्यतिरेकः इति भामहेन लिख्यते।[२४]

(२) उपमाने गुणाधिक्यवर्णनं भवति तत्र व्यतिरेक इति वामनमतम्।[२५]

(३) उपमानादुपमेयस्य गुणातिरेको व्यतिरेक इति जगन्नाथमतम्।[२६]

---

[२२] अविश्रान्ति जुषामात्मन्यङ्गाङ्गित्वं तु सङ्करः॥ - इति मम्मट: ॥

**काव्यप्रकाशः** (१०.२०८); पृ. ४४६.

[२३] उपमानाद्यदन्यस्य व्यतिरेकः स एव स: इति॥ - इति मम्मट: ॥

**काव्यप्रकाशः** (१०–१५९); पृ. ३८३. २४.

पूर्वलक्षणेषु भामहजगन्नाथावुपमेयमुपमानादुष्कृष्टं भवत्विति निवेदयतः, परं वामनस्तूपमेयादुपमानमुत्कृष्टं भवत्त्विति सूचयति।

तथा केषाञ्चित् मते तु न्यूनत्वमाधिक्यमुभयमपि स्वीकार्यम्। तदर्थं 'ब' विभागः।

(ब) (१) अलङ्कारसर्वस्वकार उपमेयोपमानमध्ये स्पष्टे भेदे विद्यमानेऽपि उपमेयस्याधिक्यमल्पत्वं यत्र भवति तत्र भवति तिरेकालङ्कारः।[२७]

(२) प्रतापरुद्रीयमते तु यत्राधिक्याल्पत्वं दर्शयित्वोपमानोपमेययोर्मध्ये भेदप्रधानसाधर्म्यमेव व्यतिरेकालङ्कारः।[२८]

(३) साहित्यदर्पणकारो विश्वनाथस्तु सूचयति यत् - उपमेयमुपमानाद् वा उपमानमुपमेयाद् यत्रोत्कृष्टं वर्ण्यते स व्यतिरेकः।[२९]

एवमत्र 'अ' विभागे उपमेयस्याधिक्यं स्वीकृतम्। तथा च 'ब' विभागे उपमानोपमेययोरुभयोरपि आधिक्याल्पत्वं स्वीकृतमिति भेदः।

अत्र मल्लिनाथेन कथमयमलङ्कारः स्वीकृतश्चेत् सूर्यस्य तेजसः वह्नेश्च तेजसो मुनेः सर्वतो विसारि तेजो वर्तते तस्मात् मुनेः तेजस आधिक्यवर्णनात् व्यतिरेकालङ्कारः स्वीकारः।

---

[२४] उपमानवतोऽर्थस्य यद्विशेषनिदर्शनम्। व्यतिरेकं तमिच्छन्ति विशेषापादनाद्यथा॥ - इति भामहः ॥
**काव्यालङ्कारः** (२–७५); सं. डॉ. रमणकुमार शर्मा; प्रका० विद्यानिधिः दिल्ली; १९९५: पृ. ६८.

[२५] उपमानस्य गुणातिरेकित्वं व्यतिरेकः ॥ - इति वामनः ॥
**काव्यालङ्कारसूत्रवृत्तिः**; सं. केदारनाथ शर्मा, प्रका० चौखम्बा अमरभारती प्रकाशन; वाराणसी; ई. १९७७; पृ. ६२. २६.

[२६] उपमानादुपमेयस्य गुणविशेषवत्वेन उत्कर्षो व्यतिरेकः॥ - इति जगन्नाथः ।।
**रसगंगाधरः** सं. नगीनदासपारेख; प्रका० युनिवर्सिटी ग्रन्थनिर्माणबॉर्ड, गुजरात राज्य, अहमदाबाद; ई. १९७६; पृ. ५३९.

[२७] भेदप्राधान्ये उपमानोपमेयस्य आधिक्ये विपर्यये वा व्यतिरेकः। - इति रुय्यकः ।।
**अलङ्कारसर्वस्वम्** पृ. ९३.।

[२८] भेदप्रधानसाधर्म्यमुपमानोपमेययोः। आधिक्याल्पकथनात् व्यतिरेकः स उच्यते।
**प्रतापरुद्रीयः** सं. डॉ. वे. राघवार्य; प्रका० मद्रपुरी संस्कृतविद्या समिति सचिवैः श्री ति. वे. द्यानाथाचार्यैः प्रकासितम् १४ पूर्वमाऽवीवीथी; मद्रास; ई. १९७०; पृ. २९३.

[२९] आधिक्यमुपमेयस्योपमानान्न्यूनता अथवा।। - इति विश्वनाथः ॥
**साहित्यदर्पणः** (१०.५१); पृ. ७६९.

एवं मल्लिनाथस्यालङ्कारविवेचनं सरलं सहजं च दृश्यते, तथा वाचकानामपि कष्टविरहेण साध्यमिति भावः।

अत्रैव वल्लभदेवः 'ईक्षितम्' इति मुनिविशेषणं 'मुनिं ददर्श' इत्यनेनान्वयं कर्तुं यतते। परं मल्लिनाथेन 'जनैः आकुलमीक्षितम्' इत्यन्वयं कृत्वा वाक्यं पूर्णतां नीतम् । तत्रापि मल्लिनाथस्य सारल्यं दृश्यते।[३०]

अन्ते चेदं स्पष्टं यत् ससन्देहलङ्कारात् उत्तरालङ्काराच्च व्यतिरेकालङ्कारः सरलतया साध्य: सुस्पष्टश्च।

**चयस्त्विषामित्यवधारितं पुरा तत: शरीरीति विभाविताकृतिम्।**
**विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि सः।।(१-३)**

श्लोकस्यास्य सरलार्थोऽयं यथा - विभुः हरिः प्रथमं दीप्तीनां पुञ्जः, ततः शरीरी, ततश्च अयं नारद इति बुद्धवान्।

वल्लभदेवमल्लिनाथयोः श्लोकेऽस्मिन् समाना चर्चा यद्यपि विशेषतः 'विभुः' नारद इत्यबोधि इति वाक्यस्योपरि चर्चा कृता। सामान्यरूपेण वाक्यस्यास्य 'नारद' कर्म तथा च कर्मणि द्वितीया विभक्तिर्भवति, तर्हि अत्र 'विभुः नारदम् अबोधि' कस्मादित्थं न ? अयमेव चर्चायाः विषयः।

तत्र वल्लभदेवेन लिख्यते यत् 'इति' शब्द: सर्वत्र प्रातिपदिकार्थमात्रत्व-व्यवस्थापनार्थ:। तथा च प्रातिपदिकार्थस्य प्रथमा विभक्तिरेव भवति।[३१] तथा च यदि 'नारदमित्यबोधि' एवं लिख्यते तर्हि नारदस्य कर्मभावस्तु भविष्यति, परं कवेर्भावः स्पष्टो न भविष्यति।[३२] कवे- र्भावस्त्वयं यथा क्रमानुसारं शनै: शनै:

---

[३०] ईक्षितम् - ईक्षितमिति निष्ठया कर्मण्यभिहिते पूर्वक्रियापेक्षया द्वितीया॥ - इति वल्लभदेवः ।।
**शिशुपालवधम्** सैव श्रीनगरस्यावृत्तिः पृ. ३. अविवक्षिते कर्मणि भावे क्तः। केचित् कर्मणि क्तान्तं कृत्वा ईक्षितं मुनिं ददर्शेति योजयन्ति॥ - इति मल्लिनाथः ॥
**शिशुपालवधम्** निर्णयसागरप्रेस; पृ. २/३. ३१.

[३१] प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा। २/३/४६ ॥
**सिद्धान्तकौमुदी** सं. वासुदेव शर्मा; प्रका० तुकाराम जवाजी, निर्णयसागर, मुंबई, ई. १९९०; सप्तमसंस्करणम्, पृ. ५१.

[३२] यदि हि नारदमित्यबोधि इत्युच्यते तथा सति धर्मान्तरयोगे नारदस्य कर्मभावः प्रतीयेत, नारदत्वेनाऽबुधेत्ययं त्वर्थो न गम्येत॥ - इति वल्लभदेवः ॥
**शिशुपालवधम्** सैव श्रीनगरस्यावृत्तिः पृ. ४.

नारदत्वेन ज्ञातवानिति। तस्मात् कारणात् प्रातिपदिकार्थग्रहणं, तथा सति नारदस्य द्वितीया विभक्तिः। अत्र वल्लभदेवो लिखति यत् प्रथमाऽपि भवितुमर्हति, किन्तु द्वितीया विभक्तिर्योग्या, कारणं तत्र अर्थौचित्यम्।

परं मल्लिनाथस्तुर लिखति यत् यदि नारदस्य कर्मभावोऽपि भवति तर्हि तत्र द्वितीया विभक्तिर्भवितुं नार्हति।[३३] तत्र कर्मत्वेऽपि इव शब्दो निपातः, तस्मात् प्रथमा विभक्तिरेव भविष्यति। तत्र स्वमतं दृढीकर्तुं तेन वामनमतं स्वीकृत्य लिखितं यत् वामनेनापि यदा कर्म निपातेन प्रोक्तं भवति तदा तत्कर्म उच्यते, किन्तु तत्र कर्म विभक्तिर्न भवति। अर्थात् द्वितीया न भवति। अतो यदि नारदस्य कर्मत्वेन गणना क्रियेत तथापि द्वितीया विभक्तिस्तु नैव भविष्यति।

अनयोश्चर्चयोरेवंविधो निष्कर्षो यथा वल्लभदेवः इति शब्दमाश्रित्य निपातत्वात् प्रातिपदिकार्थस्य द्वितीया न भवतीति निवेदयति, परं 'विभुः नारदम्मिति अबोधि' इत्यपि भवितुमर्हति। किन्तु तत्र क्रमानुसारे नारदत्वस्य नारदत्वेन ज्ञानं तन्न भवत्यतो द्वितीयां विहाय प्रथमा विभक्तिर्योग्या। परं तेन लिख्यते यदि 'नारद' इत्यस्य कर्म क्रियते, तदानीं द्वितीया विभक्तिर्भवेत्, किन्तु नेदं प्रसङ्गानुरूपमतः तथा न। परं मल्लिनाथस्तु कथयति इति निपातेन प्रातिपदिकार्थत्वात् द्वितीया न भवेत्। किन्तु यदि कर्म गण्यते तथापि द्वितीया तु नैव भवेदिति भावः।

गुजरातराज्यस्य पण्डितप्रवरेण श्रीबालकृष्णपञ्चोलिमहोदयेनापि वैयाकरण सिद्धान्तकौमुदीटीकायां कारकप्रकरणे 'कर्मणि द्वितीया' सूत्रचर्चायामिदमेवोदाहरणं दत्त्वा लिखितं यत् इति निपातत्वात् 'नारद' इत्यत्र कर्मसंज्ञा न जाता।[३४]

---

[३३] नारदस्य कर्मत्वेऽपि निपातशब्देनाभिहितत्वान्न द्वितीया, तिङामुपसंख्यानस्योपलक्षणत्वात् । यथाह वामनः- निपातेनाभिहिते कर्मणि न कर्म विभक्तिः॥
- इति मल्लिनाथः।।
**शिशुपालवधम्** निर्णयसागरप्रेस; पृ. ३.

[३४] 'क्रमादमुं नारद इत्यबोधि सः' इस प्रकार गुजरात प्रान्त के कविवर माघ कवि की रचना में ज्ञानाश्रय नारद की कर्मसंज्ञा न हुई इति निपात से कर्म अर्थ उक्त है।
**वैयाकरणसिद्धान्तकौमुदी** सं. श्रीबालकृष्णपंचोलीजी; प्रका० चौखम्भा विद्याभवन; चौखम्भा; पृ. २७२,

**दधानमम्भोरुहकेसरद्युतीर्जटाः शरच्चन्द्रमरीचिरोचिषम्।**
**विपाकपिङ्गास्तुहिनस्थलीरुहो धराधरेन्द्रं व्रततीततीरिव।।(१-५)**

पद्येऽस्मिन् नारदवर्णनं वर्तते हरिः नारदं ददर्श। कीदृशं नारदं ददर्श ? नारदः स्वयं श्वेत: जटाश्च पीतवर्णाः, अतः परिपक्कत्वात् पीतवर्णं प्राप्ताः लताः धारयन्तं हिमालयमिव तं ददर्श। अत्र 'तुहिनस्थलीरुहः' 'व्रततीतती: इत्यस्य विशेषणमस्ति। किन्त्वत्र वल्लभदेवो लिखति हिमभूमौ लतोद्भवः कथं शक्यः ? यदि शक्यश्चेत् तत्स्थितिः कथं सम्भवेत् ? तत्रोत्तरं ददाति विषकीटकन्यायेन तत्स्थितिर्भवितुमर्हति, यथा विषोत्पन्नाः कीटा विषमेव पीत्वा जीवन्ति। यत्पीत्वाऽन्ये मृत्युं प्राप्नुवन्ति, तदेव पीत्वा ते जीवन्ति, तथैव तुहिनस्थल्युत्पन्नाः लता अपि स्वस्थितिं रक्षन्ति । एवम्प्रकारेणात्र शब्दार्थविरोधस्य समाधानं समीचीनमस्ति। अन्यच्च वल्लभदेव: 'धराधरेन्द्रम्' इत्यत्र द्वितीयां विवेचयन् कारणसामान्यं दर्शयति। यथा - न हि भिन्नविभक्तिकयोरौपम्यं घटते। अत: द्वितीया विभक्ति:। किन्तु केचन तद्दर्शन- क्रियापेक्षतामेवमाहुः, यथा कश्चिदेवंविधं नगेन्द्रं पश्यति, एवमसौ कृष्ण: नारदं ददर्श। परं प्रथमं समाधानं युक्तियुक्तं भाति। मल्लिनाथस्तु श्लोकस्यास्य केवलं सामान्यार्थमेवालिखत्।

**पिशङ्गमौञ्जीयुजमर्जुनच्छविं वसानमेणाजिनमञ्जनद्युति:।**
**सुवर्णसूत्राकलिताधराम्बरां विडम्बयन्तं शितिवाससस्तनुम्॥(१-६)**

अस्मिन् श्लोकेऽपि 'अर्जुनच्छविम्' अर्थात् श्वेतवर्णं नारदं ददर्श इत्येव वर्णयति।

तामेनां पुनरुक्तिं निवेदयन् वल्लभदेवो लिखति, यथा यदि सूत्ररचना क्रियते तदानीं लाघवमपेक्षितं भवति।[३५] किन्तु यदा कविता कवितां करोति तदा नायं नियम:। एवमत्र मल्लिनाथो वसानमित्यस्यार्थं लिखति 'वसानमाच्छादयन्तम्' वल्लभदेवस्तु परिधानमित्यर्थं दर्शयति। यद्यपि नानयोर्मध्ये भूयान्भेद:। तथापि

---

[३५] लघ्वर्थं चाध्येयं व्याकरणं 'ब्राह्मणेनावश्यं शब्दा ज्ञेयाः' इति। न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्या ज्ञातुम्।
**व्याकरणमहाभाष्यम्** (पस्पशाह्निकम्); सं. श्रीपंडित युधिष्ठिरमीमांसक का चौखम्बा विद्याभवन, वाराणसी; ई. १९६७, पृ. २०.

मल्लिनाथो धात्वर्थं निवेदयति, यत् वसुधातोः आच्छादनार्थे प्रयोगो भवति,[३६] समाजे तु वसुधातुर्निवासहेतवे प्रसिद्धः। तथा च श्लोकेऽस्मिन् 'आर्थीयमुपमा' इति अलङ्कारोऽपि दर्शितः।[३७]

आर्थ्युपमायां 'तुल्य' समानाद्यौपम्यवाचकपदानि अथवा तुल्यार्थकः 'वति' प्रत्ययः, एभिः सादृश्यं ज्ञायते। अथवाऽर्थानुसन्धानेन सादृश्यस्य प्रतीतिर्भवति। पूर्वश्लोकेऽपि 'विडम्बयन्तम्' पदेनार्थानुसंधाने न चोपमालङ्कारो ज्ञायते। तस्मादत्रार्थ्यमुपमा, वचः सार्थकं स्पष्टञ्च।

**विहङ्गराजाङ्गरुहैरिवायतैर्हिरण्मयोर्वीरुहवल्लितन्तुभिः।**
**कृतोपवीतं हिमशुभ्रमुच्चकैर्घनं घनान्ते तडितां गणैरिव।।(२-७)**

अस्मिन् पद्येऽपि नारदमुनेर्वर्णनम् वर्तते। नारदः शुभ्रः, तेन धृतमुपवीतं सुवर्णत्वात् पीतं, तस्मात् स विद्युल्लेखायुक्तो मेघ इव शोभां दधार। अत्र यदा श्लोकमेनं वाचकाः पठन्ति तदा शङ्काद्वयं मनस्युत्पद्यते। प्रथमेयं शङ्का यदुपवीतस्य तन्तूनां तुलना विहङ्गराजाङ्गरुहैः सह कस्मात् कृता? अन्येयं शङ्का, यथा - निर्गतजला एव मेघाश्शुभ्रा भवन्त्यतस्तत्र विद्युत्सञ्चारो भवेत् ? एतद्वैषम्यमाश्रित्य मनः एनां कल्पनां स्पष्टतया न गृह्णाति।

पूर्वलिखितप्रश्नद्वयं वाचकानां मनसि स्यादेवैवमवधार्य वल्लभदेवः शङ्कां दूरीकर्तुं यतते। तत्र तेन लिख्यते। गरुडस्याङ्गरुहाः सौवर्णा भवन्ति, अतः तन्तुभिः सह तुलना योग्या, परं न कुत्रापि चित्रेषु कथासु च कथनमेतत्ख्यातिं प्राप्तम्, अतो यदि कुत्रचित् गरुडस्य वर्णनं भवति तर्हि तस्मात्प्रमाणमुद्धृत्य लिखितं भवति तर्हि साधु।[३८] अन्यत् तेनेदमपि लिखितं यन्मेघा भवन्तु नाम निर्जलाः, परं तत्र विद्युत्सञ्चारो भवत्येव।

---

[३६] 'वस आच्छादने' इति धातोः शानच्।। - इति मल्लिनाथः ॥
**शिशुपालवधम्** (१.६); निर्णयसागरप्रेस; पृ. ४. ३७.

[३७] श्रौती यथेववाशब्दा इवार्थो वा वतिर्यदा। अथ तुल्यसमानाद्यास्तुल्यार्थी यत्र वा वतिः॥
**साहित्यदर्पणः** (१०.१६); पृ. ६१४.

[३८] यथा चाष्टमे श्लोके - इन्द्रवाहनमैरावतः सोऽपि शुक्लः कुथोऽपि चित्रसूक्ष्मरोमा सिताङ्गसङ्गी ।
**शिशुपालवधम्** सैव श्रीनगरस्यावृत्तिः; पृ. ७.

अत्र मल्लिनाथेन लिख्यते यत् गरुडाङ्गरुहा दीर्घा: भवन्त्यतस्तन्तुभिस्सह तुलना कृता, एवञ्च सुवर्णस्थललतातन्तुभिस्सह तुलना यज्ञोपवीतस्य पीतवर्णत्वात्।

श्लोकेऽस्मिन्नुत्प्रेक्षालङ्कारोऽतो दीर्घता तथा च पीतवर्णत्वं यद्युभयं गरुडाङ्गरुहे सम्मिलितं कल्प्यते तदा सरलतयार्थप्राप्तिर्भवति, मल्लिनाथस्य कल्पनायां द्रविडप्राणायामन्यायेन काठिन्यं दृश्यते।

अत्र मल्लिनाथापेक्षया वल्लभदेवस्यार्थचिन्तनं विशेषं व्यावहारिकं समीचीनञ्च वर्तते। वल्लभदेवस्य व्याख्ययाऽर्थग्रहणे या बाधा भवन्ति, शङ्का वा भवन्ति तत्समाधानं तत्रैव प्राप्यते।

**नवानधोऽधो बृहतः पयोधरान्समूढकर्पूरपरागपाण्डुरम्।**
**क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना स्फुटोपमं भूतिसितेन शम्भुना।।(१-४)**

श्लोकेऽस्मन् गौरवर्णयुक्तस्य नारदमुने: जलधरमध्ये स्थिति: स्वयं श्वेत:, मेघा: कृष्णाः, अतः स नारद उत्सवसमये स्वल्पकालपर्यन्तं गजचर्म धारयता शम्भुना तुल्योऽदृश्यत।

अत्र वल्लभदेवो गजचर्म भगवता कस्माद् धृतमिति पुराणसन्दर्भमाह यथा शिवपुराणे कथेयं वर्तते। गजासुरः स रक्तबीजवदेवाऽऽसीत्।[३९] स केनचित् मारितोऽपि चर्मणो भूमिस्पर्शेन पुनर्जीवितोऽभवत्। अतस्तं नितान्तं हन्तुं भगवता तस्य चर्म शरीरे धृतम्। तत् चर्म कृष्णं चन्द्रशेखरश्च श्वेत:, अतो नारदोऽपि नटराजतुल्योऽलक्ष्यत।

अत्र भगवतः शम्भो: कस्मात् तृतीयाविभक्तिरिति चर्चा। तत्र करणे तृतीया शम्भुना सह स्फुटोपममिति सहार्थे तृतीया वा शम्भुनेति तुल्यार्थैरिति तृतीया। तत्र प्रथमं मतं वल्लभदेवस्य द्वितीयं तृतीयञ्च मतमन्येषाम्। अत्र नारदस्य शम्भुना सह तुलनैव दर्शिता, तस्मात् वल्लभदेवमतमेव युक्तियुक्तं दृश्यते।

---

[३९] श्रीदुर्गासप्तसत्यां रक्तबीजनामकोऽसुरः सोऽपि गजासुरवदेव आसीत्। अस्य रक्तबिन्दुर्भूमौ पतति ततः पुनः जीवति। अनन्तरं देव्या रक्तपानं कृत्वा मारितः। रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरतः।
समुत्पतति मेदिन्यां तत्प्रमाणस्तदासुरः।

**श्रीदुर्गासप्तशती** (८-४१); सं.---------- प्रका० गीताप्रेस; गोरखपुर, संवत् २०५२; पृ. १२२. ४१.

मल्लिनाथोऽप्यत्र सादृश्यवाचित्वे तृतीयामाह। तेन सूत्रनिर्देशः कृतः इति विशेष:।[४०]

**निवर्त्य सोऽनुव्रजत: कृतानतीनतीन्द्रियज्ञाननिधिर्नभ:सद:।**
**समासदत् सादितदैत्यसम्पद: पदं महेन्द्रालयचारु चक्रिण:।।(१-११)**

श्लोकस्यास्य सामान्यार्थस्तु नारदः कृष्णभवनं प्राप्तः। भारतीयसंस्कृत्यनुसारं यदा कश्चिद् गच्छति तदा स्निग्धजनाः तमनुव्रजन्ति।[४१] तर्हि अनुव्रजतो देवान् निवर्त्य नारद: कृष्णभवनं प्राप्तः। ते देवाः कीदृशा आसन्, तर्हि यै: नारदो नमस्कृतस्तादृशास्ते आसन्। अत्र देवानामपि नारदमुनेः कृते नमस्क्रिया कस्मात् ? तत्र वल्लभदेव एकं कारणन्तु श्लोकगतमेव स्पष्टीकरोति। यथा नारदमुनिरतीन्द्रियज्ञाननिधिरासीत्। अतः कविर्नारदस्य योग्यतां दर्शयति। किन्तु वल्लभदेवो देवानामपि महत्त्वं प्रतिपादयन् कथयति। विनम्रः ज्ञानी नतमस्तको भवति। तादृशश्शास्त्रनिहितस्समाजदृष्टश्चाचारो वर्तते।[४२] अनेन ज्ञायते यत् पात्रतां विनाऽऽदरो न भवति, किन्तु पात्रतां विनाऽऽदरो न प्राप्यते नो दीयते चेत्युभयपक्षगतोऽयमाचारो वल्लभदेवेन दर्शित:। अर्थविषयेऽपि किञ्चित्कथनीयं भवति। तद्यथा – 'अतीन्द्रियज्ञानम्' एतस्यार्थो मल्लिनाथेन इन्द्रियाण्यतिक्रम्य स्थितानां देशकालादीनां सर्वेषामपि ग्रहणं कृतमतस्तत्र नारदमुनेर्देवेभ्यो विशिष्टा योग्यता दर्शिता।[४३]

---

[४०] सदृशपर्यायियोस्तुलोपमाशब्दयो अतुलोपमाभ्यां - इति निषेधात् सादृश्यवाचित्वे तृतीयामाहुः ॥ - इति मल्लिनाथः ।। **शिशुपालवधम्** निर्णयसागरप्रेस; पृ. ४.

[४१] ओदकान्तं स्निग्धजनोऽनुगन्तव्य इति श्रूयते।
**अभिज्ञानशाकुन्तलम्** सं. नारायणराम आचार्य; प्रका० निर्णयसागर प्रेस; मुंबई, ई १९५८; पृ. ३४५. ४३.

[४२] अनुज्ञातो हि शिरो नमयतीत्यापारः॥ - इति वलभदेव: ॥
**शिशुपालवधम्** सैव श्रीनगरस्यावृत्तिः पृ. ९. ४४.

[४३] अतीन्द्रिया इन्द्रियमतिक्रान्ता देशकालस्वरूपाद्विप्रकृष्टार्थाः तेषां ज्ञानम् ॥ - इति मल्लिनाथः ॥
**शिशुपालवधम्** निर्णयसागरप्रेस, पृ. ६.

अलङ्कारविषये यत्र वल्लभदेवो मौनमाश्रित्य स्थितस्तत्र मल्लिनाथेन लिख्यते।[४४] 'नतीनती' 'पद: पद' मिति च शब्दा द्विवारं लिखिताः। अतस्तत्र छेकानुप्रासो[४५]ङ्लङ्कारोऽन्यत्र वृत्यनुप्रासो ज्ञातव्यः।[४६] एवमत्र श्लोकेऽनयो: छेकानुप्रासवृत्यनुप्रासयोः संसृष्टि:। यत्रानेकेऽलङ्कारा एकस्मिन्नेव पद्ये भवन्ति तदा संसृष्ट्यलङ्कारो भवति। अनेकशब्दालंकाराश्चेकोऽर्थालङ्कारोऽतः द्वाप्युभौ भिन्नौ प्रतीयेते तस्मात् संसृष्टिः।

अन्यच्च 'सादितदैत्यसम्पद:' कृष्णस्येति भगवत: कृष्णस्य विशेषणेन भविष्यत्काले शिशुपालवधो निश्चयेन भविष्यति च नारदमुने: कार्यसिद्धिरवश्यं भविष्यतीत्यर्थो वल्भदेवेन विशेषतश्चिन्तित:। तथैव 'नभ:सद' इत्यत्र कवितुः शब्दार्थसिद्धिं दर्शयन् मल्लिनाथो लिखति 'नभसि सीदन्तीति नभःसदः' अत्र 'सीदन्ति' पदस्य गच्छन्तीत्यर्थो दर्शित:। नभसि नारदमनुव्रजतां देवानां कृते 'नभ:सदः' शब्दोऽयं चरितार्थः।

**स तप्तकार्तस्वरभास्वराम्बरः कठोरताराधिपलाञ्छनच्छविः।**
**विदिद्युते वाडवजातवेदसः शिखाभिराश्लिष्ट इवाम्भसां निधिः।।(१-२०)**

पद्येऽस्मिन् कविर्भगवत: श्रीकृष्णस्य शोभां वर्णयति। यथा – भगवता धृतं पीताम्बरं तापेन तप्तं सुवर्णमिवासीत्, एवञ्च स्वस्य पूर्णचन्द्रस्य लक्ष्मणतुल्यं तेजः आसीत्। अतो वाडवाग्निशिखाभिर्युक्तेन सागरेण तुल्यो भगवान् श्रीकृष्णोऽदृश्यतेति भावः।

अत्रोपमाऽलङ्कारो वल्लभदेवेन कथ्यते। अत्र पूर्वाधे लुप्तोमम‍ाद्वयं यतस्तुलनासूचक- शब्दोऽध्या हृतो वर्तते। उत्तरार्धे तु वाडवजातवेदसः शिखाभिराष्लिष्टोऽम्भसां निधिरिव विदिद्युते। इत्यत्र श्रौत्युपमा कारणं 'यथा इव '

---

[४४] अत्र नतीनती पद: पदमिति च द्वयोर्व्यञ्जनयुग्मयोरसकृदावृत्या छेकानुप्रासः।
अन्यत्र वृत्यनुप्रास इत्यनयोः संसृष्टिः॥ - इति मल्लिनाथः ।।
**शिशुपालवधम्** निर्णयसागर प्रेस; पृ. ६. ४६.

[४५] छेको व्यञ्जनसङ्गस्य सकृत्साम्यमनेकधा॥
**साहित्यदर्पणः** (१०.३); पृ. ६६७.

[४६] अनेकस्यैकधा साम्यमसकृद्वाप्यनेकधा।
एकस्य सकृदप्येष वृत्यनुप्रास उच्यते॥
**साहित्यदर्पण:** (१०.४); पृ. ६६८.

इमे शब्दा येन सह यान्ति तस्योपमानप्रतीतिर्भवति।[47] तस्मात् ते सर्वे शब्दा: विशेषणरूपा उपमानस्य भवन्ति, तथापि शब्दशक्तिप्रभावेण श्रुतिपथमागतास्ते षष्ठीविभक्तिवत् सम्बन्धस्य प्रतिपादनं कुर्वन्ति, तस्मात् सा श्रौत्युपमा कथ्यते। एतदेव स्वीकृत्य वल्लभदेवेनात्रोपमालङ्कार: स्वीकृत: स्यात्। यद्यपि पद्येऽस्मिन्नुपमालङ्कारस्तु स्फुट एव वर्तते। तथापि वल्लभदेवेनात्र निर्देश: कृत:।

तद्यथा - भगवतः पीताम्बरस्य कृते उपमानद्वयम् वर्तते। एकं तप्तसुवर्णं वाडवाग्निशिखाश्च, भगवतः श्रीकृष्णस्य कृते पूर्णचन्द्रलक्ष्म तथा च सागरः। अत्र पूर्वार्धे लुप्तोपमाद्वयमपि समीचीनमस्ति। किन्तूत्तरार्धे वाडवाग्निशिखाभिराश्लिष्टः सागरः कीदृशो भवेदिति स कल्पनीयो भवति। यतो हि सुवर्णन्तु सामान्यजनैर्विलोकितपूर्वं भवति, चन्द्रलक्ष्मापि तत्क्षणमेव ज्ञायते, परन्तु दृष्टपूर्वोऽपि सागरो वाडवाग्निशिखाभि: आश्लिष्ट: स्यादिति कदापि केनापि न दृष्टः। अदृष्टपूर्वोऽयं सागरस्तस्माद् वल्लभदेवोऽत्र समीक्षां करोति[48] यदलङ्कारविदो विद्वांस एतादृशमुपमानं नाङ्गीकुर्वन्ति। तत्र प्रमाणन्तु तदेव यत् प्राय: सर्वत्रालङ्कारचर्चाचतुरस्तत्रभवान् मल्लिनाथो यद्यपि श्लोकेऽस्मिन्नलङ्कारस्य स्फुटत्वेपि मौनं सेवते। तत्र कारणं न ज्ञायते, परन्तु वल्लभदेवस्य पूर्वोक्तामालोचनां पठित्वेत्थं प्रतीयते यत् श्लोकेऽस्मिन् माघस्योपमा कल्पनातीतकल्पनां कृत्वा कृष्णं निरूपयति, अतः तादृश्युपमा कष्टेन स्वीकार्या भवति।

अत्रापि विलोक्यते यत् वल्लभदेवेन यथाशक्यं भवति तथाऽर्थस्य स्पष्टता क्रियते। तथा च तस्यार्थचिन्तनं गहनमित्यपि ज्ञातुं शक्यते।

**युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकासमासत।**
**तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसम्भवा मुदः॥(१-२३)**

---

[47] यथेववादिशब्दा यत्परास्तस्यैवोपमानता प्रतीतिरिरिति यद्युप्युपमानविशेषणान्येते, तथापि शब्दशक्तिमहिम्ना श्रुत्यैव षष्ठीवत् सम्बन्धं प्रतिपादयन्तीति तत्सद्भावे श्रौती उपमा। तथैव 'तत्र तस्यैव' इत्यनेनेवार्थे विहितस्य वतेरुपादाने।

**काव्यप्रकाशः** (१०.८७); पृ. ३३७.

[48] एवंविधं चोपमानमसिद्धत्वादलङ्कारविद्भिर्नेष्यते॥ - इति वल्लभदेव: ॥
**शिशुपालवधम्** सैव श्रीनगरस्यावृत्ति: पृ. १३.

प्रथमं तावदस्य पद्यस्यार्थ: प्रस्तूयते। यथा - भगवतः श्रीकृष्णस्य यस्मिन् शरीरे सप्तलोकव्याप्तं विश्वं संहारावसरे तिष्ठति तादृशे विशाले वा संग्रहसमर्थे तच्छरीरे नारदस्यागमनेन य आनन्दो जात: स तदवकाशमतीत: तात्पर्यमतीवानन्दो जात इति।

अत्रालङ्कारविषये विभिन्नमतौ वल्लभदेवमल्लिनाथौ स्त:। कारणम् एकेनात्राधिकालङ्कारः कथ्यते। तर्हि अन्येनात्र अतिशयोक्त्यलङ्कारो निवेद्यते।

आदौ वल्लभदेवमतं विवेच्यते। श्रीमता वल्लभदेवेन प्राय: तत्रैवालङ्कारचर्चा क्रियते यत्र विशेषतया चिन्तनीयं स्यात्। अत्र वल्लभदेवेन 'अधिकालङ्कारः' सूचित:। अधिकालङ्कारस्तत्र भवति, यत्राधाराधेयो: कस्यचिदप्येकस्याधिक्यं भवति।[४९] अत्र भगवान् श्रीकृष्ण आनन्दस्याधारो वर्तते, परं हर्षस्त्वाधेयभूत:, आधाराचर्चाधिको वर्तते। अतो यथालक्षणमाधिकालङ्कारो भवितुमर्हति।

मल्लिनाथेन लिख्यते[५०] यदत्र कविप्रौढोक्तिसिद्धाऽतिशयोक्तिरस्ति।[५१] हर्षस्य स्थूलस्वरूपं न भवति, तस्य च स्थानमन्त:करणमिति सर्वै कविभिरेव निश्चितम्, अतोऽत्रेयं कविप्रौढोक्तिः। एवञ्च हर्षो ह्रदये न स्थित इति तु सत्यमेव। तथा च हर्षस्य स्थानमन्त:करणं तस्यानन्दस्य सम्बन्धोऽन्त:करणेन सह वर्तते, परं

---

[४९] आश्रयाश्रयणोरेकस्याधिक्येऽधिकमुच्यते।।

**साहित्यदर्पणः** (१०-७१); पृ. ८२८.

आधिक्यं विपुलाधारादाधेयस्य तु वर्ण्यते।
अधिकालङ्कृतिस्तत्र विज्ञेया काव्यवित्तमैः॥ ६७ ।।
आधेयाद्विपुलाद्यत्राधिकरणाधिक्यवर्णनम्।
तत्रापि विबुधैरन्याधिकालङ्कृतिरिष्यते॥ ६८ ।।

**अलङ्कारमञ्जूषा** सं. सदाशिव लक्ष्मीधर, प्रका० उज्जैन ओरिएन्टललाईब्रेरी, ई. १९४०, पृ. १३९/१४०, ५१.

[५०] कविप्रौढोक्तिसिद्धातिशयेन स्वतः सिद्धस्याभेदेनाध्यवसितातिशयोक्तिः। सा च मुदामन्तः सम्बन्धेऽप्यसम्बन्धोक्त्या सम्बन्धासम्बन्धरूपा॥ - इति मल्लिनाथः ।।

**शिशुपालवधम्** निर्णयसागर प्रेस; पृ. १०. ५२.

[५१] भेदेऽप्यभेदः सम्बन्धेऽसम्बन्धसद्विपर्ययौ।
पौर्वापर्यात्मकः कार्यहेतोः सा पञ्चधा ततः॥

**साहित्यदर्पणः** (१०-४६); पृ. ७५३.

कविना लिख्यते 'मुद:' न ममु:। अर्थात् आनन्दस्यान्तः करणेन सह सम्बन्धाभावो निरूपित:। एवं सम्बन्धे सत्यसम्बन्धो दर्शितोऽतः सम्बन्धासम्बन्धरूपेय-मतिशयोक्तिरिति मल्लिनाथमतम्।

अत्राधिकालङ्कारस्तु स्पष्टः परमतिशयोक्तिस्तु बहुविधां कल्पनां कृत्वा सिद्ध्यति, तस्मादधिक एव योग्य: तन्मतं पुष्टं करोति दर्पणकारो विश्वनाथ:, कारणं तेनापि अधिकालङ्कारं स्पष्टं कर्तुमयमेव श्लोक उदाहृत:। अत: यावच्छक्यं सारल्यं प्रथमं ग्राह्यं भवति, तत्रापि स्पष्टता भवति तर्हि तत्रैव प्राथम्यं युक्तियुक्तम्। कारणं यथा "अक्के चेद् मधु चिन्देत किमर्थं पर्वतं व्रजेत्"।

**कृतः प्रजाक्षेमकृता प्रजासृजा सुपात्रनिक्षेपनिराकुलात्मना।**
**सदोपयोगेऽपि गुरुस्त्वमक्षयो निधिः श्रुतीनां धनसम्पदामिव।।(१-२८)**

शक्रसन्देशं दातुमागतं नारदमुनिं विलोक्य भगवान् श्रीकृष्णस्तस्य ज्ञानस्य प्रशंसां कुर्वन् वदति यत् प्रजानां कल्याणहेतवे भगवता ब्रह्मणा त्वं निधि: कृतः। शिष्यप्रशिष्यादिभ्यो ज्ञानदानं कुर्वन्नपि त्वमक्षयो निधिः वर्तसे।[५२] यथा कश्चित् स्वीयं धनं कटाहादिदृढभाजने संस्थाप्य स्वस्थो भवति, तथैव ब्रह्मापि साम्प्रतं त्वयि वेदानां ज्ञानधनं संस्थाप्य निश्चिन्तो वर्तत इति भावः।

अत्रार्थश्चिन्तनीयो वर्तते। तत्रादौ वल्लभदेवकृतोऽर्थो विचार्यते। यथा-ब्रह्मणा त्वं नारदो वेदानां निधि: कृत:। निधिरित्यस्यार्थो यत्रास्माभि: किञ्चित् स्थाप्यते स निधिरुच्यते।[५३] विना वेदैः जनानां कल्याणं न भवेदतः प्रजाक्षेमकृता ब्रह्मणा वेदज्ञानधनं त्वयि स्थापितम्। प्रजासृजा इत्यस्यार्थो वल्लभदेवेन 'राष्ट्रहितकृत् राजा' इति कृतः।[५४] यथा कश्चित् राजाऽलुब्धे जने धनराशिं निक्षिप्य स्वयं निश्चिन्तो भवति, तथैव निश्चिन्तो जातः।

---

[५२] अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्।। **सुभाषितरत्नभाण्डागरम्** सं. नारायणराम आचार्य; प्रका० निर्णयसागरप्रेस; मुंबई; अष्टमसंस्करणम्; ई. १९५२; पृ. २९.

[५३] निधीयन्ते अस्मिन् इति निधिः ॥ - इति वल्लभदेवः ॥
**शिशुपालवधम्** सैव श्रीनगरस्यावृत्ति:; पृ. २७.

[५४] यो हि प्रजासृट् राष्ट्रहितकृत् राजा स धनसम्पदां निधिं करोति।। - इति वल्लभदेवः ॥
**शिशुपालवधम्** सैव श्रीनगरस्यावृत्ति:; पृ. १७.

मल्लिनाथेन श्लेषालङ्कारमाश्रित्यास्य श्लोकस्यार्थ इत्थं कृत: ब्रह्मणा जनकल्याणं विचिन्त्य त्वं वेदानां शिष्यादिभ्यो दाने कृतेऽप्यक्षयो निधि: कृत:। यथा कश्चन कटाहादिसुपात्रेषु धनसम्पत्तिं संस्थाप्य निश्चिन्तो भवति, तथैव सोऽपि निश्चिन्तो जातः।

मल्लिनाथेनात्र 'श्लेषालङ्कार' इति लिखितम्।[५५] अतोऽर्थद्वयेन भवितव्यमिति स्वाभाविकम्। अतो मल्लिनाथेन 'प्रजासृट्' इत्यस्यार्थः "ब्रह्मा एवञ्च पिता" सुपात्रस्यार्थ: 'कटाहादिपात्रम्' एवञ्च 'योग्य:' कृत:।[५६] अतो यथा कश्चित् पिता योग्ये पुत्रे धनसम्पत्तिं संस्थाप्य निश्चिन्तो भवति, तथा ब्रह्मापि निश्चिन्तो जातः।

अत्र वल्लभदेवेन 'प्रजासृट' इत्यस्य 'राष्ट्रहितकृत् राजा' अर्थः कृतो यो न कोशसङ्गतोऽर्थः। एवञ्च 'सुपात्र' इत्यस्य 'अलुब्ध' इत्यपि न कोशसङ्गतोऽर्थः तस्मादयमर्थस्तु कल्पनया चिन्त्यो भवति। परं मल्लिनाथकृतेऽर्थे तु कोश: प्रमाणं तथा च व्यवहारेऽपि समाजेऽपि विलोक्यते यत् पिता स्वीयममूल्यं धनं पुत्राय ददाति, तस्मादिदं योग्यम्। अत: मल्लिनाथकृतोऽर्थो योग्यस्तत्रालङ्कारसिद्धिरपि स्वाभाविकी जायते। एवञ्च नारदो ब्रह्मणः पुत्रस्तु वर्तते एव, तस्मादयमर्थः सङ्गतः।

**उदीर्णरागप्रतिरोधकं जनैरभीक्ष्णमक्षुण्णतयाऽतिदुर्गमम्।**
**उपेयुषो मोक्षपथं मनस्विनस्त्वमग्रभूमिर्निरपायसंश्रया॥(१-३२)**

---

५५ शब्दैः स्वभावादेकार्थैः श्लेषोऽनेकार्थवाचनम्।

**साहित्यदर्पणः** (१०.५७); पृ. ७८८.

५६ प्रजा स्यात्सन्ततौ जने इत्यमरः।

प्रजानां जनानाम् - अपत्यानाम् **अमरकेश:** (नानार्थवर्ग-३८); सं. श्रीरामतेज पाण्डेय; प्रका० चौखम्बा विद्याभवन; ई. १९९८, पृ. १८७.

योग्यभाजनयोः पात्रम् इत्यमरः।

**अमरकोशः** (नानार्थवर्गः १८७); पृ. २५८.

सुपात्रे योग्यपुरुषे कटाहादिदृढभाजने च॥ - इति मल्लिनाथः ।।

**शिशुपालवधम्** निर्णयसागरप्रेस; पृ. १२.

भगवन्तं श्रीकृष्णं प्रति नारदस्योक्ति: - आदौ मोक्षमार्ग: कीदृशो वर्तते, तर्हि यस्मिन् मार्गे विषयाभिलाषा बाधां करोति, तथा च अभ्यासाभावात् यत्र गमनेऽतीव काठिन्यं भवति तादृशे दुष्प्राप्ये मार्गे प्रस्थितस्य मनस्विनस्त्वमेव प्राप्तव्योऽसि। कारणं त्वां प्राप्य जनो जन्ममरणरहितस्सन् मोक्षं विन्दति।

पूर्वलिखितोऽर्थो वल्लभदेवेन यथा पद्यनिहित एव स्पष्टीकृत:। तत: कश्चिज्जनो दुर्गमपथं प्रस्थित: स प्राप्यस्थानं प्राप्य निश्चिन्तो भवति। कारणं मार्गे चौराणामुपद्रवस्तथैव त्वां प्राप्य साधको जन्ममरणचिन्ताभ्योमुक्तो भवति।

अनेन प्रकारेण वल्लभदेवेनास्य श्लोकस्यान्यार्थोऽपि प्रकाशितः। परं मल्लिनाथेनायमेवार्थो विशेषतस्स्पष्टीकृतः, तथा चार्थद्वयं साधयितुं कोशप्रमाणं दत्त्वा दृढीकरणमपि कृतम्, तस्मात् वाचकानामर्थप्राप्त्यर्थं सारल्यं भवति।

मल्लिनाथेन प्रतिरोधकशब्दस्य 'प्रतिबन्धक:' पाटच्चरश्चार्थ: कृतः।[५७] विषयाभिलाषो मोक्षमार्गे विघ्नं करोति, यथा अरण्ये लुण्ठका उपद्रवं कुर्वन्ति। 'अतिदुर्गमः' शब्दो मोक्षमार्गस्य विशेषणन्तु भवत्येव तस्य कान्तार इत्यपि अर्थ: सूचितः।

तथा च 'अग्रभूमि:' इत्यस्यार्थ: प्राप्यस्थानमित्यर्थः सूचत:।[५८] अर्थात् भगवन्तं प्राप्य न पुनर्जन्म जायते।[५९]

मल्लिनाथो निवेदयति मोक्षमार्गो मुमुक्षो: कृते तथा कठिनो वर्तते यथा सामान्यजनः कान्तारं प्रविष्टः चौरेभ्यो बिभेति, ते यत्र तत्राऽवरोधं कुर्वन्ति, परं

---

[५७] पाटयन् छिन्दन् चरति पाटच्चर:। **संस्कृताहिन्दीकोशः;** सं. वामनशिवराम आप्टे; प्रका० मोतीलाल बनारसीदास पब्लिसर्स; दिल्ली; ई. १९८९; पृ. ६००.
प्रतिरोधिपरास्कन्दिपाटच्चरमलिम्लुचाः।।
**अमरकोशः** (शुद्रवर्ग-२५); पृ. १८७.

[५८] अग्रमालम्बने प्राप्ये॥ - इति मल्लिनाथः ।।
**शिशुपालवधम्** निर्णयसागरप्रेस; पृ. १३.

[५९] न स पुनरावर्ते। इति श्रुति: ॥ इति मल्लिनाथः ॥
**शिशुपालवधम्:** निर्णयसागरप्रेस, पृ. १३.
तमेव विदित्वाऽतिमृत्युमेतिनान्यः पन्था विद्यतेऽनयाय इति।।
**रुद्राष्टाध्यायी**; सं. पुरुषोत्तम जोगीभाई भट्ट, प्रका० सस्तु साहित्य वर्धक कार्यालय; मुंबई; ई. १९९६; पृ. २१.

प्राप्यस्थानं गत्वा तस्य न काचिद् बाधा, तथैव त्वां प्राप्य मुमक्षु: जन्ममरणदुःखेभ्यो मुक्तो भवति।

मुमुक्षो: मोक्षमार्गस्तु वर्णनविषय: वर्तते, परं सामान्यजनस्यारण्यमार्गस्तु ध्वनिः।[६०]

अयमर्थस्तु नितान्तं सार्थक: कारणं जगति द्विविधैव जना भवन्ति केचन् मोक्षमार्गप्रस्थिता मुनयो भवन्ति। परं बहुधा जनाः भवाटव्यां भ्रमन्ति। मुनयोऽपि दुःखिता: कारणं विषयाभिलाषादयोऽन्त:शत्रवस्तान् पीड्यन्ति, तथैव भवाटव्यां जनान् चौरादयो दुष्टाः पीडयन्ति। उभावपि पुनस्तत्मार्गं नागच्छतः एकश्चौरभयादपरः परमात्मनः कृपया मोक्षत्वाच्च। अतो ध्वन्यर्थोऽपि नितान्तं सङ्गत एव। कवीनां काव्येषु पण्डिता अर्थान्वेषणचतुरा एव विविधानर्थान् प्रकाश्य वाचकानां मोहमुत्पादयन्ति।

**स्पृशन्सशङ्क: समये शुचावपि स्थित: कराग्रैरसमग्रपातिभि:।**
**अघर्मघर्मोदकबिन्दुमौक्तिकैरलञ्चकारास्य वधूरहस्करः॥(१-५८)**

शिशुपालवधस्य प्रथमसर्गे नारदः शिशुपालस्य पूर्वजन्म वर्णयति। यदा स रावण आसीत्, तदा सः कीदृश: आसीत् तद्वर्णनं कतिपयश्लोकेषु कृतम्, येष्वयमप्येकतमश्लोको, यस्मिन् भगवान् सूर्य: कथं तस्योपकारक आसीत्, तथा च स तप्तोऽपि शान्तस्सभय आसीत्।

अस्य श्लोकस्य सामान्यार्थमस्तु यथा ग्रीष्मकाले भयादपूर्णकिरणै: रावणवधूनां स्पर्शं कुर्वन् शीतलस्सूर्यो घर्मबिन्दुमौक्तिकैरलङ्कारमकरोत्।

अस्य श्लोकस्यान्यार्थमपि दर्शयन् वल्लभदेवो लिखति। यथा – शुचावपि समये अत्र 'शुचि' इत्यस्यार्थद्वयम् (१)सूर्यपक्षे ग्रीष्मकालः, अन्यत्र (२)मनुष्यपक्षे शुद्धः, (३)समय: सूर्यपक्षे ऋतुकाल:, (५)मनुष्यपक्षे आचार: एवंविधोऽर्थो विहित:।

अत्र रावणव्यवहारात् सूर्यस्तु विभेत्येव, परं कश्चिज्जनस्तद्वधूरलंकुर्वन् सशङ्कस्सन् कराग्रै: स्पृशति। अयमर्थ: टीकयैवाऽवगन्तुं शक्यते। तत्र रावणक्रोधस्य कारणमपि वल्लभदेवेन दर्शितम्। यथा लोकेऽपि विलोक्यते यन्नारीविषये जना:

---

[६०] यथा कस्यचित्कुतश्चित्सङ्कटान्निर्गतस्य केनचित् कान्तारेण गतस्य किञ्चिन्निर्बाधस्थान प्राप्तिरभयाय कल्पते, तथा त्वमपि मुमुक्षोरिति ध्वनिः।। - इति मल्लिनाथः ।।

**शिशुपालवधम्** निर्णयसागरप्रेस; पृ. १३.

सशङ्का भवन्ति, विश्वासं चान्येषु न कुर्वन्ति। यथा कश्चिज्जनो नारी: अलङ्करोति तदा स्वभाविकीर्ष्याऽपि भवत्येव। यदि सामान्यजनानामित्थमीर्ष्या भवति चेदयं तु पुना रावण:।[६१] अतोऽयमर्थस्यानर्थं कुर्यादिति तज्जनानां भयं सदैवावर्तत।

अयं वल्लदेवकृतोऽर्थो वर्तते। परं तमेवार्थं स्पष्टं कुर्वन् प्रमाणानि यच्छन्, अलङ्कारञ्च बोधयन् मल्लिनायो विशेषं लोकमनोहरं कवेराशयं प्रस्तौति।

यथा - श्लोकेऽस्मिन् मल्लिनाथेन समासोक्तिरलङ्कारस्सूचित:।[६२] समासोक्तौ कार्यलिङ्गविशेषणबलात् प्रस्तुतेऽप्रस्तुतव्यवहारस्यारोपो भवति। अत्र कार्यलिङ्गविशेषणबलात् सूर्यस्य प्रस्तुते वर्णने प्रसाधकस्याप्रस्तुतव्यवहारो दृश्यते। तत्र च समविशेषणमूलाया: समासोक्ते: त्रय: प्रकारा भवन्ति[६३] येषु श्लिष्टताप्रकारोऽयम्। कारणमत्र विशेषणानि श्लिष्टानि सन्ति यानि सूर्यव्यवहारमपि दर्शयन्ति तान्येव प्रसाधकव्यवहारमपि सूचयन्ति। कथमिति चेत् –

'शुचौ समये' इत्यस्थार्थ: सूर्यपक्षे ग्रीष्मकाले स्थितोऽपि, प्रसाधकपक्षे तु अनुपहृते आचारे च स्थितोऽपि, एवमर्थो बोद्धव्य:।[६४] 'समयः' इत्यस्यार्थः कालस्तु भवत्येव परं तस्यार्थ आचारोऽपि भवति।[६५] करस्य किरणार्थस्तु भवत्येव परं हस्तोऽपि भवति।[६६] इत्थं सर्वेषामपि विशेषणानां श्लिष्टार्थस्पष्टता सप्रमाणं मल्लिनाथेन कृता।

---

[६१] न हि सेर्ष्या गुणिनमगुणिनं वा विचारयन्ति।। - इति वल्लभः ।।
**शिशुपालवधम्** सैव श्रीनगरस्यावृत्ति:; पृ. ३३.

[६२] समासोक्तिः समैर्यत्र न कार्यलिङ्गविशेषणैः।।
व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः।।
**साहित्यदर्पणः** (१०.५६); पृ. ७७७.

[६३] विशेषणसाम्यं तु श्लिष्टतया साधारण्येन, औपम्यगर्भत्वेन च त्रिधा।
**साहित्यदर्पण:** (१०.५६); पृ. ७७७.

[६४] शुचिः शुद्धेऽनुपहृते शृङ्गाराषाढयोरपि।
ग्रीष्मे हुतवहेऽपि स्यात्॥ इति मल्लिनाथः ॥
**शिशुपालवधम्**: निर्णयसागरप्रेस, पृ. २२.

[६५] समया सपथाचारकालसिद्धान्त संविदः।। **अमरकोशः** (नानार्थवर्ग–१५७); पृ. २५३.

[६६] बालहस्तांशवः कराः॥
**अमरकोश:** (नानार्थवर्ग:-१७२); पृ. २५६.

तथा च 'असमग्रपातिभि:' इत्यस्यार्थ: प्रसाधकपक्षे कथं कर्तव्य इति वल्लभदेवेन न सूचितं किन्तु तथैव श्लिष्ट एव स्थापितः। मल्लिनाथस्तु 'असमग्रपातिभिरित्यस्यार्थं' 'सङ्कुचितवृत्तिभि:' कृत्वा स्पष्टं कृतवान्। सर्वेषां श्लिष्टविशेषणानां स्पष्टार्थप्रतीतिं दर्शयित्वा समासोक्तिरलङ्कारोऽनेन स्पष्टीकृतः।[६७]

अतः ज्ञायते यद् रावणभयात् सूर्यस्तु ग्रीष्मकाले सत्यपि नातपत्, परं शीतलः सन् तद्वधूरलंकुर्वन्नुपकारमेवाकरोत्। तथा च यथा सूर्यस्तथैव प्रसाधकोऽपि तद्वधू: सभयः सन् स्पृशति स्म। यद्यपि तस्याचारस्तु शुद्ध आसीत्।

तात्पर्यं द्वयोरपि टीकयोरभ्यासात् ज्ञातुं शक्यते यत् सूर्यव्यवहारवर्णने प्रसाधकव्यवहारवर्णनं वल्लभदेवस्य टीकायां स्पष्टं न भवति। कारणं तत्र केषाञ्चित् शब्दानामर्थोऽस्पष्टः। परं मल्लिनाथस्य टीकयाऽर्थद्वयमपि सूर्यपक्षे प्रसाधकपक्षे च स्पष्टं भवति।

❋❋❋

[६७] अत्र प्रस्तुतसूर्यविशेषणमात्रसाम्यादप्रस्तुतप्रसाधकप्रतीते: समासोक्तिरलंकार: ।। - इति मल्लिनाथः ।। **शिशुपालवधम्**; निर्णयसागरप्रेस; पृ. २३.

## सर्ग:-2

## मन्त्रवर्णनम्

मन्त्रवर्णनाख्ये द्वितीयसर्गे महाकविना माघेन कार्यद्वयाकुलस्य (प्रथमं शिशुपालवधाय गन्तव्यं वा यज्ञायेति कार्यद्वयम्) भगवतः श्रीकृष्णस्य बलरामोद्धवाभ्यां मन्त्रणाप्रसङ्गमाश्रित्य राजनीतिविवेचनं कृतम्।

अस्य सर्गस्य वल्लभदेवमल्लिनाथयो: टीकाविषये किञ्चिल्लिख्यते तर्हि द्वावपि राजनीतिशास्त्रकुशलौ स्तः। मन्त्रणा कुत्र कर्तव्येति चर्चायां द्वयोरपि नीतिज्ञानं दृश्यते। ताभ्यामन्यान्यपि नीतिविषयकपद्यानि सन्दर्भग्रन्थेभ्यो गृहीत्वा लिखितानि तदेव प्रमाणम्।[१] वल्लभदेवेन भारवेरपि महाकाव्यं विलोक्यापि कुत्रचिदुल्लेख: कृतः।[२] द्वयोरपि विवेचनं समीचीनं दृश्यते।

यद्यपि द्वयोरपि टीकाकारयोर्दृष्टिस्तु समाना तथापि मतिभेदात् क्वचित् परिवर्तनावकाशो वर्तत एव।[३]

वल्लभदेवस्य वस्त्रविषयकज्ञानं तस्य देशाटनं सूचयति।[४] यतो हि कतिपयशब्दानां वस्त्रानुरूपा अर्था अपि तेन दर्शिताः। अलङ्कारविषये प्राय उपमोत्प्रेक्षयोर्विषये मतभेदो दृश्यते। अन्यच्च दृष्टान्तार्थान्तरन्यासयोर्विरोधतद्गुणापह्नुत्याद्यलङ्काराणां विवेचनेऽपि मतभेदो दृश्यते।

पाठान्तरग्रहणेऽर्थदर्शने वल्लभदेवस्य चातुर्यं रसानुरूपं प्रसङ्गानुरूपं च[५] परं मल्लिनाथस्य विवेचनं काठिन्यपूर्णं वर्तते। यथा - तेजः क्षमा वा...... (२-८५) पद्ये वल्लभदेवेन 'रसभाग' इति पाठो गृहीतः, परं मल्लिनाथेन 'रसभाव' इति

---

१ एतदर्थं द्वितीयसर्गस्येमे १-४-८-२६-२७ श्लोकाः चिन्तनीयाः।
**शिशुपालवधम्;** (चौखम्बा) पृ. २.

२ सन्दर्भार्थमेतत्पद्यं चिन्त्यम्।
**शिशुपालवधम्;** (२-१०); (चौखम्बा) पृ. ४९.

३ तुण्डे तुण्डे मतिर्भिन्ना कुण्डे कुण्डे नवं पयः।
गृहे गृहे नवाचारो नवा वाणी मुखे मुखे॥ (कस्यापि )

४ विलोकयतु पद्यम् (२-१९)
**शिशुपालवधम्;** (२-१९); सैव श्रीनगरस्यावृत्ति:; पृ. ५०.

५ विलोक्यतां पद्यम् १-८५, २-९०
**शिशुपालवधम्;** (२-८५, २-९०); (चौखम्बा) पृ. ८५/८८.

पाठो गृहीतः। अत्र मल्लिनाथापेक्षया वल्लभदेवस्य पाठे पुनरुक्त्यभावो वर्तते। कारणं रसस्य भावस्य चैक एवार्थः, तस्मात् भावस्य स्थाने भागग्रहणं समीचीनं दृश्यते। मध्ये सुभाषितवाक्यानामुल्लेखेन वल्लभदेवस्य लेखनं रोचकं भवति।[६] क्वचिदन्वयविषयेऽपि भिन्नार्थप्रतीतिर्भवति।[७] तत्रापि वल्लभदेवस्य नितान्तं रोचकोऽर्थो दृश्यते। परं ध्वन्यर्थविवेचने मल्लिनाथस्य लेखनं युक्तियुक्तं प्रतिभाति। अलङ्काराणां चिन्तनेऽपि वल्लभदेवापेक्षया मल्लिनाथस्य विवेचनं योग्यम्। मल्लिनाथस्य कोशोऽपि समृद्धः। पद्यस्य वाचनानन्तरं प्रथमापेक्षा वाचकस्यार्थग्रहणे भवति, तं पूरयितुं वल्लभदेवोऽधिकं सामर्थ्यं धारयति कारणं तस्य भाषा सरला मधुरा च। मल्लिनाथस्य विवेचनं पठित्वा तेन निर्दिष्टानां सन्दर्भोद्धरणानां परीक्षाकरणायान्येऽपि ग्रन्थाः पठनीया भवन्ति। अथैतद् दृष्टान्तमुखेन विचार्यते।

**रत्नस्तम्भेपु संक्रान्तप्रतिमास्ते चकाशिरे।**
**एकाकिनोऽपि परितः पौरुषेयवृता इव॥२-४॥**

शिशुपालवधस्य प्रथमसर्गे नारदेनेन्द्रस्य सन्देशः पाठितः। ततः भगवतः श्रीकृष्णस्य कार्यद्वयमासीत्। एकन्तु युधिष्ठिरस्य राजसूययज्ञे समुपस्थितिर्दातव्या, अपरञ्च शिशुपालो हन्तव्यः। द्वयोरपि कार्ययोः किं कर्मादौ कर्तव्यमेतदर्थं द्वितीयसर्गे भगवान् श्रीकृष्णो बलदेवोद्धवाभ्यां सह मन्त्रणां कुरुते।

श्लोकेऽस्मिन् मन्त्रणार्थमेकत्र सम्मिलितास्ते कीदृशा अदृश्यन्तेत्युत्प्रेक्षया तद्भूमिवर्णनं कृतम्। कथञ्चेत् श्रीकृष्णबलदेवोद्धवास्ते त्रय एकाकिन आसन्। अर्थात् विहायैतान् न कोऽपि तत्रावर्तत। तथापि ते पुरुषसमूहेन वेष्टिता इव बभूवुः, कारणं तत्र मन्त्रणास्थले रत्नस्तम्भेषु तेषां प्रतिबिम्बानिमदृश्यन्त, तस्मादित्थं प्रतीतिरभूद् यथा तेषामासमन्ताद् बहवो जनास्स्थिताः।

अत्रैतच्चिन्तनीयं भवति यत् मन्त्रणास्थानं कुत्र भवति, अर्थाद् मन्त्रणा कुत्र कर्तव्येति नीतिग्रन्थेषु लिखितं भवति, तदनुसारमेतत् स्थलं योग्यं नवेति ?

---

[६] एतदर्थं विलोक्यताम् २-६९ पद्यम्।
**शिशुपालवधम्;** (१-६९); सैव श्रीनगरस्यावृत्तिः; पृ. ६८.

[७] विलोकयतु (२-११४) पद्यम्।
**शिशुपालवधम्;** (१-११४); सैव श्रीनगरस्यावृत्तिः;, पृ. ८७.

द्वितीयश्लोकस्य टीकायां वल्लभदेवेन लिखितं मन्त्रणास्थलेन निर्जनेन भवितव्यम्।[८]

तात्पर्यं यत्र कश्चिदपि जनो न भवेत् तत्र मन्त्रणा कर्तव्या। मनुस्मृतावपि लिखितं यत् पर्वतशिखरे मन्त्रणा कर्तव्याऽथवैकान्तस्थले मन्त्रणा कर्तव्या। अथवा किमप्यरण्यं प्राप्य तत्र वने मन्त्रणा कर्तव्या परं स्तम्भयुते स्थले मन्त्रणा न कर्तव्या।[९] कारणं कश्चित् स्तम्भपृष्ठे स्थित्वा श्रोतुं शक्नोति; तस्मात् तादृशं स्थलं त्याज्यम्। यद्यपि वल्लभदेवस्य स्थलसूचनं द्वितीयश्लोके नाधिकं परं किञ्चिदप्रासङ्गिकं प्रतिभाति। तत् कारणं द्वितीयश्लोके न तथा किमपि स्थलवर्णनमस्ति। चतुर्थ श्लोकेऽपि स्थलवर्णनं तु न वर्तते, परमुत्प्रेक्षया ज्ञातुं शक्यते यत् मन्त्रणास्थलं कीदृशं भवेदिति।

चतुर्थश्लोके श्रीकृष्णबलदेवोद्धवा: यत्र मन्त्रणां कर्तुं सम्मिलितास्तत्र तेऽसहाया आसन्, अर्थात् तान्त्रीन् विहाय न कश्चिदप्यासीत्, तथापि तेऽनेकपुरुषैर्वृता इवाभवन् । तत्र कारणं रत्नस्तम्भा आसन्, तेषु रत्नस्तम्भेषु तत्र इमे प्रतिबिम्बिता जाता अतस्तथा कल्पना भवति, यथा तेषामासमन्तात् बहवोऽन्येऽपि पुरुषा आसन्।

अत्र टीकायां मल्लिनाथोऽपि तमेव स्थानगतं दोषं दर्शयति। स्तम्भयुता भूमि र्मन्त्राणार्थमनुचिता। एतद्दृढीकर्तुं मल्लिनाथेन कामन्दकीयस्य पद्यमुद्धृत्योक्तं यत् मन्त्रभूमि: स्तम्भरहिता भवतु, वातायनेन रहिता भवतु, भित्तिरहिता भवतु तात्पर्यं मन्त्रभूमौ स्तम्भवातायनभित्तयो वर्ज्या:।[१०] तथा च प्रासादाग्रे वने मन्त्रणा कर्तव्या। अतो मन्त्रभूमौ स्तम्भै र्न भवितव्यम्।

---

[८] एक एवैकाकी 'एकादाकिनिश्चसहाये'।। - इति वल्लभदेवः ।।
**शिशुपालवधम्** (२-४); सैव श्रीनगरस्यावृत्तिः पृ. ४५.

[९] गिरिपृष्ठं समारुह्य प्रसादं वा रहो गत:।
अरण्ये नि:शलाके वा मन्त्रयेद्भावभावितः॥
**मनुस्मृति:** (७-१४७); सं. श्रीगणेशदत्त पाठक; प्रका० ठाकुरप्रसाद एण्ड सन्स ब्रूक्सेलर, वाराणसी, सं. २०३१; पृ. २४८.

[१०] निस्तम्भे निर्गवाक्षे च निभित्त्यन्तरसंश्रये।
प्रासादाग्रे त्वरण्ये वा मन्त्रयेद्भावभाविनौ।।
(इति कामन्दकीयसन्दर्भो मल्लिनाथस्य विवेचने)
**शिशुपालवधम्;** निर्णयसागरप्रेस; पृ. ३१.

माधेनात्र रत्नस्तम्भानामुल्लेख: कृतो यद्यपि नीतिशास्त्रं मन्त्रभूमिर्निस्तभा ग्राह्येति सूचयति।

एतद्दोषं दूरीकर्तुं मल्लिनाथेन लिख्यते यत् ते 'एकाकिनः' आसन्। अतो निर्जनत्वान्मन्त्रभूमिर्योग्येति नात्र दोष:। परमेतद्दोषं दूरीकर्तुं वल्लभदेवेन लिखितं मनुस्मृतिपद्यं योग्यम्, कारणं तत्र 'रहः' मन्त्रणा कर्तव्येति लिखितम् अत्रापि ते सर्वे 'एकाकिन' आसन्, तस्मात् रहसि मन्त्रणा क्रियते चेन्नात्र कश्चिद् दोष:।

अत्र मल्लिनाथो दोषदर्शनं सूचयति, तस्मात् तस्य प्रसङ्गचिन्तनं सविशेषमस्ति तथा च वल्लभदेवेन मनुस्मृतिपद्यमन्यत्रानपेक्षितस्थले लिखितं तस्मादेतद्विषये स्तोकं शैथिल्यं दृश्यते।

एतस्मिन्नेव पद्येऽलङ्कारविषयेऽपि विभिन्नमतौ द्वाविमौ वल्लभदेवमल्लिनाथौ स्तः। वल्लभदेवेन लिख्यते यदत्रोपमालङ्कारस्तथा मल्लिनाथेनात्रोत्प्रेक्षालङ्कारः कथ्यते।

उपमालङ्कारस्य लक्षणानुसारमुपमेयस्य गुणा उपमाने दृश्यन्ते तदा तयोरुपमेयोपमानयो: साम्यमेवोपमालङ्कारः।[११] श्लोकेऽस्मिन्नर्थानुसारन्तूपमा भवितुमेव नार्हति, कारणं रत्नस्तम्भेषु प्रतिबिम्बितास्ते बहुपुरुषैर्युक्ता इवादृश्यन्त। इयन्तु कल्पनैव वर्तते। परं साधारणधर्मवाचकानां शब्दानामिवशब्द: प्रथम:।

---

११ साधर्म्यमुपमा भेदे॥ - इति मम्मटः ॥
**काव्यप्रकाशः** (१-१०)
उपमेयम् उपमीयते इदमिति।
उपमानम् उपमीयतेऽनेनेति।
उपमाने उपमेये च उभयत्र संगतोधर्मः साधारणधर्मः।।
उपमालङ्कारस्य कतिपयान्यव्याख्या:-
(१) हृद्यं साधर्म्यमुपमा॥ - इति हेमचन्द्राचार्यः ।।
**काव्यानुशासनम्** सं. वामनशर्मा, प्रका० महावीरजैन विद्यालय; मुंबई; ई. १९६४ द्वितीयसंस्करण पृ. ३३९.
(२) उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः।।
**कुवलयान्दः**; सं. डॉ. भोलाशंकर व्यास, प्रका० चौखम्बा विद्याभवन; वाराणसी; ई. १९९७; पृ. २.
(३) यस्य येनास्ति सादृश्य यस्मात्करस्मात्प्रकारत:।
उपमा नाम तस्योक्तिरिववद्वादिभिर्यथा।। - इति अमृतानन्दयोगी ।।
**अलङ्कारसंग्रहः** सं. - पं. कृष्णमाचार्य एवं रामचन्द्रशर्मा, प्रका० The Adyar Library; ई. १९४९, पृ. ४६.

अत्रापि श्लोके 'इवशब्देन' कल्पना विहिता, तस्माद् वल्लभदेवेनोपमालङ्कार: कल्पित: स्यात्। उपमालङ्कारे इव - यथा - वत् - वा - समान - सम – निभ – सन्निभ – तुल्य – संकाश – सदृश - कल्प - देशीय - देश्यादयस्तदलङ्कारदर्शकाः शब्दाः कथिताः। श्लोकेऽत्र इवशब्देनैवोपमालङ्कारं वक्तुं न शक्यते।

अत्र मल्लिनाथेनोत्प्रेक्षालङ्कारस्स्वीकृतः। उत्प्रेक्षालङ्कारे उपमेयस्योपमानेन सह प्रायस्तादात्म्यज्ञानेन भवितव्यं, परं तत्कल्पितमेव, न यथार्थं तादात्म्यं भवति। तत्र मन्ये, शङ्के, ध्रुवम्, प्राय:, नूनम् इमे शब्दा: समायान्ति तथा चैनमलङ्कारं बोधयन्ति, परं क्वचिद् 'इव' शब्दोऽपि भवति। उत्प्रेक्षालङ्कारस्यान्यव्याख्या अपि तमेव तर्कं बोधयन्ति।[१२]

श्लोकेऽस्मिन् ते त्रय: प्रतिबिम्बिता आसँस्तस्मात् पुरुषमण्डलेन वेष्टिता इवादृश्यन्त। अत्र रत्नस्तम्भेषु पुरुषाणां कल्पनैव कृता, नात्र यथार्थता तस्मादत्रोत्प्रेक्षाऽलङ्कार एव ग्राह्य: प्रसङ्गानुसारं वर्णनानुसारं व्याख्यानुसारञ्चोत्प्रेक्षालङ्कार एव युक्तियुक्त: प्रतिभाति। अनेनालङ्कारेण मन्त्रभूमिदोषोऽपि दूरं याति। अतोऽलङ्कारविषये पद्येऽस्मिन् मल्लिनाथमतं वल्लभदेवमताद्योग्यमिति भाव:।

**कदरीकृतभूपालो भ्रातृभिर्जित्वरैर्दिशाम्।**
**विनाऽप्यस्मदलं भूष्णुरिज्यायै तपसः सुतः॥(२-९)**

द्वितीयसर्गे श्रीकृष्णबलरामोद्धवाः कार्यद्वयव्याकुलाः सन्तो मन्त्रणां कुर्वन्ति, तत्र-

श्री कृष्णोक्तं पद्यमिदम्। श्रीकृष्ण: कथयति, द्वयोः कार्ययोः शिशुपालवधस्यैव कर्मादौ कर्तव्यमेतत्कर्मास्मान् विना नान्यो विधास्यति। यज्ञस्तु विनाऽप्यस्माद् भविष्यति। कारणं धर्मसुतो युधिष्ठिरो यज्ञं कर्तुं शक्ष्यति, कारणं युधिष्ठिरेण सर्वेऽपि

---

[१२] सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्। इति मम्मट: ।

**काव्यप्रकाशः** पृ. ३५४.

सम्भावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना।

**कुवलयानन्दः** पृ. ३४.

उत्प्रेक्षोन्नीयते यत्र हेरत्वादिर्निहुर्तिं विना।

त्वन्मुखश्रीकृते नूनं पद्मैर्विराजते राशी।।

**चन्द्रालोकः**; सं. कथाभट्टः श्रीनन्द किशोर शर्मा, प्रका० चौखम्बा प्रेस; वाराणसी ई. १९७९, पृ. ११९.

राजानो वशीकृतास्तस्य भ्रातरोऽपि विजयिनो वर्तन्ते। अतो यज्ञकर्मणि न गन्तव्यम्, परं शिशुपालवधाय गन्तव्यमिति भावः।

अत्र युधिष्ठिरस्य विशेषणमस्ति 'कदरीकृतभूपाल:' अस्य शब्दस्य विवेचने वल्लभदेव: कथयति - कदरीकृता: वशं नीता: भूपाला राजानो येन सः युधिष्ठिर:। परं मल्लिनाथस्तु लिखति करदा: षष्ठभागप्रदा:।[१३] ततश्च वः। अकरदा: करदा: सम्पद्यमाना: कृता: करदीकृता भूपाला: यस्य सः वशीकृतराजमण्डलो युधिष्ठिरः। एवमस्य मल्लिनाथस्य व्याख्यायां करदीकृतभूपाला इति विशेषणं युधिष्ठिरस्य विशेषं प्रावीण्यं सूचयति। करग्रहणकर्माप्यनेन विवेचनेन ज्ञातुं शक्यते।

**मम तावन्मतमद: श्रूयतामङ्ग ! वामपि।**
**ज्ञातसारेऽपि खल्वेकः सन्दिग्धे कार्यवस्तुनि।।**(२–१२)

श्लोकेऽस्मिन् भगवान् श्रीकृष्णो वदति यत् मया मम मतन्तु प्रस्तुतम्, परं भवतोरपि मतं मया श्रोतव्यं भविष्यति। कारणं कार्यमर्मज्ञोऽपि जनो यदैकाकी भवति तदा कर्तव्यविषये संशयं करोति तात्पर्यं भगवान् श्रीकृष्णोऽनयोरुद्धवबलदेवयोरपि मते श्रोतुं लसति। तत्राप्ययमेवार्थो यथा केनापि जनेन सम्पत्तौ विपत्तौ वा किमपि नाविन्यं कर्म करणीयं भवति, तदा सुहृदः पृष्टव्या भवन्ति, तस्य कर्मण: फलमपि चिन्तनीयं भवति। एवमनेन वल्लभदेवेनात्र सुभाषितद्वयं विलिख्य श्लोकार्थो विशेषतस्स्पष्टीकृत इति वैशिष्टयम्।[१४]

अपरञ्चात्र ध्यानं कर्षति दृष्टान्तार्थान्तरन्यासयोरलङ्कारचर्चा। वल्लभदेवः श्लोकेऽस्मिन् दृष्टान्तालङ्कारं लिखति, परं मल्लिनाथमतेनात्रार्थान्तरन्यासः। साम्प्रतं कस्य मतं विशिष्टां योग्यतां धारयतीति विलोकनीयम्।

प्रथमं तावद्वल्लभदेवस्य दृष्टान्तालड्कारो विचार्यते। दृष्टान्तालङ्कारस्य यदि लक्षणं विलोक्यते तर्हि समानधर्मयुक्तोपमानोपमेयवाक्यार्थयोर्बिम्बप्रतिबिम्बभावो यत्र स दृष्टान्ता-

---

१३ 'भागधेयः करो बलिः' इत्यमरः।

**अमरकोशः** क्षत्रियवर्ग: २७; पृ. १४३.

१४ सुविमृष्टे स्वयं सम्यक् सुहृद्भिः सुपरीक्षिते।
नैवारम्भे विपन्नेऽपि वाच्यतां यान्ति साधव:।।
कार्यमालोचिताऽपायं मतिमद्भिर्विवेचितम्।
न केवलं हि सम्पत्तौ विपत्तावपि शोभते॥

**शिशुपालवधम्;** सैव श्रीनगरस्यावृत्तिः; पृ. ४८.

लङ्कारः।[१५] वल्लभदेवेन 'ममापि युवयोर्मते श्रोतव्ये' इत्येकं वाक्यञ्च मर्मज्ञोऽपि यद्येकाकी भवति चेत् कार्ये कार्ये सन्देहं करोतीति द्वितीयं वाक्यम्, द्वयोरप्यनयोर्वाक्ययो र्बिम्बप्रतिबिम्बभावं विचिन्त्यात्र दृष्टान्तालङ्कारो भवितुमर्हति।

दृष्टः अन्तः = दृष्टान्तः अर्थात् प्रस्तुतस्य वस्तुनः उदाहरणदर्शनेन निश्चयः। मल्लिनाथेनापि दृष्टान्तालङ्कारं स्पष्टीकर्तुं लिख्यते यत् कस्यचिदपि सन्दिग्धस्यार्थस्य दृष्टान्तद्वारा स्पष्टीकरणं भवति, तत्रायमलङ्कारो भवति।[१६] अत्र श्लोके बिम्बप्रतिबिम्बभावस्तु न स्पष्टः, परं कवेरपि दृष्टान्तेनोक्तस्य दृढीकरणे मतिर्न दृश्यते। अत इदन्तु स्पष्टमेवात्र दृष्टान्तालङ्कारो न वर्तते।

अधुना मल्लिनाथमतं प्रस्तूयते। मल्लिनाथेनात्रार्थान्तरन्यासः कथितः। अर्थान्तरन्यासस्य विवेचनं क्रियते तर्हि - सामान्यकथनं विशेषकथनेन समर्थितं भवति, अथवा सामान्यकथनेन विशेषकथनं समर्थितं भवति, तत्समर्थनं साधर्म्येणापि भवति वैधर्म्येणापि भवति।[१७]

श्लोकेऽस्मिन् तल्लक्षणं कथं कार्यान्वितं भवति तर्हि - कृष्णेनोद्धवबलराममते श्रोतव्ये तत् कथनं विशेषं कस्मादिति कश्चिदपि

---

[१५] दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्॥
**साहित्यदर्पण:** (१०-५०); पृ. ७६३.
चेद्बिम्बप्रतिबिम्बित्वं दृष्टान्तस्तदलंकृतिः।।
**कुवलयानन्दः** (५२), पृ. ६७.
प्रकृतवाक्यार्थघटकानामुपमादीनां साधारणधर्मस्य च बिम्बप्रतिबिम्बभावे दृष्टान्तः।। - इति जगन्नाथः ।। **रसगङ्गाधरः**; पृ. ५१२.

[१६] दृष्टः अन्तः (प्रस्तुतस्य वस्तुनः उदाहरणदर्शनेन निश्चयः) यत्र स दृष्टान्तः।
दार्ष्टान्तिके सदिग्धस्य अर्थस्य अत्र निश्चयदर्शनात् अयं दृष्टान्तः इत्यर्थः ॥ - इति मल्लिनाथः ॥
**काव्यप्रकाशः** संपादकः - प्रा. एच. जी. देसाई आदि प्रका० सी, जमनादास कंपनी; अहमदाबाद; ई. १९७३, पृ. १६२.

[१७] सामान्यं वा विशेषो वा यदन्येन समर्थ्यते।
यत्र सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा॥
**काव्यप्रकाशः** पृ. ३९३.
सामान्यविशेषभावकार्यकारणभावाभ्यां निर्दिष्टप्रकृतसमर्थनमर्थान्तरन्यासः।। ३७ ।। - इति रुय्यकः । अलङ्कारसर्वस्वम्; सं. कुमारी स. सु. जानकी, प्रका. मेहरचन्द्र लक्ष्मणदास दिल्ली, ई. १९६५, पृ. १३९.

कर्तव्यकर्मण्येकाकी भवति तदा सन्देहं करोति। अनेन सामान्येन समर्थितं तस्मादत्र लक्षणानुसारं स्पष्टोऽर्थान्तरन्यास:।

अपरञ्चात्र 'माघेऽलङ्कारविमर्श:' कल्याणभारतीकृतोऽयं ग्रन्थ: प्रमाणम्। [१८]तत्राप्यलङ्कारचर्चायामस्मिन् पद्येऽर्थान्तरन्यासालङ्कार एव लिखितः।

अतो नात्र दृष्टान्तोऽपितु 'अर्थान्तरन्यासो' बोद्धव्य इति भावः।

**प्रोल्लसत्कुण्डलप्रोतपद्मरागदलत्विषा।**
**कृष्णोत्तरासङ्गरुचं विदधच्चूतपल्लवम्॥२-१९॥**

श्लोकेऽस्मिन् भगवता कृष्णेन पृष्टो ज्येष्ठभ्राता बलराम: स्वमतं कथयति। तत्पूर्वं कविस्तस्य वर्णनं वीररसानुरूपं विदधाति। अर्थस्तु यथा विशेषप्रकाशयुक्तकुण्डलयो: स्थिता: पद्मरागखण्डास्तेषां प्रभाभि: स्वकृष्णोत्तरीयस्याभां चूतपल्लवतुल्यां कुर्वन्नाह।

अत्र 'चौतपल्लवी' शब्दस्यार्थ: आभीरदेशे नीलपीतमम्बरमेव 'चूतपल्लवी' कथ्यते तथा लिखितम्।[१९]

आम्रपल्लवस्यापि वर्णसाम्यात् मल्लिनाथस्यार्थघटनं यद्यपि समीचीनं वर्तते, तथापि वल्लभदेवकृतोऽयमर्थो वस्त्रवर्णनत्वात् प्रसङ्गोचितश्च पर्यटनाभ्यासनिरीक्षणफलान्वितत्वाद् विशेषतां धारयति। तस्मात् वल्लभदेवकृत एवार्थः कवेर्मनस्यपि स्यादिति प्रतिभाति।

**जगाद वदनच्छद्मपद्मपर्यन्तपातिन:।**
**नयन्मधुलिहः श्वैत्यमुदग्रदशनांशुभिः।।(२-२१)**

द्वितीयसर्गस्यायं श्लोको बलरामवर्णने कविना माघेन लिखितः। सामान्यार्थस्त्वस्य श्लोकस्य यथा - बलरामस्य मुखमेव कमलमिति ज्ञात्वाऽलयः

---

[१८] मम तावन्मतमिदम्............॥ (२-१२)
अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः।।
**माघेऽलङ्कारविमर्श:;** सं. कल्याणभारती; प्रका० उषा पब्लिशिंग हाउस; जोधपुर जयपुर ई. १९७८, पृ. २०९.

[१९] आभीरदेशे नीलपीतंवासः चूतपल्लवी भण्यते। अन्ये तु चूतपल्लवस्येव आम्रतरुपल्लवस्येवेयं चौतपल्लवीत्याहु:। एतच्चास्य कवेर्न विवक्षितम्।। - इति वल्लभदेवः ।।
**शिशुपालवधम्;** सैव श्रीनगरस्यावृत्तिः पृ. ५०.

समायाताः। बलरामस्तु वक्तुकामोऽस्त्यतस्तस्य दन्तानां श्वेतकिरणैर्भ्रमराणामपि वर्णो धवलतां गतः। एवं तान् षट्पदान् धवलीकुर्वन् बलरामो जगादेति श्लोकार्थः।

श्लोकेऽस्मिन् बहवोऽलङ्कारा दृश्यन्ते। यदि वीररसकारणाद् मुखस्य रक्तवर्णो जातस्स्यात् तस्मात् कमलसदृशं रक्तं मुखं कमलोत्प्रेक्षामर्हत्यतः उत्प्रेक्षालङ्कारो भवितुमर्हति।[२०]

बलरामस्य मुखे भ्रमराणां कमलस्य सन्देहो जातस्तस्मात् संशयालङ्कारोऽपि भवितुमर्हति।[२१] तथा च स्वभावत: कृष्णा भ्रमरा: कृष्णाग्रजेन धवलतां प्रापिता अतः कृष्णानां श्वेतत्वमिति विरोधालङ्कारोऽपि भवितुमर्हति।[२२]

बलरामस्य मुखं नेदं मुखमपितु कमलमेवेति भावो गृह्यते तदा अपह्नुत्यलङ्कारोऽपि भवितुमर्हति।[२३]

तथा च दन्तानां श्वेतगुण: षट्पदै: प्राप्तस्तस्मात् तद्गुणालङ्कारोऽपि भवितुमर्हति।[२४]

श्लोकेऽस्मन् कृष्णा भ्रमरा धवलीकृता इति कल्पनाजनितो विरोधस्तु दृश्यते, तदाभासस्य कारणं दन्तरश्मय इत्यपि दर्शितम्। अपि शब्दस्याभावेऽत्रार्थो विरोधो न तु शाब्दविरोध:। अत्र भ्रमरो जातिवाचकं पदं धवलता च गुणस्तत्र विरोधत्वाद् गुणजातिविरोधालङ्कार इति वल्लभदेवमतम्।

पूर्वलिखितास्त्रयोऽपि 'उत्प्रेक्षासंशयविरोधालङ्कारा' वल्लभदेवमते भवन्ति। तत्रोत्प्रेक्षासंशयोस्तु कल्पनैव दृश्यते। विरोधाभासोऽपि न तथा स्पष्टः।

ततो विलोक्यते यत् मल्लिनाथेन किं कथ्यते। मल्लिनाथस्त्वत्रापह्नुत्यलङ्कारं च तद्गुणालङ्कारं पश्यति।

प्रथमं तावदपह्नुत्यलङ्कारस्य व्याख्या विचार्यते। उपमेयस्य निषेधं कृत्वोपमानस्य स्थापना क्रियते चेदपह्नुत्यलङ्कारो भवितुमर्हति। अत्र

---

[२०] भवेत्संभावनोत्प्रेक्षा प्रकृतस्य परात्मना ॥ - इत्युप्रेक्षा ॥
**साहित्यदर्पण:** पृ. ७३९.

[२१] सन्देहः प्रकृतेऽन्यस्य संशयः प्रतिभोत्थितः॥ - इति सन्देहः ॥
**साहित्यदर्पण:** पृ. ७२८.

[२२] विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः।। इति विरोधः ॥
**काव्यप्रकाशः** पृ. ३९५.

[२३] प्रकृतं यन्निषिध्यान्यसाध्यते सा त्वपह्नुतिः॥ - इत्यपाह्नुतिः ॥
**काव्यप्रकाशः** पृ. ३६४.

[२४] तद्गुणः स्वगुणत्यागादत्युत्कृष्टगुणग्रहः॥ - इति तद्गुणः ॥
**साहित्यदर्पण:** पृ. ८६०.

वदनमुपमेयमस्ति तथा च कमलमुपमानमस्ति। परमत्र वदनस्य निषेधं कृत्वा पद्मस्य स्थापना न कृता। परं छद्मशब्देन तद्गम्यते। यद्यप्यलङ्कारसर्वस्वकारस्य रुय्यकस्य कथनेनात्र श्लोकेऽपह्नुत्यलङ्कारो भवितुमर्हति। व्याख्यानुसारं यदेतेषामलङ्काराणां चर्चा क्रियते तर्हि -उपमेयस्योपमानेन सह सम्भावनैवोत्प्रेक्षा कथ्यते। श्लोकेऽस्मिन् बलराममुखस्य कमलेन सह सम्भावना दर्शिता, परं नात्र तद्दर्शकशब्दो दृश्यते।

संशयालङ्कारस्य 'गतं तिरश्चीन......' इति श्लोकविवरणे विशेषचर्चा कृता, तथापि यथाप्रसङ्गमत्र निरुप्यते। यत्रोपमेयोपमानयोर्मध्ये भेदस्य स्पष्टीकरणं भवति न वा भवति चेत् ससन्देहालङ्कारः कथ्यते। अस्मिन् श्लोके उपमेयभूतस्य बलराममुखस्य चोपमानभूतस्य कमलस्य मध्ये भेदः स्पष्टो न भवत्यतः ससन्देलङ्कारो भवितुमर्हति। परं वदनच्छद्मशब्देऽत्र न क्वापि चमत्कृतिस्तथा च वदने कमलस्य संशयोऽपि न स्पष्टस्तस्मात् संशयालङ्कारोऽपि न तथोचितः।

ततश्च विरोधालङ्कारस्य चिन्तनं क्रियते तर्हि - द्वयोः पदार्थयोर्मध्ये विरोधस्याभावेऽपि अर्थात् यथार्थविरोधस्याभावेऽपि विरोधस्य कथनमेव विरोधालङ्कारः।

यदि केनचित् कविना कस्यचिदपि वस्तुनो यथार्थं स्वरूपं गोपनीयं भवति, तदर्थं चान्यस्यारोपः क्रियते, तदाऽपह्नुत्यलङ्कारो भवति। तत्र छलादिशब्दैरसत्यत्वप्रतिपादनं भवति, स तृतीय: प्रकारोऽपह्नुत्यलङ्कारस्येति रुय्यकमतं स्वीकृत्य विचार्यते चेदत्र 'छद्म' शब्दो वर्तते, तेन च वदनं गोपनीयं भवत्यतोऽपह्नुत्यलङ्कारो भवितुमर्हति।[२५] मल्लिनाथस्यापह्नुत्यलङ्कार-मतं रुय्यकलक्षणेन यथार्थं प्रतिभाति।

ततः षट्पदाः स्वयं कृष्णाः परं बलरामस्य द्विजपंक्तिनिर्गतरश्मिभिर्धवलतां प्राप्तास्तस्मात् तेषां धवलतागुण एषु समागतस्तस्मात् तत्र तद्गुणालङ्कारः।[२६]

---

[२५] आरोपप्रस्तावादारोपविषयापह्नुतावारोप्यमानप्रतीतावपह्नुत्याख्योऽलङ्कारः। तस्य च त्रयीबन्धच्छायाअपह्नवपूर्वक आरोपः, आरोपपूर्वकोऽपह्नवः छलादिशब्दैरसत्यत्वप्रतिपादकैर्वापह्नवनिर्देशः। पूर्वोक्तभेदद्वये वाक्यभेदः। तृतीयभेदे त्वेकवाक्यम्।
**अलङ्कारसर्वस्वम्** पृ. ६१-६३.

[२६] स्वमुत्सृज्य गुणं योगादत्युज्ज्वलगुणस्य यत्।
वस्तुतद्गुणतामेति भण्यते स तु तद्गुणः॥
**काव्यप्रकाशः** पृ. ४४१.

यदा कस्यचिदप्यत्यन्ततेजस्विनो वस्तुनो गुणान् स्वीकृत्य स्वीयगुणानां त्यागो यत्र भवति तत्राऽयमलङ्कारो भवतीति लक्षणम्।

लक्षणानुसारं श्लोकेऽस्मिन् तद्गुणालङ्कारस्तु स्पष्ट एव दृश्यते। न तत्र संशयलेशोऽपि दृश्यते।

तद्गुणालङ्कारस्तु माधेऽलङ्कारविमर्शग्रन्थेनापि स्वीकृतस्तस्मादेवैतस्य मतस्य पुष्टि र्भवति।[२७]

एवमत्रापह्नुतितद्गुणालङ्कारयोः साङ्कर्यात् सङ्करालङ्कारः। वल्लभदेवेनोत्प्रेक्षा संशयविरोधालङ्काराणां कल्पना कृता, तेषु विरोधस्यैवाल्पशक्यता दृश्यतेऽन्येषान्तु सरलतया स्वीकृतिर्भवितुं नार्हति।

ततो मल्लिनाथस्य मतचिन्तनं कृतम्, परं तत्रापह्नुत्यलड्कारस्तु केवलमलङ्कार सर्वस्व- ग्रन्थमतेनैव स्वीकृतो भाति। तद्गुणालङ्कारे सर्वाण्यपि लक्षणानि सङ्गातान्यतस्तत्र स्वीकारे न काचिद्बाधा।

तात्पर्यमत्र तद्गुणालङ्कारो ग्राह्यः।

**तृप्तियोगः परेणापि महिम्ना न महात्मनाम्।**
**पूर्णश्चन्द्रोदयाकाङ्क्षी दृष्टान्तोऽत्र महार्णवः॥२-३५॥**

द्वितीयसर्गस्यास्मिन् पद्ये बलरामेणोच्यते यत् -

सामान्यरूपेणेदमुच्यते सन्तोष एव पुरुषेण स्वीकार्यः। परं राज्ञां कृते नायं नियमः, तात्पर्यं नृपैरसन्तुष्टैर्भवितव्यम्। श्लोकार्थस्त्वेवं यथा - महानुभावा अतीवमहत्त्वं प्राप्यापि तृप्तिं न यान्ति। अत्र दृष्टान्तरूप: समुद्रो वर्तते, कारणं स जलेन सम्पूर्णोऽपि सन् चन्द्रोदयमिच्छति। यतो हि चन्द्रोदये तत्र सागरे वारि वृद्धिं याति। अत्र दृष्टान्तं दत्त्वा बलरामेण स्वमतस्य दृढीकरणं कृतम्, तस्मात् श्लोकेऽस्मिन् दृष्टान्तालङ्कार एव,[२८] इति वल्लभदेवविवेचनं पठित्वा विचारयितुं

---

[२७] जगाद वदनच्छद्म....। अत्र मधुलिड्भिः स्वरूपं त्यक्त्वा शुभ्ररूपग्रहणात्तद्गुणात्तद्गुणालङ्कारः।
**माघेऽलङ्कारविमर्शः**; पृ. २८६.

[२८] (१) दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्॥ - विश्वनाथः ।।
**साहित्यदर्पण:** पृ. ७६३.
(२) चेद्बिम्बप्रतिबिम्बित्वं दृष्टान्तस्तदलंकृतिः। अप्पैय दीक्षित: ।
**कुवलयानन्द** पृ. ६७.
(३) प्रकृतवाक्यार्थघटकानामुपमादीनां साधारणधर्मस्य च बिम्बप्रतिबिम्बभावे दृष्टान्तः॥ - पं. जगन्नाथः ।।
**रसगंगाधर:** पृ. ५१२.

मनः करोति। कारणं वल्लभदेवेन स्पष्टं तु न लिखितं यदत्र दृष्टान्तालङ्कारः परं यत्र दृष्टान्तालङ्कारस्सन्दिग्धो भवति, तत्र तेन स्पष्टं लिख्यते यन्नात्र दृष्टान्तालङ्कारः।

परमत्र तेन दृष्टान्तस्य विवेचनं कृतम्, तथा दृष्टान्तः प्रकृतार्थनिश्चयोस्मिन्निति। एतद्विवेचनमेव दृष्टान्तालङ्कारमतं स्थापयतीति प्रतिभाति। अतो वल्लभदेवमतेनात्र दृष्टान्तालङ्कार इति वक्तुं शक्यते।

ततश्च मल्लिनाथमतं विचार्यते। मल्लिनाथेनात्र स्पष्टं भणितं यदस्मिन्पद्ये दृष्टान्तालङ्कारो न विद्यते। कस्मादिति तर्हि दृष्टान्तशब्दस्य स्वीकारः पद्ये कृतो यः करणीयो न भवति।[२९]

बह्व्यो दृष्टान्तव्याख्या विलोकिता; परं तत्र न क्वचिदपि दृष्टान्तशब्दस्य ग्रहणेन दृष्टान्तालङ्कारो न भवतीति पठितम्। तस्मादेतद्वक्तुं शक्यते यदियं व्याख्या - दृष्टान्तशब्दस्य ग्रहणं दृष्टान्तालङ्कारे न करणीयमिति मल्लिनाथस्यैव मतं स्यात्।

मल्लिनाथेनात्र दृष्टान्तालङ्कारो न स्वीक्रियते कारणं तत्र 'दृष्टान्तोऽत्र महार्णवः' इत्यत्र दृष्टान्तशब्दो गृहीतः। तस्मादत्रोपमालङ्कारो ग्राह्यः। माघेऽलङ्कारविमर्शग्रन्थेनापि श्लोकेऽस्मिन्नुपमालङ्कारं स्वीकृत्य मल्लिनाथमतमङ्गीकृतम्।[३०]

बिम्बप्रतिबिम्बभावे सत्यपि दृष्टान्तालङ्कारस्यास्वीकृतिः स्वमतस्थापनञ्च मल्लिनाथस्य स्वतन्त्रप्रतिभाप्रदर्शनायालम् अनेनेदमपि ज्ञायते यदयं टीकाकारो न केवलं व्याख्याकार एवापितु, लाक्षणिकग्रन्थकर्तृत्वरूपं सामर्थ्यमपि धारयति।

---

[२९] बिम्बप्रतिबिम्बभावेनौपम्यस्य गम्यत्वे तस्योत्थानात्। किन्तु दृष्टान्तशब्देन तस्याभिधानादुपमालङ्कारः। अत एव दृष्टान्तोदाहरणनिदर्शनरूपाः शब्दा न प्रयोक्तव्याः पौनरुक्त्यापत्तेरित्येकावल्यलङ्कारः
॥ - इति मल्लिनाथः ।।
**शिशुपालवधम्;** निर्णयसागरप्रेस; पृ. ३९.

[३०] साधर्म्यमुपमा भेदे॥
**काव्यप्रकाशः** (१०-१); पृ. ३३५.
दृष्टान्तशब्देन तस्याभिधानादुपमा।। - इति मल्लिनाथः ।। सा च आर्थी पूर्णोपमा ।।
**माघेऽलङ्कारविमर्शः** पृ. ७७.

तात्पर्यं पदेऽस्मिन् न दृष्टान्तालङ्कारः परमत्रोपमालङ्कार एव। अन्यच्चार्थविवेचने यत्र वल्लभदेवः अर्णो जलं विद्यते यस्येत्यर्णवः अणसः सलोपो वश्च। एवं निर्वचनं कृत्वार्थज्ञानं कारयतीति वैशिष्ट्यम्। मल्लिनाथेनापि 'दृष्ट अन्तो निश्चयो यस्मिन् दृष्टान्तो निदर्शनम्' एवं निर्वचनं शब्दव्युत्पत्तिर्वा दीयते ततोऽप्यधिकं कानिचिदन्यानि निदर्शनानि विलिख्यार्थस्य विवेचनं विशेषतः क्रियते।

अस्मिन् श्लोकेऽपि मल्लिनाथेन लिखितं ब्राह्मणानामसंतोषो हानिकारकः राज्ञां सन्तोषो हानिकारकः, गणिकानां लज्जा हानिं करोति, तथैव कुलाङ्गनानां निर्लज्जा हानिं करोति तस्मात् बलरामस्य कथनं यथार्थं 'नृपैरसंतुष्टैर्भाव्यम्' इति।[३१]

एवमत्रालङ्कारचर्चायां भावार्थविवेचने च वल्लभदेवात् मल्लिनाथोऽधिकतरः स्पष्ट इति निर्विवादं स्पष्टम्।

**विधाय वैरं सामर्षे नरोऽरौ य उपासते।**
**प्रक्षिप्योदर्चिषं कक्षे शेरते तेऽभिमारुतम्॥२-४२॥**

श्लोकेऽस्मिन् बलरामेणोच्यते यत् - वैरं कृत्वोदासीना ये भवन्ति ते कक्षेऽग्निं संस्थाप्य वाताभिमुखं शयनं कुर्वन्ति। अर्थात् स्वयमेव स्वस्य विनाशाय प्रवृत्ता भवन्ति। अतो युद्धमेव श्रेयस्करमिति भावः।

अत्र 'कक्षे' शब्दस्य समानार्थी शब्दो वल्लभदेवेन न लिख्यते, व्याख्यावसरे 'कक्षे' इत्यस्य स्थाने 'कक्षे' एव लिख्यते, तस्माद् ये शब्दाः ख्यातिं गतास्तेषां शब्दानां समानार्थिनश्शब्दाः वल्लभदेवमतेऽनावश्यका इति स्यात्।

तद्विपरीतं मल्लिनाथेन सरलानामपि शब्दानां समानार्थिनः शब्दा दीयन्ते। तत्र प्रमाणमपि दीयते, यदयं शब्दः कस्माद्ग्रन्थादुद्धृत इति। अत्र 'कक्षे' एतस्य समानार्थी शब्दः 'गुल्मे' लिखितः, ततो वैजयन्तीकोशस्य प्रमाणमपि दत्तम्, यत् तस्मिन् कोशे कक्षशब्दस्य गुल्मार्थप्रतिपादनं कृतमिति।[३२] यतो हि मल्लिनाथस्येयमेव प्रतिज्ञाऽऽस्ते यन्नामूलं लिख्यते किञ्चिदिति।

---

[३१] असन्तुष्टा द्विजा नष्टाः सन्तुष्टाश्च महीभुजः।
सलज्जा गणिका नष्टा निर्लज्जा च कुलाङ्गना।। - इति मल्लिनाथः ॥
**शिशुपालवधम्;** निर्णयसागरप्रेस; पृ. ३९.

[३२] 'कक्षस्तु गुल्मे दोर्मूले पापे जीर्णवने तृणे' इति वैजयन्ती ।। - इति मल्लिनाथः ।।
**शिशुपालवधम्;** निर्णयसागरप्रेस; पृ. ४२.

तात्पर्यमिदमेव समानार्थिशब्दैः क्वचिद् विवेचनं सरलं भवति, तथैव क्वचित् काठिन्यमपि प्राप्नोति। परं समानार्थिनश्शब्दा दातव्या इति तेषां कर्तव्यमिति मत्वा मल्लिनाथः प्रतिज्ञाबद्धः, तथा च वल्लभदेवेन मन्यते यद् वाचकानामर्थप्राप्तिर्जाता तर्हि समानार्थिशब्दा निरर्थका इति।

**अन्यदाभूषणं पुंसः शमो लज्जेव योषितः।**
**पराक्रमः परिभवे वैयात्यं सुरतेष्विव॥२–४४॥**

पद्यमिदं द्वितीयसर्गे बलरामेणोच्यते। तस्मिन् तस्य विचारा एवं प्रकारेण प्रकटिता भवन्ति। यथा - अन्यस्मिन् प्रसङ्गे नारीणां यथा लज्जा भूषणं भवति, तथैव पुरुषस्य क्षमा भूषणं कथ्यते; किन्तु यथा रतिक्रीडाप्रसङ्गे नारीणां निर्लज्जत्वं, तथैव परिभवकाले पुरुषस्य पराक्रमो भूषणम्।

अत्र वल्लभदेवेनैको दोषो दृश्यते, तद्यथा - नियमानुसारं यस्मिन्कस्मिन्नपि पद्ये यदोपमाऽलङ्कारो भवति, तदोपमेयोपमानयोर्लिङ्गेनैकेन भवितव्यम्। तथा च विशेषणविशेष्ययोरपि विभक्त्या लिङ्गेन चैकेनैव भवितव्यम्।[३३] परं पद्येऽस्मिन् लज्जाशब्दः स्त्रीलिङ्गे तथा च भूषणशब्दो नपुंसकलिङ्गे तस्मादत्र भिन्नौपम्यं दोषायेति वल्लभदेवमतम्। ततस्तेनैव तत्समाधानं दर्शयता लिख्यते यत् श्लोकेऽस्मिन् भूषणशब्दोऽविशिष्टलिङ्गो वर्तते। अर्थात् सामान्यशब्दाः गुणवाचकाः क्रियावाचकाश्च भवन्ति। अतो वल्लभदेवेन यल्लिख्यते तस्येदं तात्पर्यं यथा - भूष्यतेऽनेनेदं भूषणमित्यर्थः। एवमत्र भूषणशब्दः क्रियावाचकस्तस्मादत्र न कश्चिदपि भिन्नलिङ्गौपम्यदोषः। अत्र रुद्रटश्च प्रमाणमित्यप्युक्तम्।

**अकृत्वा हेलया पादमुच्चैर्मूर्धसु विद्विषाम्।**
**कथंकारमनालम्बा कीर्तिर्द्यामधिरोहति॥(२-५२)**

द्वितीयसर्गस्यास्मिन्पद्ये बलरामेणोच्यते यत् कीर्तिस्त्वालम्बहीना वर्तते, तस्मात्सा केन प्रकारेण स्वर्गं यास्यति। अतो यदि कीर्तिः स्वर्गं गच्छत्विति मनस्यभिलाषा तर्हि शत्रूणां शिरच्छेदं कुरुत। तच्छिरःसु पादं संस्थाप्य सा स्वर्गं यास्यति।

---

[३३] यल्लिङ्गं यद्वचनं या च विभक्ति विशेष्यस्य।
तल्लिङ्गं तद्वचनं सा च विभक्तिर्विशेषणस्य॥ ( कस्यापि)

पूर्वलिखित: पद्यार्थस्तु सामान्यस्तस्मात् नायं चर्चाया विषयः। परं यथा कीर्तिः कथं स्वर्गं प्राप्स्यतीति विलिख्य कविना, "पुरुषेण कथं प्रगतिः करणीया, कथं वा यश: प्राप्तव्यम्" इति कीर्तिमत: पुरुषस्य व्यवहारो निर्दिष्ट:। कारणं कीर्तिस्तु गुणः, तत्र सजीवारोपणं कृत्वा नारीरूपकं कविना दत्तम्। अतस्तत्र कीर्तिमिच्छता जनेन कीदृशो व्यवहारः कर्तव्य इति निर्दिष्टम्। जीवत्सु शत्रुषु न कश्चिदपि कीर्तिमधिगच्छतीतिभावः। उभावपि टीकाकारौ चैतन्मतं स्वीकुरुतः। वल्लभदेवमल्लिनाथयोः शब्दावल्येव भिन्ना भावस्त्वेक एव।[३४]

अत्रैतदर्थं प्रतिपाद्य मल्लिनाथस्तु विशेषार्थं प्रतिपादयन् लिखति, यदत्र समासोक्त्यलङ्कारेणान्यस्यार्थस्यापि परोक्षप्रतीतिर्जायते। समासोक्त्यलङ्कारे सर्वाण्यपि विशेषणानि श्लिष्टानि भवन्ति। अतः कीर्तिर्निरालाम्बा सत्यालम्बं कामयते, तथैव नार्यपि निरालम्बा सत्यालम्बमिच्छति।[३५] कीर्तिरपि पदन्यासेनैव नार्यपि पदविन्यासेनैव शोभते।[३६] कीर्तिसंरक्षणाय शत्रुनाशोऽनिवार्यस्तथैव नारी सम्मानरक्षणायारिनाशोऽनिवार्यः।

अतस्तयोर्मध्ये साम्यं वर्तते। तच्च साम्यं कवेरप्यभिमतमेतस्मात् कारणादत्र समासोक्त्यलङ्कारेण कीर्तिवर्णनात् प्रासादारोहणं कुर्वत्या नार्या व्यवहारोऽपि प्रतीयते। अयञ्च व्यवहारो वाचकैर्वल्लभदेवटीकया ज्ञातुं न शक्यते, परं मल्लिनाथेनेतादृशो व्यवहारो दर्शित:।

**अङ्काधिरोपितमृगश्चन्द्रमा मृगलाञ्छनः।**
**केसरी निष्ठुरक्षिप्तमृगपूगो मृगाधिपः॥२-५३।।**

द्वितीयसर्गे मन्त्रणासमये बलरामेणेदं पद्यमुच्यते। बलरामो बलस्य प्रशंसां क्षमानिन्दां च कुर्वन्नाह । यथा - येनाङ्के हरिणो रक्षितः स ताराधिपो मृगलाञ्छन उच्यते। अर्थात् तस्य मृगरक्षणं कलङ्कायेति भावः। अपरञ्च येन निर्दयं

---

[३४] अत्र च कीर्तिकीर्तिमतोरभेदविवक्षायां कीर्तिमत्पुरुषस्य व्यापारोपणात् समानकर्तृत्वसद्भावः ॥ - इति वल्लभदेवः ।।
**शिशुपालवधम्;** सैव श्रीनगरस्यावृत्ति:; पृ. ६३.
कीर्तितद्वतोरभेदोपचारात्समानकर्तृतानिर्वाहः॥ - इति मल्लिनाथः ॥
**शिशुपालवधम्;** निर्णयसागरप्रेस; पृ. ४५.

[३५] अनाश्रया न शोभन्ते पण्डिता वनिता लताः।(कस्यापि )

[३६] किं तया कवितया राजन् ! किं तया वनितया तथा।
पदविन्यासमात्रेण मनो नापहृतं यया॥ ( कस्यापि )

हरिणसमूहा हतास्तादृशः सिंहो मृगाधिपतिरुच्यते। यद्यपि मृगानासमन्ततः पाति स एव मृगाधिपतिपदमर्हति, परं संसारे विपरीतमेतत्। एतस्येदमेव तात्पर्यं यद् यदि जगति कीर्तिर्हस्तगता कर्तव्या तर्हि बलप्रभाव एव श्रेयस्कर इति भावः।

अत्र यदि सूक्ष्मेक्षिकया निरीक्षणं क्रियते तर्हि - मृगलाञ्छनं चन्द्रमसो विशेषणं वर्तते। श्लोकेऽस्मिन् चन्द्रमसो लक्ष्म विशेषमहत्त्वं धारयति। परं तल्लक्ष्मविषये भिन्नानि मतानि प्रवर्तन्ते।[३७] तत्र मुख्यतया केचन मृगलक्ष्म कथयन्ति, केचन शशलक्ष्म वदन्ति। प्रसङ्गानुसारं चन्द्रमसो मृगलाञ्छनविशेषणं सापेक्षमस्ति। तस्मादत्र चन्द्रमसोऽङ्कस्य मृगार्थ एवोचितः, परं वल्लभदेवेनात्र मृगाङ्कस्य शशाङ्कार्थग्रहणं क्रियते तन्नोचितम्।[३८] यद्यपि मल्लिनाथेनात्र मृगलाञ्छनस्य मृगाङ्क एवार्थो विहितः।[३९] शशाङ्कोऽपि चन्द्रमस एव पर्यायः परमत्र मृगस्यार्थः सिंहपक्षे सङ्गतस्तस्मात् तन्नोचितम्।

अनेनेदमपि सम्भवति यद् वल्लभदेवस्यैकक्षणपर्यन्तं ध्यानापकर्षणं जातं स्यादथवा येन केनापि प्रकारेण पर्यायो दातव्यो भवतु स सङ्गतोऽसङ्गतो वा। मल्लिनाथेनार्थस्य सम्यक् चिन्तनं कृत्वा मृगस्यार्थपरिवर्तनमनर्थकमिति मत्वा पर्यायदानं त्यक्तम्। मल्लिनाथो विशेषं सावधानस्तस्मात् स पर्याय लेखनावसरेऽर्थं चिन्तयन्ति।

मल्लिनाथेनात्र सिंहचन्द्रयोरुदाहरणाभ्यां क्षमा न श्रेयसे, परं युद्धेन चैद्यवध एव श्रेयस्कर इति ज्ञातव्यम्। न माघेनेदमुक्तं, किन्तु मल्लिनाथेनायमर्थो दर्शितः। अत्र मृगसिंहयोर्वर्णनमप्रस्तुतं तेन प्रस्तुतमन्त्रणायां प्रस्तुतस्य चैद्यवधार्थग्रहणं योग्यम्। तस्माच्चात्राप्रस्तुतप्रशंसाऽलङ्कारः।[४०]

---

[३७] नेदं नभोमण्डलमम्बुराशिर्नैताश्च तारा नवफेनभङ्गाः।
नायं शशी कुण्डलितः फणीन्द्रो नासौ कलङ्कः शयितो मुरारिः।।
**साहित्यदर्पणः** (१०–१०); पृ. ७३५.

[३८] सम्पर्कात् शश एव तस्य मलं सम्पन्नमित्यर्थः॥ - इति वल्लभः ॥
**शिशुपालवधम्;** सैक श्रीनगरस्यावृत्तिः, पृ. ६३.

[३९] अङ्गमुत्सङ्गमधिरोपितो मृगो येन स चन्द्रमा: मृगलाञ्छन: मृगाङ्कः॥ - इति मल्लिनाथ: ॥
**शिशुपालवधम्** निर्णयसागरप्रेस, पृ. ४५.

[४०] सामान्यं वा विशेषेण विशेषस्तेन वा यदि।
कार्यं च कारणेनेदं कार्येण च समर्थ्यते॥ १०-६१ ।।
**साहित्यदर्पण:** (१०-६१); पृ. ७९९.

श्लोकस्यार्थविवेचनं यद्यपि वल्लभदेवान्मल्लिनाथस्य नाधिकं न्यूनं वर्तते। तथापि विशेषार्थप्रतिपादनेनालङ्कारचर्चया च वैशिष्ट्यं तनुते।

**स्पृशन्ति शरवत्तीक्ष्णाः स्तोकमन्तर्विशन्ति च।**
**बहुस्पृशाऽपि स्थूलेन स्थीयते बहिरश्मवत्॥(२-७८)**

द्वितीयसर्गस्य श्लोकेऽस्मिन् उद्धवेन मन्त्रणावसरे कथ्यते। यत् – श्रीकृष्ण ! तीक्ष्णा बुद्धयः स्वल्पं स्पृशन्ति, परं बहुप्रवेशमन्तःकुर्वन्ति। कथमिवेति तर्हि बाणा इव। कारणं शरा बहिः स्वल्पमेव स्पृशन्ति, परं बहुव्रणमन्तर्भागे कुर्वन्ति। तद्विपरीतं जडबुद्धयो बहु स्पृशन्ति, परं बहिरेव तिष्ठन्ति, अर्थात् मर्मस्पर्शं न कुर्वन्ति, कथमिवेत्यपेक्षायां पाषाणवत्। यथा पाषाणखण्डः क्षिप्यते, स बहिरेव तिष्ठति, नान्तःप्रवेशं लभते।

एतस्य श्लोकस्य भावस्तु मन्दानां प्रयत्ना बहुविधा भवन्ति, परं स्थूलप्रयत्नैर्मर्म प्राप्तिर्भवितुं नार्हति। तद्विरुद्धं तीक्ष्णबुद्धयः स्वल्पप्रयत्नान्कुर्वन्ति, परं मर्मप्राप्तिं कर्तुं शक्नुवन्ति। तात्पर्यं बलरामस्य बुद्धिः केवलं युद्धमेव पश्यति। न तत्र सूक्ष्मदष्टिर्जाड्यत्वात्, स केवलं शूरः, एवञ्च मन्त्रणायां तीक्ष्णबुद्धेरावश्यकता।

अत्र मल्लिनाथः कथयति स्वल्पस्य प्राप्तये बहुयत्नो हास्यास्पदो भवति। नैतत्स्फुटं दृश्यते। तेन स्पष्टं कर्तुं लिखितं मूषकस्यान्वेषणाय पर्वतखननं नोचितम्।[४१] अत्र स्थूलबुद्धेर्निरर्थकत्वं तथा तीक्ष्णबुद्धेः साफाल्यमेवोक्तमतः प्राङ्गानुरूपं नात्रार्थघटने यथातथोदाहरणं संगच्छते। अत्र श्लोकार्थकथने मल्लिनाथाद् वल्लभदेवो विशेषतः सावधान इति भावः।

**आरभन्तेऽल्पमेवाज्ञा कामं व्यग्रा भवन्ति च।**
**महारम्भाः कृतधियस्तिष्ठन्ति च निराकुलाः॥(२-७९)**

द्वितीयसर्गे श्लोकोऽयमुद्धवेन मन्त्रणावसरे कथ्यते। तत्र मूढा बुद्धिमन्तश्च कीदृशा भवन्ति। तेषां कार्यशैलीं विलोक्योद्धवेन कथ्यते यद् मन्दधियो मनुष्याः स्वल्पं कर्म कुर्वन्ति। तथा च विशेषतो व्यग्रा भवन्ति। तात्पर्यं बुद्धिर्बलादतिरिच्यते।

---

अप्रस्तुतप्रशंसा स्यात्सा यत्र प्रस्तुतानुगा।
कार्यकारणसामान्यविशेषादेरसौ मता ॥ - इति जयदेवः ॥
**चन्द्रालोकः** (५-६६); पृ. १४७–१४८.

[४१] मूषकग्रहणाय शिखरिखननं परिहासास्पदं भवतीति भावः॥- इति मल्लिनाथः ।।
**शिशुपालवधम्;** निर्णयसागरप्रेस; पृ. ५३.

श्लोकेऽस्मन् वल्लभदेवमल्लिनाथयो: समाने टीके; परं वल्लभदेवेन क्वचित् काव्येऽर्थचमत्कृत्यर्थं दृष्टान्तेन दृढीकरणं विचार्यते। यदा मन्दाः स्वल्पं कर्म कुर्वन्ति, परमधिकव्यग्रा भवन्ति। केन प्रकारेणेति चेत्, दीपवत्। यथा दीपक: स्वल्पप्रकाशं ददाति,परं तस्य ज्योतिस्तु चञ्चलायते। तद्विपरीतं सूर्योऽधिकप्रकाशं ददाति, स्थिरश्च भवति। तद्वदेव महान्त: जना भवन्ति।

अनेन ज्ञायते यत् क्वचित् वल्लभदेवः काव्ये परिवर्तनमिच्छति, विशेषवाक्यरचनया चमत्कृतिं कर्तुं यतते च।

प्रथमसर्गस्य 'गतं तिरश्चीन........' (१-०२) श्लोकेऽप्यस्माभिरेतद् विलोकितमेव। अतो वल्लभदेवस्येदं वैशिष्टयम्।

**तेजः क्षमा वा नैकान्तात् कालज्ञस्य महीपतेः।**
**नकमोजा: प्रसादो वा रसभागविद: कवे:। (२-८५)**

माघकाव्यस्य द्वितीयसर्गस्य श्लोकेऽस्मिन् मन्त्रणावसरे कृष्णबलरामानन्तरमुद्धवेनोच्यते यत् - समयं जानता राज्ञा न केवलं शौर्यमेव स्वीकार्यम्, न च केवलं क्षमैवाश्रयणीया। अर्थादुभयमेव यथाकालं स्वीकार्यमिति भाव:।

एतत्कथनं दृढीकर्तुमुदाहरति। यथा योग्यो रसज्ञः कविः केवलं प्रौढप्रबन्धत्वं वा केवलं सुकमारप्रबन्धत्वं न स्वीकरोति। परं यथारसं काव्यरचनायां प्रौढत्वं सुकुमारत्वञ्च स्वीकरोतीति भाव:।

गुणा रीतयो रसाश्च परस्परं सम्बद्धा भवन्ति।[४२] केन रसेन सह का रीतिः स्वीकार्या, कया रीत्या सह को गुणः स्वीकार्य एतदर्थं काव्यशास्त्रे तज्ज्ञैर्नियमा लिखितास्सन्ति। सुकवयो यथाप्रसङ्गं रसरीतिगुर्णांश्च योजयन्ति।

---

[४२] गुणाः–रसस्याङ्गित्वमाप्तस्य धर्माः शौर्यादयो यथा। गुणाः – यथा खल्वङ्गित्वमाप्तस्यात्मन
उत्कर्षहेतुत्वाच्छौर्यादयो गुणशब्दवाच्याः।
माधुर्यमोजोऽथ प्रसाद इति ते त्रिधा। (८-१)
**साहित्यदर्पण:** पृ. ६४२.
रीतय:-पदसंघटना रीतिरङ्गसंस्थाविशेषवत्।
वैदर्भी चाथ गौडी च पाञ्चाली लाटिका तथा। (९-१)
**साहित्यदर्पण:** पृ. ६५७.
रसा:-विभावेनानुभावेन व्यक्तः संचारिणा तथा।
रसतामेति रत्यादिः स्थायीभावः सचेतसाम्।। १ ।।

श्लोकेऽस्मिन् पाठभेदो वर्तते। कुत्रचित् 'रसभावविदः' इति लिखितश्च कुत्रचित् 'रसभागविदः' इति पदं स्वीकृतमस्ति। रसभावविद:, रसभागविद: उभयमप्येतद्विशेषणमस्ति कवे: इति पदस्य।

वल्लभदेवोऽत्र 'रसभागविद:' इति स्वीकरोति[४३], मल्लिनाथोऽत्र 'रसभावविद:' इति स्वीकरोति। प्रथमन्तावद् वल्लभदेवमतं विचार्यते। तद्यथा - वलभदेवेनात्र 'रसभागविद:' इति पाठ: स्वीकृतस्तदर्थञ्च तेन लिख्यते यत् स एव पाठ उचित: कारणं भागस्यार्थस्तु "विषयो" भवितुमर्हति, परं यद्यत्र 'भाव' इति स्यात् तदा तस्यार्थस्तु रसो भवति, तस्मात् 'रस' इति शब्दस्य साहचर्ये सति 'भाव' इति पाठः न ग्राह्यः। वल्लभदेवो यद्यपि द्वितीयमपि भावपाठं वेत्ति, परं तत्रार्थस्य हेतोरभावे स पाठो न तेन स्वीकृतः।

मल्लिनाथेनात्र 'रसभावविद:' एव पाठस्स्वीकृत:। स्मरणीयं यत् मल्लिनाथेन वल्लभदेवेन न स्वीकार्यमिति लिखितं तत्पठित्वापि तद्विरुद्धमेव मतं स्वीकृतम्। तस्मादेतत्तु सत्यं प्रतीयते यद् द्वाविमौ क्वचित् विभिन्नमतौ स्तः। मल्लिनाथस्य समाधानं यथा - व्यवहारेषु यथा वयं कतिपयशब्दानां साहचर्यं स्वीकृत्य निरर्थकमप्युच्चारणं कुर्मस्तथैवात्रापि ज्ञेयम्।[४४]

उभयोर्मतयोर्मध्ये वल्लभदेवस्य मतं युक्तियुक्तं प्रतिभाति। वल्लभदेवस्य कथानुसारं यदि पुनरुक्तिदोष: त्याज्य: स्यात्तर्हि 'रसभागविद:' इत्येव पाठ: स्वीकार्यः। अन्यथा 'रसभावविदः' इति मल्लिनाथमतस्य स्वीकरणे 'रस' शब्देन सह प्रयुक्तस्य 'भाव' इति शब्दस्यापि रसरूपार्थे पर्यवसानं दोषावहं भविष्यति।

---

**साहित्यदर्पण:** (३-१), पृ. ९९
लोकोत्तरचमत्कारप्राणः कैश्चित् प्रमातृभि:।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः।। (३-३)
**साहित्यदर्पण:** पृ. १०५.

[४३] केचित्तु रसभावविद इति पठन्ति, तत्पुनर्न युज्यते॥ - इति वल्लभः ॥

**शिशुपालवधम्;** सैव श्रीनगरस्यावृत्ति:; पृ. ७५.

[४४] भावग्रहणं सम्पातायातम्॥ इति मल्लिनाथः ।।

**शिशुपालवधम्;** निर्णयसागरप्रेस; पृ. ५४.

अत्र वक्ता स्वयमुद्धवो यो नैकमपि शब्दं निरर्थकं वक्तुं जानाति। तस्य भणितिषु सर्वत्र लाघवं दृश्यते। य: परमो वैयाकरण एव निरर्थकमेकमक्षरमपि हातुमिच्छति स कथमेकम्पदं निरर्थकं ब्रूयात्। कारणमेतत् तु सर्वविदितं यत् 'अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणा:'। अपरञ्च व्यवहारेषु सामान्यजनास्त्वनेके भवन्ति, परं कतिपयजना एव सुज्ञा भवन्ति। अतो वल्लभदेवोक्तौ सुज्ञजनस्य व्यवहार इवापवादरूपेण राराज्यते। नियमापवादयोर्मध्येऽपवादा बलवत्तरा भवन्त्यतो वल्लभदेवमतमेव युक्तियुक्तं प्रतिभाति।

**उपेयिवांसि कर्तार: पुरामाजातशात्रवीम्।**
**राजन्यकान्युपयज्ञैरेकार्थानि चरैस्तव॥(२-११४)**

शिशुपालवधस्य द्वितीयसर्गस्य श्लोकेऽस्मिन् मन्त्रणावसरं प्राप्तेनोद्धवेन यज्ञावसरे गुप्तचराणां कौशलं प्रकटीक्रियते।

अस्य श्लोकस्य सामान्यार्थस्तु - यदि युधिष्ठिरपुरीं वयं गमिष्यामस्तर्हि तत्रान्ये हिताहितचिन्तका राजान आगमिष्यन्ति तान् सामदामदण्डभेदैः तव गुप्तचरा अनुकुलान् विधास्यन्ति। एतादृशोऽर्थो वल्लभदेवस्य टीकया प्राप्यते कारणं तेन श्लोकस्यास्यान्वयः क्रियते। यथा - हे कृष्ण ! तव चरैः राजन्यकानि एकार्थानि (किंविधानि) आजातशात्रवीम् उपेयवांसि (कथमेतानि वशं नेष्यन्ति चेत्) उपायज्ञैः चरैः। अर्थात् हे कृष्ण ! तव उपायज्ञैः चरैः आजातशात्रवीमुपेयवांसि राजन्यकानि एकार्थानि कर्तारः। अनेनान्वयेन गुप्तचराणां कर्म वैशिष्ट्यं धारयति। तत्र यज्ञेऽनेके राजान आगमिष्यन्ति। तत्र कतिपयनृपा अनुकूला भविष्यन्ति, परं केचन प्रतिकूला अपि भविष्यन्ति। तेषां प्रतिकूलानां राज्ञां चराः प्रकृतिं ज्ञास्यन्ति। ततस्ते यथाप्रकृति तान् वशीकरिष्यन्ति, यतो हि ते चतुराश्चरास्सन्ति।

मल्लिनाथस्यान्वयं विचिन्त्यार्थज्ञानं विधीयते तर्हि उपायज्ञैः तव चरै: एकार्थानि राजन्यकानि आजातशात्रवीम् उपेयिवांसि कर्तारः। अनेनान्वयेनार्थश्चिन्त्यते तदा कार्यकुशलास्ते गुप्तचरास्त्वया सहैकप्रयोजनानि राजन्यकानि आजातशात्रवीं प्रापयिष्यन्ति । अर्थात् वयं यज्ञार्थं यास्यामश्चेत् तस्मात्पूर्वं त्वदीया: कुशला अर्थात् कृत्याकृत्यचतुरा गुप्तचरा ये राजानोऽस्माकं सुहृदोऽनुकूला वा तान् तत्रानेष्यन्तीति भाव:।

इत्थं कस्मात् भवति तर्हि वल्लभदेव: 'एकार्थानि कर्तार:' इत्यन्वयं स्वीकृत्यार्थघटनं करोति। उभावपि टीकाकारौ स्वस्वस्थानयोग्यौ स्तः। तथापि

परमं चिन्तनं विधीयते तदा वल्लभदेवस्यान्वयार्थो योग्यो भाति। तत्र कारणत्रयं वर्तते। प्रथमन्त्वेतदेव ये अनुकूला एव राजानः सन्ति, ते त्वनुकूला एव भविष्यन्ति तत्र तेषामुपस्थित्या न विशेषलाभ: प्राप्यते। एवञ्च द्वितीयं कारणं यदनुकूलान् नृपान् अनुकूलीकुर्वन्ति चेत् ते चरा उपायज्ञा: कथम् ? न तेषां तत्र किमपि प्रावीण्यं दृश्यते तथा च उपायज्ञपदं निरर्थकमेव स्यात्। तृतीयं कारणं 'य इहात्मविदो विपक्षमध्ये......' श्लोकस्यार्थोऽपि वल्लभदेवकृतार्थमेव दृढयति।[४५] अपरञ्च मल्लिनाथस्यार्थ: काठिन्यं धारयतीति न सहजसिद्धः।

वल्लभदेवस्यार्थस्य तात्पर्यं यद् ये तत्र राजान आगमिष्यन्ति, तेषु येऽनुकूलास्ते तु सहायका भाविष्यन्त्येव। परं ये प्रतिकूला: सन्ति तानपि प्रसङ्गेऽस्मिन्ननुकूलान् करिष्यन्ति नश्चराः।

मल्लिनाथस्य तात्पर्यं यज्ञहेतुमाश्रित्य वयं तत्रैकत्रिता भविष्यामः, युद्धव्यूहरचनां च विचारयिष्यामः। परमेतत् तु यत्र कुत्रापि शक्यमेव परं नीतिविचारं कुर्मश्चेत् वल्लभदेवस्यार्थो नितान्तं यथार्थोऽकृत्रिमो युक्तियुक्तो न्याय्यश्च।

✵✵✵

[४५] य इहात्मविदो विपक्षमध्ये सह संवृद्धियुजोऽपि भूभुजः स्युः।
बलिपुष्टकुलादिवान्यपुष्टैः पृथगस्मादचिरेण भाविता तैः।। २-११६ ।।
**शिशुपालवधम्;** निर्णयसागरप्रेस; पृ. ६४.

# प्रकरणम्- ७

# यात्रावर्णनम्

## सर्गः- ३

## पुरीप्रस्थानम्

शिशुपालवधमहाकाव्यस्य तृतीयसर्गे महाकविना माघेन युधिष्ठिर-यज्ञगमनोत्सुकस्य भगवतः श्रीकृष्णस्य वर्णनम्; तथा च द्वारवतीवर्णनं समुद्रवर्णनं सेनावर्णनञ्च कृतम्।

तृतीयसर्गे वल्लभदेवमल्लिनाथयोर्विवेचने शैलीं विहाय महदन्तरं नास्ति। परं पूर्ववदुपमोत्प्रेक्षाविषये द्वयोरपि मतभेदस्तृतीये सर्गेऽपि यथावत् स्थितः।[१] श्लेषसमासोक्तिविषयेऽपि तथैव मतभेदः, विरोधकाव्यलिङ्गयोरपि तथैव ज्ञेयः।[२] समानार्थिशब्देषु वल्लभदेवविवेचने पश्चात्काठिन्यं दृश्यते[३]। ध्वन्यर्थविषये मल्लिनाथस्य विचारा नितरां प्रशंसनीयाः। अन्यत्तु पूर्ववदर्थज्ञानं वल्लभदेवटीकायाः सरलतया भवितुमर्हति, तदपेक्षया मल्लिनाथस्य विवेचने शास्त्रावरोधो भवति। वल्लभदेवेनापि शास्त्रचर्चा क्रियते, परमर्थलेखनानन्तरं क्रियते, तस्मात् बाधा न भवति। मल्लिनाथस्य विवेचनेऽप्येको लाभस्तु दृश्यते, स यथा मध्ये यत्र वाचकस्य मनसि शङ्का भवेत्, तत्रैव तत् समाधानं प्राप्यते, तेनाग्रेऽन्वेषणं करणीयं न भवति। एवं परमार्थतस्तु सारल्यं वा काठिन्यं वाचकस्य रुच्यनुसारं भवति। पूर्वरूपेणोभयोरपि टीकाकारयोर्मतभेदो दृश्यते।

**उभौ यदि व्योम्नि पृथक्प्रवाहावाकाशगङ्गापयसः पतेताम्।**
**तेनोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः।। (३-८)**

मन्त्रणानन्तरं तृतीयसर्गे कविवरो माघो युधिष्ठिरनगरीं गन्तुकामस्य भगवतः कृष्णस्य वर्णनं करोति। श्यामसुन्दरेण भगवता कृष्णेन मुक्ताहारो धृतस्तदा स कीदृगशोभतेति वर्णनविषयः। यदि गगने गगनगङ्गायाः द्वौ प्रवाहौ

---

[१] विशेषं ज्ञातुं पद्यं विलोकयतु-10।
शिशुपालवधम्; (३-१०) (चौखम्बा) पृ. १०८

[२] तदर्थं श्लोकं विलोकयतु-३२।
शिशुपालवधम्; (३२-२) (चौखम्बा) पृ. ११८.

[३] जनौघा = लोकपूगाः – वारीधिवारी = समुद्रार्णः श्लोकः – ३१-३७
शिशुपालवधम्; (३-३३/३३७) (चौखम्बा) पृ. ११७/१२०.

वहेतां  तर्हि तेन गगनेन सहालङ्कृतमुक्ताहारं भगवतो वक्षः यत् तमालवृक्षश्यामं वर्तते  तत् तुलनां प्राप्नुयात्।

भगवानपि भूषणभूषितो वर्तते, काव्यमपि सुन्दरालङ्करैरलङ्कृतमस्ति। तत्रालङ्कारचर्चां कुर्वद्भिरस्माभिरादौ वल्लभदेवमतं  प्रस्तूयते। यद्यपि तस्य स्पष्टं तु मतं न दृश्यते, तथापि तेनास्मिन् पद्ये उपमालङ्कारः  स्वीकृत इव भाति।[४] कथमिति जिज्ञाशायां वल्लभदेवेन लिख्यते “सदृशीक्रियेतेति तु उपमा” अर्थात् पद्ये ‘उपमीयते’ पदमस्ति तस्यैवार्थमादाय तेनोपमा स्वीकृता। ततश्च  कृष्णस्य वक्षस आकाशमुपमानं मुक्तावल्या गङ्गाप्रवाहौ तथा विवेचनं कृत्वोपमालङ्कारं स्पष्टं कर्तुं यत्नोऽपि विहितः। परमत्र तथा गगनगङ्गा न वर्तते, गङ्गायाः द्वौ प्रवाहौ कल्पनाजनितौ स्तः, तस्मादत्र तथाविधा सम्भावना दर्शिता, अतो नात्रोपमालङ्कारः। यदि वल्लभदेवेन ‘तमालनीलं वृक्षः’ तत्रोपमा कथ्यते चेल्लुप्तोपमा भवितुमर्हति कारणं तमालं नीलमेव भवति। गङ्गाया द्वौ प्रवाहौ कल्पितौ तस्मात् सम्भावितत्वादत्र नोपमाऽलङ्कारः।

अथ मल्लिनाथमतं विचार्यते- मल्लिनाथेनात्र  अतिशयोक्तिरलङ्कारः स्वीकृतः। अतिशयोक्त्यलङ्कारस्तत्र भवति, यत्र प्रस्तुतविषयस्योपमानेन निगरणं कृत्वैक्यस्य निश्चयो भवति तत्[५], प्रस्तुतस्यान्यत्वस्य कथनं भवति। तद्यदि शब्दार्थसहकारेण कल्पना भवति, तच्च कार्यकारणयोर्विपर्ययो भवति, तत् सर्वमेवातिशयोक्तिः कथ्यते।

अस्मिन्पद्येऽपि “यदि” शब्देनैव कल्पना कृता। यथा- गगने यदि गगनागङ्गायाः द्वौ प्रवाहौ वहेतां तदा मुक्तावल्यलङ्कृतस्य वक्षसस्तुलना गगनं

---

[४] साधर्म्यमुपमा भेदे।
उपमा नोपमेययोरेव न कार्यकारणादिकयोः साधर्म्यं भवतीति, तयोरेव समानेन धर्मेण सम्बन्ध उपमा। भेदग्रहणमनन्वयव्यवच्छेदाय।। - इति मम्मटः ।। काव्यप्रकाशः पृ. २९

[५] निगीर्याध्यवसानं तु प्रकृतस्य परेण यत्।
प्रस्तुततस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम्।।
कार्यकारणयोर्यश्च पौर्वापर्यविपर्ययः।
विज्ञेयातिशयोक्तिः सा।।
**काव्यप्रकाशः** पृ. ३७५.
विवक्षया विशेषस्य लोकसीमातिवर्तिनी।
असावतिशयोक्तिः स्यादलंकारोत्तमा यथा।। दंडी।।
**काव्यादर्शः** (२-२१४) पृ. ६४

प्राप्नुयात्। अत्र यदि शब्देन सम्भावना दर्शिता, तस्मात् अतिशयोक्तिस्तु सिद्धा एव वर्तते।

अपरञ्च मल्लिनाथेनालङ्कारसर्वस्वकारस्योद्धरणं दत्त्वा "पुष्पं प्रवालोपहितं यदि"........कुमारसम्भवस्य पद्यस्योल्लेखः कृतः[६]। तदेव पद्यं काव्यप्रकाशस्य विवेचने प्राप्यते, तेनापि स्पष्टोऽप्यतिशयोक्त्यलङ्कारो विशेषतः स्पष्टो भवति। माघेऽलङ्कारविमर्शेऽपि पद्येऽस्मिन्नतिशयोक्तिर्दर्शिता[७]।

पूर्वव्याख्ययाऽन्यग्रन्थप्रमाणैश्चेदं स्पष्टमेवात्र पद्ये अतिशयोक्यलङ्कार एव न तूपमालङ्कारः।

**प्रसाधितस्यास्य मधुद्विषोऽभूदन्यैव लक्ष्मीरिति युक्तमेतत्।**
**वपुष्यशेषेऽखिललोककान्ता साऽनन्यकामा ह्युरसीतरा तु।। ३-१ २।।**
**कपाटविस्तीर्णमनोरमोरःस्थलस्थितश्रीललनस्य तस्य ।**
**आनन्दिताशेषजना बभूव सर्वाङ्गसङ्गिन्यपरैव लक्ष्मीः।।।। ३-१ ३।।**

पूर्वलिखतं पद्यद्वयमपि तृतीयसर्गे यथाक्रममायाति। इन्द्रप्रस्थं प्रस्थातुकामस्य भगवतः कृष्णस्य शोभावर्णनं वर्तते। प्रथमश्लोकस्यार्थो विचार्यते तर्हि शृङ्गारं कृतवतोऽस्य मधुसूदनस्य लक्ष्मीः (शोभा) तस्मिन्कालेऽन्यैवावर्तत,तत् तथ्यमेव; कारणं तस्य समस्तदेहस्थितेयं लक्ष्मीस्तु कस्यचिदन्यस्य प्रिया न भवति।

अन्यश्लोकार्थचिन्तनं क्रियते तर्हि यस्य कपाटविशाले मनोहरे च वक्षसि प्रियतमा लक्ष्मी- र्विराजते। तस्य हरेः सर्वाङ्गेषु विराजमाना सर्वजनानन्दप्रदा लक्ष्मीस्त्वन्यैव।

---

६ पुष्पं प्रवालोपहितं यदि स्यान्मुक्ताफलं वा स्फुटविद्रमस्थम्।
ततोऽनुकुर्याद्विशदस्य तस्याताम्रोष्ठपर्यस्तरुचः स्मितस्य।। १४४।।
**अलङ्कारसर्वस्वम्;** DR.V.RAGHAVAN; प्रका0 MEHARCHAND LACHHMANDAऽ; DELHI; ई. १९६५, पृ. ८२.

७ उभौ यदि व्योम्नि......।।३८।। अत्रासमबन्धेऽपि संभावनायां सम्बन्धकथनादतिशयोक्तिः।
**माघेऽलङ्कारविमर्शः** पृ. १४९.

यदि श्लोकद्वयस्यापि चिन्तनं क्रियते तर्हि नात्रार्थभेदः। यद्यपि माघो द्वितीये सर्गे लिखितवान्, शब्दार्थौ सत्कविरिव विद्वानपेक्षते[८], परमत्र न तथाभूतं किञ्चिदपि दृश्यते।

एकस्यैवार्थस्य केवलं शब्दरचनयैव पुनरुक्तिर्न युक्ता। किं वा स्थूणानिखननन्यायेनैकार्थं दृढीकर्तुं पुनरुक्तिः कृता स्यात्[९]।

तथाविधामेनामाशङ्कां दूरीकर्तुं वल्लभदेवो द्वादशश्लोकस्य टीकायां लिखति यत्[१०]- एकमेव पद्यं शब्दरचनाभेदं स्वीकृत्य पुनर्लिखितं परमर्थस्तु स एव। वल्लभदेवस्यैव मतं किञ्चित् विशेषं स्पष्टं कृत्वा त्रयोदशश्लोके मल्लिनाथेनापि लिखितं यत् कवयः शब्दसौन्दर्यं विशेषं स्वीकृत्य पुनरुक्तिं कुर्वन्ति[११]। तत्र च तेन नैषधीयचरितस्य 'निपीय यस्य.....' श्लोकस्योदाहरणमपि दत्तम्।

परं तत्र नैषधीयचरिते प्रथमश्लोके छत्रवर्णनं चान्यस्मिन् पद्ये दण्डवर्णनमिति भेदः[१२]। अत्र तु न कश्चानार्थभेदः प्रतीयते। परं वैयाकरणा अर्धमात्रालाघवप्रिया भवन्ति न तु कवयः। किन्त्वत्र निरर्थकमिति विचारणीयं भवति।

---

[८] नालम्बते दैष्टिकतां न निषीदति पौरुषे।
शब्दर्थौ सत्कविरिव द्वयं विद्वानपेक्षते।। १-८६ ।।
शिशुपालवधम् (१-८६) निर्णयसागररप्रेस; पृ. ५५.

[९] स्थूणानिखननन्यायः- अस्य न्यायस्य तदा प्रयोगः भवति यदा दृढीकरणं क्रियते, कारणं यदा कश्चित् स्तम्भारोपणं करोति तदा मध्ये हस्तेन दोलयन् पश्यति यदि आवश्यकं भवति तर्हि पाषाणखण्डान् क्षिपति पुनश्च ताडयति।
**संस्कृत-हिन्दीकोश;** सं वामनशिवराम आप्टे; प्रका0 मोतीलाल बनारसीदास; दिल्ली ई. १९६९, पृ. ५५८.

[१०] एतदेवालीढं कपाटेत्यादिपाठान्तरश्लोकान्तरं विद्यते।।- इति वल्लभदेवः।।
शिशुपालवधम् (३-१२); सैव श्रीनगरस्यावृत्तिः; पृ. ९७.

[११] प्रायेणैकारथमप्यनेकं श्लोकमुक्तिविशेषलाभाल्लिखन्ति कवयः।।-इति मल्लिनाथः।।
**शिशुपालवधम्**(३-३३);निर्णयसागरप्रेस; पृ. ६९.

[१२] निपीय यस्य क्षितिरक्षिणः कथास्तथाद्रियन्ते न बुधाःसुधामपि।
नलः सितच्छत्रितकीर्तिमण्डलः स राशिरासीन्महमां महोज्ज्वलः।।(१-१)
रसैः कथा यस्य सुधावधीरणी नलः स भूजानिरभूद्गुणोद्भुतः।
सुवर्णदण्डैकसितातपत्रितज्वलत्प्रतापावलिकीर्तिमण्डलः।। (१-२)
नैषधीयचरितम् (१-१/२); सं. दाधीयपण्डितशिवदत्तशर्मा,प्रका0 पाण्डुरङ्ग जावीजी; निर्णयसागरप्रेस; मुंबई. ई. १९२८, पृ. १/३.

कविनैकः श्लोको रचितः, पुनः कश्चिद्विचार आगतश्चेत् तेन सूत्रकारवत् पुनर्लिख्यते[१३]।

परं पुनरुक्तौ चमत्कृत्या भवितव्यं वा केनापि विशेषेण भवितव्यमथवा शब्दरचनायां चित्रेण भवितव्यम्। परमत्र न तथाविधं किमपि दृश्यते। सामान्यरूपेण पुनरुक्तियुक्तः श्लोक उत्तररचनाकारणात् सुन्दरो भवति, परन्त्वत्र पूर्वश्लोके शब्दसौन्दर्यं विशिष्टं दृश्यते।

एभिः पूर्वकथितकारणैः कदाचिदयं श्लोकः केनचिद्विदुषा प्रक्षिप्तः स्यादिति भावः।

**आकर्षतेवोर्ध्वमपि क्रशीयानत्युन्नतत्वात्कुचमण्डलेन।**

**ननाम मध्योऽतिगुरुत्वभाजा नितान्तमाक्रान्त इवाङ्गनानाम्।(3-15)**

तृतीयसर्गस्य श्लोकेऽस्मिन् भगवन्तं श्रीकृष्णं विलोकयितुमागवतीनां सुन्दरीणां सौन्दर्यवर्णनमस्ति।

तद्यथा- अङ्गनानां विशेषकृशमध्यप्रदेशः स्तनमण्डलानामुन्नतित्वाच्चोर्ध्वं गतोऽपि स्तनानामतिभारात् बलादेव नम्रीभूतः।

पद्येऽस्मिन् त्रयाणामलङ्काराणां सम्भावना दृश्यते यथा-उपमा, उत्प्रेक्षा,समाक्तिश्च। माघेऽलङ्कारविमर्शग्रन्थेनोपमागर्भा समासोक्तिःस्वीकृता[१४] ,तस्मादत्रोपमालङ्कारेणापि भवितव्यम्। कथञ्चेत् नारीणां मध्यः कुचमण्डलेन आक्रान्त इव ननाम। यदि कस्यचिज्जनस्योपरि भारः स्थाप्यते यदा तेन भारेण जनो वक्रीभवति, तथैवायं मध्यो नम्रीभूतः इति भावः। परमत्र तथाभूता न तुलना किन्तु सम्भावना दर्शिता यथा कश्चित् भारेण पीडित इव मध्यो ननाम। अतोऽत्रोत्प्रेक्षाऽलङ्कारः स्वीकार्यः[१५]। अन्यच्च वल्लभदेवेन मल्लिनाथेन चोत्प्रेक्षाऽलङ्कारः स्वीकृतः। अत एव द्विर्बद्धं सुबद्धमित्यपि न्याय्यम्। अत्रोऽत्प्रेक्षालङ्कारस्तु स्पष्ट एव वर्तते, तत्र न कापि शङ्का, परं मल्लिनाथेनात्र समासोक्तिरपि सूचिता। अनेन प्रकारेणात्र पद्येऽर्थद्वयं विचारणीयं समासोक्तित्वात्।

---

[१३] न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्तन्ते।।
महाभाष्यम्(१-५); सं. श्रीपण्डित युधिष्ठिरमीमांसकः, प्रका0 चौखम्बा विद्याभवन; वाराणसी;ई. १९६७; पृ. ६४.

[१४] समभेदकधर्मूला समासोक्तिः सा चोपमागर्भा।
माघेऽलङ्कारविमर्शः पृ. १९८.

[१५] सम्भावनमथोत्प्रेक्षा प्रकृतनस्य समेन यत् ।
**काव्यप्रकाशः पृ.** ३७.

यदा श्लिष्टविशेषणैः प्रकृतार्थेण सहाप्रकृतार्थस्यापक्यभिधानं भवति तदा समासोक्त्यलङ्कारो भवति[१६]। एतेषामलङ्काराणामुल्लेखो विशेषं महत्त्वं धारयति, कारणं तत्र कश्चिदन्योऽविशेषणोचितोऽर्थः कल्पनीयो भवति। एतादृशा अलङ्काराश्च तदलङ्काराश्रिता अर्था एव टीकाकाराणां प्रदानं गण्यते। अत्र मल्लिनाथेन अतिभारसम्पन्नेन कुचमण्डलेन कृशो मध्यो नम्रीकृतः, अतिभारसम्पन्नः अर्थात् ससत्त्वः यः राजा भवति सः स्वबलेन बलात् शत्रुं नमयति। अनेन सुन्दरीणां सौन्दर्यवर्णने शृङ्गारसेऽपि शिशुपालवधप्रयोजनेऽत्र महाकाव्ये युद्धपरिणामो वीररसो दृष्टिपथमायाति।

अत्रैतदपि विचारणीयं यत् वल्लभदेवेनापि कश्चिद् दरिद्रो यदि धनदानेन महत्त्वं प्रापितश्चेन्नमति[१७]। तथाऽयं मध्यो नम्रीभूत इति कस्यचिदन्यस्यार्थस्य स्वल्पा कल्पना तु कृता वर्तते एव। तस्मादेव मल्लिनाथस्य मनसि प्रेरणाऽऽगता स्यात्, तथा भूतश्चार्थस्ततः कल्पितस्स्यात्[१८]। परं शत्रुविषयाभिलाषी राजा यथा बलात् शत्रून्नमयतीति रसानुकूलोऽर्थः सविशेषः प्रासङ्गिको भाति।

मल्लिनाथमतेनात्रोत्प्रेक्षासमासोक्त्यलङ्कारयोः सङ्करः। स एव युक्तियुक्तोनात्र शङ्कावकाशः।

**न लङ्घयामास महाजनानां शिरांसि नैवोद्धतिमाजगाम।**
**अचेष्टताऽष्टापदभूमिरेणुः खुराहतो यत्सदृशं गरिम्णः।। (३-२८)**

तृतीयसर्गस्य श्लोकेऽस्मिन् इन्द्रप्रस्थं प्रस्थितस्य जनसमूहस्य यात्रावर्णनं वर्तते। सामान्याभिधार्थस्तु-यदा जना भूमौ चलन्त आसन्, तदा तत्पादाहतं रजः मस्तकेषु नापतत्। कारणं नैतत् सामान्यं रजः किन्त्विदं तु सौवर्णं रजस्तस्मात् तत् स्वगौरवं नात्यजत्।

---

[१६] प्रकृतार्थेन वाक्येन तत्समानैर्विशेषणैः।
अप्रस्तुतार्थकथनं समासोक्तिरुदाहृता।। - उद्भटः।।
विशेषणानां साम्यादप्रस्तुतधर्मावच्छेदः समासोक्तिः।। - शोभाकरमिश्रः।।
काव्यप्रकाशः (१०-९); सं. प्रा गौतम बी पटेल; प्रका0 सी जमनादास कंपनी; अमदावाद, ई. १९७३, पृ. १३९.

[१७] यो ह्युत्प्रवते तेनोन्नतेन भवितव्यम्। अन्योऽपि कुशीयान् दर्ध्रः
केनचिदभ्युन्नतत्वान्महाप्रभावत्वादूर्ध्वमाकृष्टो महापदं प्रापितो नमतीत्युक्तिलेशः।। - इति वल्लभदेवः।।
**शिशुपालवधम् (३-१५)** सैव श्रीनगरस्यावृत्तिः पृ. ९८.

[१८] अत्र मध्यकुचमण्डलयोर्विशेषणे साम्यादरिविजिगीषुराजप्रतीतेः समासोक्तिः।। - इति मल्लिनाथः।।
शिशुपालवधम्(३-१५); निर्णयसागरप्रेस पृ. ६९.

विशेषार्थं प्रकटयन्तावुभावपि टीकाकारौ लिखतः यत्- रजः शिरांसि न लङ्घयामास, कारणं लध्वपि रजः सौवर्णमिति तस्य गरिमा, अतः तेन गुरूल्लङ्घनं न कार्यमिति शिष्टाचारः। अत्र यो महान् भवति, सङ्कुद्धोऽपि सन् साधूनामपमानं न कुरुते, इत्यन्योऽर्थो ध्वन्यते।

परमत्र मल्लिनाथस्य किञ्चिद्विशेषं मतं वर्तते। यथा- यत्र विशेषणानि श्लिष्टानि भवन्ति तत्र समासोक्त्यलङ्कारो जायते। श्लोकेऽस्मिन् सर्वाण्यपि विशेषणान्यर्थद्वयपूर्णानि सन्त्यतोऽत्र समासोक्त्यलङ्कारः एवञ्चात्रालङ्कारेणा-न्यार्थस्य प्रतीतिः। तत्स्पष्टीकर्तुं मल्लिनाथेन 'खुराहतः' इत्यत्र 'पादाहतः' इतिपाठः स्वीकृतः। तत्र च कारणं पादशब्दस्यार्थो मनुष्यपशूनां कृते सामान्यः किन्तु खुरशब्दस्तु पशुष्वेव प्रयुज्यते। 'खुर' इति शब्दे प्रयुज्यमाने सति समासोक्तेः सिद्धिर्भवितुं नार्हति। एवं मल्लिनाथस्यालङ्कारिकी विशिष्टा दृष्टिरत्र विराजते।

**निरुध्यमाना यदुभिः कथञ्चिन्मुहुर्यदुच्चिक्षिपुरग्रपादान्।**
**ध्रुवं गुरून्मार्गरुधः करीन्द्रानुल्लङ्घ्य गन्तुं तुरगास्तदीषुः।।(३-२९)**

कविना माघेन द्वितीयसर्गे वर्णितम्। यत् – उद्धवेन निवेदितं यथा- शिशुपालेन सह युद्धं न करणीयम् किन्तु युधिष्ठरस्य यज्ञे भवदुपस्थितिरनिवार्या, तदर्थं भगवान् कृष्ण इन्द्रप्रस्थं प्रति यात्रां करोति। तदेव यात्रावर्णनं वर्णयन् तृतीयसर्गे पूर्वलिखितश्लोको वर्तते। यत्र वल्लभदेवः सामान्यवर्णनमेव पश्यन् लिखति। यथा-

अग्रे गजा गच्छन्त आसन्, तत्पश्चात्तुरङ्गा अगच्छन्, तथाविधा यात्रा स्थितिः। स्वभावतोऽश्वाः चञ्चला भवन्त्येव तथा च गजा मन्दगतयो भवन्ति। अत्रकविनोत्प्रेक्षा क्रियते। यथा- अश्वाः यथाकथमपि यादवैः संयम्यमाना अपि ऊर्ध्वचरणाः सन्तःध्रुवं बृहच्छरीरान् मार्गावरोधभूतान् गजान् उल्लङ्घ्य गन्तुं मनीषां चक्रुः।

अस्यैव श्लोकस्य मल्लिनाथेन वल्लभदेवकृतः सामान्यार्थस्तु प्रतिपादित एव, किन्तु विशेषार्थोऽपि सूचितः। पुनरुक्तिर्मा भवत्वतः केवलं विशेषार्थः एव प्रस्तूयते। पद्येऽस्मिन् बृहच्छरीरा गजा एतदर्थं 'गुरु' पदं विशेषणरूपेण स्थापितम्, तथा च 'मार्गरुधः' अर्थात् मार्गावरोधका इति। एतत्पदद्वयं लक्ष्मीकृत्य मल्लिनाथेन लिख्यते यद् यदि समाजे गुरवोऽग्रजाः पूज्या अपि प्रगतिमार्गेऽवरोधं कुर्वन्ति तर्हि तेषामपि आज्ञोल्लङ्धनीया, भवतु नाम 'आज्ञागुरूणामविचारणीया' एतस्यापि चिन्ता न विधेया।

**दिदृक्षमाणा प्रतिरथ्यमायुर्मुरारिमारादनघं जनौघाः।**
**अनेकशः संस्तुतमप्यनल्पा नवं नवं प्रीतिरहो करोति।।(३-३१)**

तृतीयसर्गेऽत्रेन्द्रप्रस्थं जिगमिषतः श्रीकृष्णस्य दर्शनमहत्त्वं प्रतिपादयन् कविर्लिखति यत् – निष्कलङ्कमुरारिं विलोकयितुं जनाःप्रतिमार्गं जग्मुः। अनेकवारं पूजितमपि कृष्णं विलोकयितुं कथमेतावती महेच्छेति चेत् तत्र कारणमाह- स्नेहः यस्मिन्नपि भवति तत्प्रतिक्षणं नूतनायते।

अत्रास्माभिश्चिन्तनीयं यन्मल्लिनाथाद् वल्लभदेवस्य वाक्यरचना सरला भवति, यतो हि सरलतयार्थबोधोऽपि जायते। परं यत्रातिसारल्यं भवति तत्र कठिनमपरिचितञ्च पर्यायं विलिख्य कालिदासस्य दिलीप इव वल्लभदेवोऽपि लेखने क्वचिद् भीमः क्वचित्कान्तश्च जायते[१९]। अस्मिन्पद्येऽपि ‘जनौघाः’ शब्दस्तु प्रचलितो वर्तते। तथापि वल्लभदेवेन ‘लोकपूगा’ इति पार्यायो दत्तः। यद्यपि पूगशब्दोऽप्रचलितो वर्तते। परमस्यैवंविधा पारिपाटी दृश्यते। द्वितीयसर्गेऽपि ‘उद्धवस्य’ कृते ‘पवनव्याधि’ पर्यायः प्रयुक्तः[२०]। अतोवल्लभदेवोयद्यपि सरलस्तथापि क्वचिदेवंविधं काठिन्यमपि तनुते।

श्लोकेऽस्मिन् व्याख्यानावसरे मल्लिनाथेन ‘जनौघा’ यद्यपि कर्तृपदमस्ति तथापि तस्य न पर्यायोऽपि दत्तः, न च कर्तृपदमपि लिखितमेतन्नोचितम्। कदाचिद् वाचकैः स्वयमेव ग्राह्यमिति सारल्यात् त्यक्तं स्यात्।

**वणिक्पथेपूगकृतानि यत्र भ्रमागतैरम्बुभिरम्बुराशिः।**
**लोलैरलोलद्युतिभाञ्जि मुष्णन् रत्नानि रत्नाकरतामवाप।। (३-३८)**

तृतीयसर्गे भगवान् श्रीकृष्णः द्वारवतीं विलोकयन् धर्मराजयज्ञाय गच्छति, तदा कविस्तमेवावसरं प्राप्य द्वारवतीसमृद्धिं वर्णयन्नेवमाह। तत्र द्वारवत्यामापणे बहुविधानां रत्नानां संग्रहोऽभवत्। समुद्रो जलैः तानि रत्नानि गृहीत्वाऽगच्छत्।

---

[१९] भीमकान्तैः नृपगुणैः स बभूवोपजीविनाम्।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः।।
रघुवंशम् (१/१६); GOPAL RAGHUNATH NANDARGIKA; प्रका0
MOTILAL BANARऽIDAऽऽ; DELHI; ई. १९७१, पृ.८.

[२०] गुरुकाव्यानुगां बिभ्रच्चान्द्रीमभिनभः श्रियम्।
सार्धमुद्धवसीरिभ्यामथाऽसावासदत्सदः।।
समासदत् मन्त्रमण्डपं प्राविक्षत् प्रविष्टः।।
शिशुपालवधम् (२-२); सैव श्रीनगरस्यावृत्तिः पृ.४.

अर्थात् सागरश्चौर्यं कृतवान्, ततस्तस्य नाम रत्नाकर इति सत्यं जातम्। तात्पर्यमिदमेव वस्तुतस्तु सार्वाण्यपि रत्नानि द्वारवतीजनानामासन्, परं तानि समुद्रेणापहृतानि, ततश्च स रत्नाकरः सञ्जातः।
अत्र वल्लभदेवमतेनोत्प्रक्षाऽलङ्कारेण भूयते। यद्यप्यत्रोत्प्रेक्षावाचको नैकोऽपि शब्दो दृश्यते। तथापि वल्लभदेवेनात्रोत्प्रेक्षा स्वीकृता[२१]। तेन 'इव' शब्दस्य कल्पना कृता, अथवा इवार्थोऽध्याहृतः। तथापि तथा विशिष्टंवर्णनमस्त्यतो नात्रोत्प्रेक्षेति तथ्यम्। अत्र च न सम्भावना दर्शिता। परं मल्लिनाथेनात्रातिशयोक्तिः स्वीकृतेति योग्यं प्रतिभाति[२२]।
तत्र कारणं रत्नाकरस्तु समुद्रो वर्तत एव, परमनेन तत्र द्वारवत्याः रत्नानि गृहीत्वा स रत्नाकरो जात इति सम्बन्धेऽप्यसम्बन्धोक्तिः कृता, तस्मादत्रातिशयोक्तिरलङ्कारो योग्यः। माघेऽलङ्कारविमर्शग्रन्थेनाप्यत्रायमेवा-लङ्कारः स्वीकृत इति द्विर्बद्धं सुबद्धम्[२३]।

**स्फुरत्तुषारांशुमरीचिजालैर्विनिह्नुताः स्फाटिकसौधपङ्क्तीः।**
**आरुह्य नार्यः क्षणदासु यस्यां नभोगता देव्य इव व्यराजन्।। ३-४३**

तृतीयसर्गस्यास्मिन्पद्ये भगनान्माधवः द्वारवतीं विलोकयन्निद्रप्रस्थं प्रयातुकामो वर्तते। तदा तस्य गमनावसरं प्राप्य कविवरो माघस्तन्नगरीगतानां नारीणां सौन्दर्यं वर्णयति।
तद् यथा- यत्र स्फुरच्चन्द्रकिरणसमूहैः अदृश्यानि स्फटिकनिर्मितश्वेतभव-नान्यारुह्य नार्यो यामिन्यां गगनगमनशीला देव्य इव शोभां प्राप्तवत्य आसन्।
अत्र वर्णने चन्द्रमसः किरणसमूहः श्वेतो वर्तते, तथा च स्फटिकनिर्मितानि भवनान्यपि श्वेतान्यतः द्वयोरेकवर्णत्वात् चन्द्रकिरणसमूहस्य श्वेतत्वात् भवनान्यदृश्यानि जातानि। यदैवं वर्णनं भवति तदा तद्गुणालङ्कारो वा

---

[२१] समुद्रः रत्नानि मुष्णन् रत्नाकरतामवाप न तु स्वभावत इत्युत्प्रक्षा विनापि इवेन युज्यते।। - इति वल्लभदेवः।।
शिशुपालवधम्(३-३८) सैव श्रीनगरस्यावृत्तिः पृ. ३३८.

[२२] अम्बुराशेः प्राक् रत्नसम्बन्धेऽप्यसम्बन्धोक्तेरतिशयोक्तिः।। -इति मल्लिनाथः।।
शिशुपालवधम् (३-३८) निर्णयसागरप्रेस, पृ. ७.

[२३] अत्र सम्बन्धेऽप्यसम्बन्धोक्तेरतिशयोक्तिः।।
माघेऽलङ्कारविमर्शः पृ. 150.

सामान्यालङ्कारो वा मीलितालङ्कारो भवितुमर्हति[२४]। कस्यापि वस्तुनः सहजेन वाऽऽगन्तुकेन समानचिह्नेन भुवननिगूहनं भवत्यतोऽयमलङ्कारोऽत्र भवितुमर्हति। परं न वल्लभदेवेन न च मल्लिनाथेनामीलितालङ्कारस्य चर्चा कृता तस्मादेतस्य चर्चायाः प्रश्न एव नोद्भवति।

इमे सर्वे लोकन्यायमूला अलङ्काराः कथ्यन्ते[२५]।

अत्र श्लोके 'देव्य इव व्यराजन्' इत्यत्रोत्प्रेक्षालङ्कार इति द्वावप्यतौ समानमतौ स्तः। परं पूर्वपङ्क्तौ (स्फुरत्तुषारांशुमरीचिजालैर्विनिह्नुताः। स्फाटिकसौधपङ्क्तिः इत्यत्र वल्लभदेवमतेन तद्गुणालङ्कारः[२६], परं मल्लिनाथोऽत्र सामान्यलङ्कारं स्वीकरोति[२७]। यथाक्रमं द्वयोरपि मते विलोक्येते। यदि तद्गुणालङ्कारो विचार्यते तर्हि तत्र अत्यन्तोज्ज्वगुणसम्पन्नवस्तुनः योगात् किमप्यन्यद्वस्तु स्वगुणं त्यक्त्वोज्ज्वलवस्तुनो गुणान् धारयति तदाऽयमलंकारो भवति। अत्र चन्द्रमसः किरणानां श्वेतत्वग्रहणमस्ति परं स्वगुणस्य त्यागो न दृश्यते। तस्मादेतन्मतं सम्पूर्णां योग्यतां न ददाति। परं मल्लिनाथः सामान्यालङ्कारं स्वीकरोति, तत्र तु गुणसाम्यं प्रकटयितुं प्रस्तुतस्यान्येन सह योगद्वारैवैक्यं स्थाप्यते, तत्र सामान्यालङ्कारो

---

[२४] समेन लक्ष्मणा वस्तु वस्तुना यन्निगूह्यते।
निजेनागन्तुना वापि तन्मीलितमिति स्मृतम्।।
काव्यप्रकाशः पृ. 90

[२५] लोकन्यामूलाः-प्रत्यनीकं-प्रतीपं-मीलितं-सामान्यः तद्गुणः अतद्गुणः उत्तरम्
माघेऽलङ्कारविमर्शः पृ.22.

[२६] समुत्सृज्यगुणं योगादत्युज्ज्वलगुणस्य यत्।
वस्तु तद्गुणतामेति भण्यते स तु तद्गुणः।।- इति मम्मटः।।
काव्यप्रकाशः पृ. .98
स्वगुणत्यागपूर्वकं स्वसंनिहितवस्त्वन्तरसंबन्धिगुणग्रहणं तद्गुणः।।- पण्डितराजो जगन्नाथः।।
रसगङ्गाधरः पृ .1071
तद्गुणः स्वगुणत्यागादत्युत्कृष्टगुणग्रहः
साहित्यदर्पणः पृ. 860

[२७] प्रस्तुतस्य यदन्येन गुणसाम्यविवक्षया।
एकात्म्यं बाध्यते योगात् तत् सामान्यमिति स्मृतम्।।
काव्यप्रकाशः पृ. 95
साहित्यदर्पणः पृ 859.
कुवलयानन्दः (147) पृ. 240.

भवति। अत्र पद्ये चन्द्रमसः श्वेतत्वं भुवनानां च श्वेतत्वमेकीभूतं तस्मादत्र सामान्यालङ्कारः।

**स्निग्धाञ्जनश्यामरुचिः सुवृत्तो वध्वा इवाध्वंसितवर्णकान्तेः।**
**विशेषको वा विशिशेष यस्याः श्रियं त्रिलोकीतिलकः स एव।।(3-63)**

तृतीयसर्गे द्वारवतीं वर्णयन् कविवरो माघ आह। यथा- स्निग्धकज्जलवर्ण इव श्यामः वर्तुलाकारो विशेषकः इव स्निग्धाञ्जनश्यामो भगवान् कृष्णस्त्रीलोकीतिलको द्वारवतीशोभवृद्धिं चकार।

अस्य श्लोकस्य टीकायां वल्लभदेवेन दोषो दर्शितः, ततश्च परिहारोऽपि कृतः। सामान्यरूपेणैकस्यैव शब्दस्य पुनरावर्तनं भवति तदा काव्यदोषो जायते। तस्मात् कवयो यदि स्वाभाविक्यावस्यकता भवति तदा पुनरावृत्तिं विहाय तस्यैव शब्दस्य पर्यायं लिखन्ति, येनार्थोऽपि सुरक्षितो भवति, कोशमहत्त्वमपि वर्धते।

तथापि क्वचित् कवयो यदा शब्दानां द्विरुक्तिं कुर्वन्ति तदा यदि नायकनायिकादीनां प्रशंसा भवति तर्हि स एव दोषो गुणायते। साहित्यदर्पणेऽपि 'कदली कदली.......' एतादृशी द्विरुक्ति र्नायिकाप्रशंसायां दृश्यते[२८]।

वल्लभदेवेनात्र पद्यद्वयं लिखितं यत्र कालिदासेन कृतं दिलीपवर्णनं वर्तते, अन्यस्मिन् पद्ये नारीणां सहजभीतिस्वभावप्रशंसा कृता, तस्मात् तत्र 'इन्दुशब्दस्य', 'लताशब्दस्य' च पुनरुक्ति र्न दोषायापितु गुणायैव जाता[२९]।

श्लोकेऽस्मिन् तथाविधं न किमपि वर्तते, येन दोषो गुणो भवितुमर्हेत। कारणं तत्र दिलीपवर्णने इन्दुशब्दस्य पुनरावर्तनं जातं, परमत्र तु केवलसर्थस्यैव पुनरावर्तनं शब्दस्य पुनरावर्तनं नैव कृतम्।

माघस्तु नूतनशब्दानां प्रयोगे ख्यातिं प्राप्तः[३०]। एतस्य कवेः कृतौ पुनरावर्तनं कथं सम्भवेत्। अत्र तु प्रथमवारं विशेषकशब्दः प्रयुक्तो द्वितीयवारञ्च तिलकशब्दः

---

[२८] कदली कदली करभः करभः करिराजकरः करिराजकरः।
भुवनत्रितयेऽपि विभर्ति तुलामिदमूरुयुगं न चमूरुदृशः।।
साहित्यदर्पणः पृ. 202

[२९] तदन्वये शुद्धसति प्रसूतः शुद्धिमत्तरः।
दिलीप इव राजेन्दुरिन्दुक्षीरनिधाविव।।- इतीन्दुशब्दस्य।।
स्तनस्तबकपर्यन्तन्यस्तहस्तैकपल्लवा।
लतेवाकृष्टमुक्तान्या चकम्पे प्रमदालता।.
इति लताशब्दस्य।। - इति वल्लभदेवः।।
शिशुपालवधम् (3-36); सैव श्रीनगरस्यावृत्तिः पृ. 118-119.

प्रयुक्तःस्तस्मादत्र दोषदर्शनं ततश्च निवारणं ववा गुणदर्शनमनावश्यकमेव दृश्यते। अतः त्रिलोकीतिलक इति तिलकशब्दस्य प्रशंसार्थत्वान्नाधिक्यदोषः इति वल्लदेववचनमनावश्यकमेव तस्मादेव मल्लिनाथेनात्र चर्चैव न कृता स्यात्।

**बलार्मिभिस्तत्क्षणहीयमानरथ्याभुजाया बलयैरिवास्याः।**
**प्रायेण निष्क्रासति चक्रपाणौ नेष्टं पुरो द्वारवतीत्वमासीत्।।3-69।।**

तृतीयसर्गे परमात्मा श्रीकृष्ण इन्द्रप्रस्थं प्रति प्रयाति, तदा द्वारवती नगरी (द्वारका) दुःखिता दृश्यते। एतस्या एव नगर्या वर्णनं कुर्वन् कविराह। यथा- यदा भगवान् श्रीकृष्णः प्रयाति तदा द्वारावती(नाम यस्यां नगर्यां बहूनि द्वाराणि भवन्ति सा) स्वद्वारवतीत्वं प्रियं नामन्यत, अर्थात् बहूनि द्वाराणि सन्ति तस्मादेव हरिरेनां त्यक्त्वा याति, परं यदि द्वारमेव न भवेत् तर्हि कथं यातुं समर्थो भूयात्। तस्याः मार्गभूजाभ्यां सैन्यकङ्कणान्यपि मुक्तान्यभवत्।

पूर्वलिखितोऽर्थस्तु वाच्यार्थत्वादुभयोरपि टीकाकारयोस्समानः। विशेषरूपेण वल्लभदेवो ध्वन्यर्थमपि सूचयति। तद् यथा- बहुषु वर्णनेषु पठ्यते यत् नगरी राज्ञी तुल्या भवति च नृपस्तु तत्स्वामी। अतः प्रायेणैकभार्यायुतस्यापि राज्ञः धरागणनया भार्याद्वयं न्यूनातिन्यूनं भवत्येव भवतु स स्वयं रामो वाऽन्यः। अयं नगरीनृपमध्ये भार्यापतिसम्बन्धः काव्यजगति ख्यातिं गतः[३१]। तस्मात् यदि नगरी भार्यारूपेण स्वीक्रियते तर्हि तत्रापि नारीधर्माः सजीवारोपणत्वादारोप्यन्ते।

---

[३०] नव सर्गे गते माघे नवो शब्दो न विद्यते।
**(कस्यापि)**

[३१] परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य मे।
समुद्ररसना चोर्वी सखी च युवयोरियम्।।
अभिज्ञानशाकुन्तलम् (३-१७)सं श्रीनिवासाचार्य प्रका0 V.RAMA-SWAMY SASTRALA & SONS MADRAS, ई. १९५०,पृ. ११०.
आसीन्नाथपितामही तव मही जाता ततोऽनन्तरम्।
माता सम्प्रति साम्बुराशिरशना जाया कुलोद्भूतये।
पूर्णे वर्षशते भविष्यति पुनः सैवानवद्यास्नुषा
युक्तं नाम समग्रनीतिविदुषां किं भूपतीनां कुले।।(ध्वन्यालोकस्य लोचनटीकायाम्)
ध्वन्यालोकः सं. पण्डित पट्टाभिरामशर्मा जयकृष्णदास-हरिदासगुप्त चौखम्बा, बनारस ई. १९९७, पृ. १२९.

एतदर्थमनुकूलयितुं 'द्वारवती' शब्दे बहुद्वारेति चञ्चलानारी तथाऽर्थं गृहीत्वाऽन्यमर्थमपि वल्लभदेवो योजयति।

यदा कश्चित्पतिः कामपि प्रियतमां त्यक्त्वा गच्छति, तदा तस्या हस्तात् कङ्कणं भ्रष्टं भवति। मेघदूतेऽप्येवं वर्णितं कविवरेण तत्र भवता कालिदासेन[३२] कृतम्। पतिर्देशान्तरं गच्छति, तदाऽपि भार्यात्यागो भवति, यदि भार्या चञ्चला भवति तर्हि पतिस्तां त्यजति। अत्रचापल्यमेव त्यागहेतुरुक्तः। कलिकालसर्वज्ञेन हेमचन्द्राचार्येणापि भ्रष्टकङ्कणयुतायाः विरहिण्या वर्णनं विहितम्[३३]। परं तत्र विरहजं दुःखमिति न्यूनं कारणं सङ्गमस्तु भर्तरिगपुनरागते सति भविष्यत्येव।परमत्र द्वारवत्त्वं चाञ्चल्यं त्यागकारणं तस्माद् दुःखमनवसानम्।

पूर्वकथितो ध्वन्यर्थस्तु वल्लभदेवेन सम्यक्प्रकटीकृतः। अन्यच्चात्र वल्लभदेवेनोत्प्रेक्षाऽलङ्कारस्स्वीकृतः। परं मल्लिनाथेन इवशब्देनोप-माऽलङ्कारश्चप्रायेणेति शब्देनोप्रेक्षाऽलङ्कारोऽप्रत्यक्षरूपेण स्वीकृतः। इवशब्देनैवोत्प्रेक्षा स्वीक्रियते तर्हि प्रायेणपदस्य निरर्थकता भवेत्, तस्मात् मल्लिनाथस्यालङ्कारविषयकं मतं युक्तियुक्तं दृश्यते।

अन्यच्चात्र 'द्वारवती' शब्दस्य पर्यायो वल्लभदेवेन न दत्तः, परं मल्लिनाथेनात्र 'द्वारका' शब्दः पर्यायरूपेण लिखितः। अयं शब्दो न केवलं मल्लिनाथस्य पर्यायकौशलमेव सूचयत्यपितु वल्लभदेवादेतस्याभिनवत्वमपि सूचयति। कारणं मल्लिनाथसमये 'द्वारवती', 'द्वारका' जाता स्यात् या साम्प्रतमपि द्वारकेति नाम्ना ख्यातिं गता। एतद्विवचनं समयसूचनेऽपि महत्त्वपूर्णं दृश्यते।

***

---

[३२] तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान्कनकवलयभ्रंशरिक्तप्रकोष्ठः.।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगज प्रेक्षणीयं ददर्श।।
मेघदूतम् (पूर्वमेघ-२) सं. सुशीलकुमार डॉ; प्रका0 साहित्य अकादमी न्यु दिल्ही ई. १९७०, पृ. ३.

[३३] वायसु उड्डावन्ति अए पिउ दिट्ठउ सहसत्ति।
अद्धावलया महिहि गय, अद्धाफुट्टतडत्ति।।18।।
प्राकृतव्याकरणम् ।। ८-४-३५२।। सं मुनि वज्रसेनविजयः प्रका0 श्रीजैन आत्मनन्दसभा भावनगर ई. १९४२पृ. २१२.

# सर्गः 4
# रैवतकवर्णनम्

शिशुपालवधस्य समस्तेऽपि चतुर्थे सर्गे रैवतक (गिरनार) पर्वतस्यैव वर्णनं महाकविना माघेन कृतम्।[१]

चतुर्थसर्गेऽपि क्वचिदलङ्कारविषये वल्लभदेवमल्लिनाथयोर्मतभेदो दृश्यते। तत्र मल्लिनाथस्यालङ्कारचर्चा सलक्षणा विशिष्टा च भवति। मल्लिनाथस्य दण्डिमम्मटौ प्रियालङ्कारिकौ दृश्येते।[२] तात्पर्यार्थकथनेऽपि मल्लिनाथस्य चातुर्यं दृश्यते।[३] अन्यच्च कोशविषये मल्लिनाथः समृद्धः। पाठान्तरेणार्थपरिवर्तने वल्लभदेवस्य चातुर्यं नितरां प्रशंसाभाजनम्[४] । अन्यदत्रोल्लेखः कर्तव्यो भवति यन्माघेन रैवतकपर्वतस्य सूर्यचन्द्रौ गजस्य घण्टाद्वयमिवाशोभेताम् इति वर्णितम्। अनयोपमयैव माघस्य 'घण्टामाघ' रूपेण विख्यातिर्जातेति। कस्मिन्पद्ये तथावर्णनं भवेदिति सामान्यरूपेण सर्वेषां जिज्ञासा भवत्येव। तां जिज्ञासावृत्तिं पूरयितुं वल्लभदेवः सफलो जातः। एवं मल्लिनाथाय ख्यातविषये रुचिर्न जायते।

पूर्वलिखितरूपेण चतुर्थसर्गे द्वयोरपि टीकाकारयोर्मतभेदो दृश्यते। इदानीं कानिचित्पद्यानि समुद्धृत्य दृढीक्रियते समीक्षेयम्।

**दृष्टोऽपि शैलः स मुहुर्मरारेरपूर्ववद्विस्मयमाततान।**
**क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः।। (४-१७)**

समस्तेऽपि चतुर्थे सर्गे रैवतकगिरेर्वणनं कृतम्। तत्र रैवतकपर्वतेऽद्भुतं सौन्दर्यं विलोक्य भगवान् श्रीकृष्णोः मुग्धोऽभवत्। एनमवसरं प्राप्य कविः सौन्दर्यलक्षणमपि दत्तवान्। यथाऽन्यैरपि कविभिस्सौन्दर्यलक्षणानि दातुं सफलो यत्नो विहितः। कविकुलगुरुकालिदासः कथयति[५] तदेव वस्तु सुन्दरं कथ्यते यत्र

---

१ पद्यं ८-३४ विलोक्यताम्।
शिशुपालवधम्; (चौखम्बा) पृ. १५५/१५६.

२ पश्यतु ४-०३ पद्यम्।
शिशुपालवधम्; (चौखम्बा) पृ. १४२.

३ विलोकनीयः ४-३४ श्लोकः।
शिशुपालवधम्; (चौखम्बा) पृ १४६

४ पद्यम् ४-३५ विलोक्यताम्।
शिशुपालवधम्; (चौखम्बा) पृ. १५६.

५ किमिव हि मधुराणां मण्डनं नाकृतीनाम्।। अभिज्ञानशाकुन्तलम्; (1-18); पृ. २५.

किमपि वस्तु भूषणायते। भारविकविस्तु कथयति[६] सौन्दर्यं तादृशं भवति यत्रान्यस्य कस्यचिदपि गुणस्यापेक्षैव न भवति। साहित्यदर्पणकारेण विश्वनाथेन लिख्यते[७] यस्यां कस्यामपि परिस्थितौ यत् सुन्दरमेव दृश्यते तदेव वस्तुतः सुन्दरं कथ्यते।

भासस्तु कथयति[८] तदेव सुन्दरं यत् सर्वं यत् सर्वेभ्यः रोचते, भवतु नाम भिन्नरुचिर्लोकः। अस्मिन् पद्ये माघकविनाऽपि सौन्दर्यलक्षणं दत्तम्। यथा- स पूर्ववर्णितः पर्वतो वारं वारं भगवता श्रीकृष्णेन विलोकितोऽप्यनवलोकितपूर्व इव विस्मयविस्तरं चकार। प्रतिक्षणं यन्नूतनतां धारयति तदेव सौन्दर्यस्य स्वरूपं वर्तते।

अस्य श्लोकस्य विवेचनेऽलङ्कारचर्चायां वल्लभदेवमल्लिनाथौ विभिन्नमतौ स्तः। वल्लभदेवेनात्रार्थान्तरन्यासालङ्कारः स्वीकृतः मल्लिनाथेनात्र काव्यलिङ्गालङ्कारः स्वीकृतः। एतस्य कारणं द्वयोरप्येतयोरलङ्कारयोर्लक्षणे एकस्मिन् वाक्ये विधानमन्यस्मिन् स्पष्टीकरणं भवति। एतस्मात्कारणाद-त्रोभयोरपि टीकाकारयोर्मतभेदो दृश्यते। पूर्वकथितसाम्ये सत्यपि भूयान्भेदस्त्वयमेव यथाऽर्थान्तरन्यासे द्वेऽपि वाक्ये स्वतन्त्रे भवतः।

मल्लिनाथेनात्र “वारंवारं विलोकितोऽपि पर्वतो नूतन इवासीत् कारणं तदेव सौन्दर्यं यत्प्रतिक्षणं नाविन्यं तनोति” एवं कार्यकारणभावं विचार्य काव्यलिङ्गालङ्कारः कथितः स्यात्[९]। वल्लभदेवेन पूर्वरैवतकवर्णनं विशेषं स्वीकृत्योत्तरवाक्येन सामान्येन समर्थनं कृत्वाऽर्थन्तरन्यासालङ्कारः स्वीकृतः[१०]।

---

[६] न रम्यमाहार्यमपेक्षते गुणम्।। किरातार्जुनीयम्;( ४-२३) पृ. ८८

[७] सर्वावस्थाविशेषेषु माधुर्यं रमणीयता।।साहित्यदर्पणः (३-७) पृ. १८१.

[८] सर्वजनमनोभिरामं खलु सौभाग्यं नाम।।
स्वप्नवासवदत्तम् (द्वितीयाङ्कः) सं Late M.R. Kale, प्रका0 Book-Sellers Publishing Co. v . p. Road; Bombay; ई. १९६२, पृ. १५६.

[९] काव्यलिङ्गं हेतोर्वाक्यपदार्थता।। इति मम्मटः।। काव्यप्रकाशः (१०-११४) पृ. ४०४.
हेतोर्वाक्यपदर्थत्वे काव्यलिङ्गं निगद्यते।। - इति विश्वनाथः।।
साहित्यदर्पणः (१०-६२) पृ ८०२.
समर्थनीयस्यार्थस्य काव्यलिङ्गे समर्थनम्।। - इति अप्पैय दीक्षितः।।
कुवलयानन्दः (१२१) पृ. १९५.

[१०] सामान्यं वा विशेषो वा तदन्येन समर्थ्यते।
यत्र सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा।। - इति मम्मटः।।
काव्यप्रकाशः (१०-१०९) पृ. ५६.
उक्तिसिद्ध्यर्थमन्यार्थन्यासो व्याप्तिपुरःसरः।
कथ्यतेऽर्थान्तरन्यासः श्लिष्टोऽश्लिष्टश्च स द्विधा।।९१।।

श्लोकेऽस्मिन् स्वतन्त्रवाक्यत्वात् समर्थ्यसमर्थकभावप्राणभू त्वाच्चार्थन्तरन्यासालङ्कारो विशेषस्स्फुटो दृश्यते। माघेऽलङ्कार विमर्शग्रन्थेनापि सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यास एव स्वीकृतः। एतेन च वल्लभदेवमतं विशेषं स्पष्टं जायते। यद्यपि काव्यलिङ्गार्थान्तरन्यासयोः सूक्ष्मैव भेदरेखा वर्तते, तथापि वल्लभदेवमतं समीचीनं स्वीकार्यं च दृश्यते।

**उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम्।**
**वहति गिरिरयं विलम्बिघण्टाद्वयपरिवारितवारणेन्द्रलीलाम्।।**(४-२०)

एकत्र सूर्य उदेति तथा चान्यत्र चन्द्रोऽस्तमेति तादृशं पर्वतचित्रं मनसि संस्थाप्य कविना रैवतकवर्णनं पर्वतस्यासमन्तात्प्राप्यते[११]। एकमेव वस्तु सदृशमपि कवीनां मानसेऽन्यदिव भवति, तस्मादेव ते कवयः[१२] । माघकविनात्र लिखितं यत्- उदयमधिगतस्य सूर्यस्य किरणरूपा गुणाः (रज्जवः) सर्वत्र प्रसृताः सन्ति, तथैवास्ताचलमारूढस्य चन्द्रस्यापि गुणा प्रसृताः सन्ति। मध्ये च तयोः रैवतकः कश्चिद् घण्टाद्वयान्वितो गज इव लीलां वितनोति। अत्र सूर्यचन्द्रमसोर्घण्टाद्वयेन सह तुलना कृता, किरणानां गुणैः सह तुलना कृता।

---

वाग्भट्टालङ्कारः (४-९१) सं. सत्यव्रतसिंहः प्रका0 चौखम्बा विद्याभवन,वाराणसी ई. १९५७ पृ ७६.
सामान्यविशेषभाव- कार्यकारणभावाभ्यां निर्दिष्टप्रकृतसमर्थनमर्थान्तरन्यासः।।
-रुप्यकः।।
अलङ्कारसर्वस्वम्(३७) सं Dr.V.Raghrvan; प्रका0 Meharchand ; Lachhmandaऽ; Delhi-6; ई. १९६४.
सामान्येन विशेषस्य विशेषेण सामान्यस्य वा यत्समर्थनं तदर्थान्तरन्यासः।। इति जगन्नाथः।।
रसगङ्गाधरः पृ. ९१५.

११ यात्येकतोऽस्तशिखरं पतिरौषधीना
माविष्कृतोऽरुणपुरः सर एकतोऽर्कः।
तोजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवात्मदशान्तरेषु।।
**अभिज्ञानशाकुन्तलम्**(४-२) **पृ.** १२९.

१२ असारे काव्यसंसारे कविरेकः प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्तते।।
शृङ्गारी चेत्कविः काव्ये जातं रसमयं जगत्।
स एव वीतरागश्चेन्नीरसं सर्वमेव तत्।।
भावानचेतनानपि चेतनवच्चेतानानचेतनवत्।
व्यवहारयति तथेष्टं सुकविः काव्ये स्वतन्त्रतया।।
ध्वन्यालोकः (३-उद्योतः) पृ. ४९८.

एतद्वर्णनं रैवतकपर्वतस्य सहृदयहृदयानां वाचकानां मनांसि प्रसन्नान्यकरोत्। कारणं यदि दूरात् प्रभातकाले पर्वतदर्शनं क्रियते तर्हि स कविकथितगज इव रमणीयो दृश्यते। तात्पर्यम् अतीव मनोभिरामेयं माघकवेः कल्पना।

एनामेव कल्पनां विलोक्य यथा कालिदसस्य( रघुवंशम् सर्ग-६ श्लोक-३९) आतपत्रभरविरित्युपनाम प्रशंसकैः कृतम्, तथेव माघकवेरपि पूर्वोक्तश्लोकं विलोक्य 'घण्टामाघ' इति नाम जगति ख्यातिं गतम्।

वाचकानां स्वाभाविकी जिज्ञासावृत्ति र्भवति, यथा- यदा ते रघुवंशं पठन्ति तदा कुत्र कविर्दीपशिखाकालिदासपदं लब्धवान् स्यादिति, कुत्र वा भारविरातपच्छत्रभारविनाम्ना ख्यातिं गतस्स्यादिति किरातार्जुनीयपठनावसरे, तथैवात्रापि, शिशुपालवधं यदा पाठकाः पठन्ति तदा माघकविना 'घण्टामाघ' पदं कदा प्राप्तं स्यादिति तेषां स्वाभविकी जिज्ञासा भवत्येव।

यदा वयं वल्लभदेवस्य टीकां पठामस्तदा तत्र 'अनेनैव श्लोकेन कविना 'घण्टामाघ' इति नाम लब्धम्' तथा स्पष्टं लिखितम्। मल्लिनाथेन न तथा स्वल्पोऽपि क्वचिदुल्लेखः कृतः। वल्लभदेवान्मल्लिनाथोऽर्वाचीनस्तस्मादिदं तु स्पष्टमेव यन्मल्लिनाथस्य समये माघस्य 'घण्टामाघ' इति नाम प्रसिद्धं भवेदेव। ये सुज्ञा वाचका भवन्ति तेषां तु दृष्टिपथमायाति, परं ये सामान्या भवन्ति तेषां कृते लेखनीयमिति नितान्तमावश्यकमेव।

मल्लिनाथेन स्वीयो वाचकवर्गः प्रस्तावनायां स्पष्टीकृतः, तस्मात् तेषांमिदं ज्ञानं स्यादेवेति मत्वा न लिख्यते, यद्यप्यावश्यकन्तु वर्तत एव। वल्लभदेवेन यत्रावश्यकता भवति तत्र चर्चा क्रियत एव। वल्लभदेवस्यानेन गुणेन वाचकानां जिज्ञासा वृत्तिस्तोषतीरं प्राप्नोतीति निश्चितम्।

**स्थगयन्त्यमूः शमितचातकार्तस्वरा**
**जलदास्तडित्तुलितकान्तकार्तस्वराः।**
**जगतीरिह स्फुरितचारुचामीकराः**
**सवितुः क्वचित् कपिशयन्ति चामी कराः॥(४-२४)**

चतुर्थसर्गगतेऽस्मिन् श्लोके रैवतकपर्वतप्रदेशस्थाने जलदानां वर्णनं वर्तते। कविवरो माघो वर्णनं कुर्वन् लिखति। यत्- रैवतकपर्वते क्वचिद् यैश्चातकानांतृषातृप्तिः कृता तादृशाश्च जलधरा ये विद्युत्प्रकाशेन स्वर्णवर्णा इव

राजन्ते। कुत्रचित् तत्रैव सूर्यकिरणैः पीतवर्णं प्रापिता जलधरा, यैः किरणैः सुवर्णं स्वयं सुवर्णत्वं गतम्।

चातकानां मेघजलसम्बन्धः संस्कृतकाव्यसृष्टौ कविसमयरूपेण स्वीकृतः[१३], सर्वत्रान्यत्रापि प्रसिद्धिं गतः, तस्मात् वाचकैः ज्ञातुं शक्यते, यद् यत्र चातकानामुल्लेखस्तत्र जलदानां मेघानामेवोल्लेखो भवेदिति। तात्पर्यं पूर्वार्धकथनं लोकप्रसिद्धं वस्तुजातम्। उत्तरार्धे या सूर्यकिरणैः सुवर्णवर्णीकृतानां मेघानां कल्पना वर्तते सा शनैः शनैः सामान्यवाचकानां मनस्यर्थप्रकाशं विदधाति। कारणमेकस्मिन्नेव प्रदेशे पूर्वार्धे वृष्टिवर्णनं भवति तदा सूर्यदर्शनं तु भवितुमेव नार्हति। परमुत्तरार्धे सूर्यकिरणवर्णनं सुविदितमेव।

अत्र वल्लभदेवेन श्लोकार्थ एव प्रकटीकृतः। तेन यथा स्वीकृत्यैव लिख्यते यत् तस्य वाचकैरयमर्थोऽवगम्यत एव। किन्तु यत्रैवंविधमाश्चर्यजनकं लोकविरुद्धं वा वर्णनं भवति तदा टीकाकारेण यदि विशेषतस्तत् स्पष्टं क्रियते तर्हि वाचकानामर्थप्रवेशः सरलो भवेत्।

अस्यैव श्लोकस्य विवेचने तु मल्लिनाथेनापि तथैव कृतम्, न तत्र किमपि वैशिष्ट्यम्; परं तेनार्थं विलिख्यान्ते तात्पर्योर्थोऽपि निर्दिष्टो येनार्थग्रहणेऽतीव सारल्यं जातं मनोज्ञतायाः बोधोऽपि जातः। मल्लिनाथेन लिखितं यत् क्वचिद् विद्युद्युक्ता मेघा आसन्, क्वचित् सूर्यकिरणसम्पन्ना मेघा आसन्।

एकस्मिन्नेव प्रदेशे क्वचिद् वृष्टिरासीत्, क्वचिच्च वृष्टेरभाव आसीदिति चित्रम्।

अनेनैकेनैव वाक्येन श्लोकस्यार्थो दीपवत् स्पष्टो भवतीति। न सर्वत्र परं क्वचिद् वाचकानां तात्पर्यार्थापेक्षाऽपि भवति। यद्यपि तात्पर्यार्थकथनेन वाचकानां कक्षा न्यूनायते, विशेषतस्तु मल्लिनाथवाचकानाम्,तथापि क्वचिन्न दोषाय।

**उत्क्षिप्तमुच्छ्रितसितांशुकरावलम्बैरुत्तम्भितोडुभिरतीवतरां शिरोभिः।**
**श्रद्धेयनिर्झरजलव्यपदेशमस्य विष्वक्तटेषु पतति स्फुटमन्तरीक्षम्।।(४-२५)**

श्लोकेऽस्मिन्नपि गगनाधारव्याजमाश्रित्य रैवतकपर्वतोन्नतिर्वर्णिता। यथा ऊर्ध्वमुखचन्द्रकिरणैश्च ताराभिः दत्त आधारो येभ्यस्तानि शिखरमस्तकानि,

---

[१३] रे रे चातक! सावधानमनसा मित्रक्षणं श्रूयताम्-
मम्भोदा बहवो वसन्ति गगने सर्वेऽपिनैतादृशाः।
केचिद्वृष्टिभिरार्द्रयन्ति धरणीं गर्जन्ति केचिद्वृथा
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः।।
शतकत्रयादिसुभाषितसंग्रहः सं श्रीदामोदर कोसंबी;प्रका भारतीय विद्याभवन;
मुंबई; . १९४८, पृ. १८९.

तैःशिखरमस्तकैराकाशमुद्धृतम्, परमत्युन्नतित्वादधो जलप्रपातरूपेण पततीव दृश्यते। एतादृशं वर्णनं यत्र गगनं जलरूपेण पततीति प्रकरणकारेण शूद्रकेनापि मृच्छकटिके वर्षर्तुवर्णने गगनं द्रवीभूतं पततीति लिखितम्[१४]। अत एतादृशं वर्णनं प्रायः सुलभत्वात्क्लिष्टमपि शोभामावहति।

अत्रेदं कथनीयं वर्तते। यत्- द्वावपि वल्लभदेवमल्लिनाथावित्थमेवार्थं दर्शयतः परं वल्लदेवस्यदृष्टि सृष्टावन्योऽप्यर्थं आगतः।

तेनार्थेन समाजदर्शनमपि जायते। टीकाकारस्यायं गुणः काव्यप्रयोजनं यथार्थं करोति। यतो हि काव्यप्रकाशे मम्मटेन काव्यप्रयोजनावसरे व्यवहारज्ञानमप्येकं प्रयोजनं प्रदर्शितमस्ति[१५]। तस्माद् वल्लभदेवो लिखति यद् गगनं तथोन्नातं जातं यथा तस्य पातस्तु सुनिश्चित एव, कारणं समाजेऽपि येऽधिकोन्नतिं गच्छन्ति तेषामधः पतनमपि भवत्येव। कालिदासकविरपि शाकुन्तले चन्द्रेऽस्ताचलं गते तमेव व्यहारं सूचयति[१६]।

अपरञ्च यद्येकस्य मस्तके भारो भवति तर्हि सोऽन्यस्य करं गृहीत्वा तिष्ठति, तथैव पर्वतस्य मस्तके गगनभारो वर्तते, तस्मात् तेन रैवतकेन चन्द्रकिरणसाहाय्यं गृहीतमिति भावः। एतदपि नितान्तं स्वाभाविकमेव कारणं समाजे वयं सर्वत्र विलोकयामो यत्र कस्यचिदपि जनस्य मस्तके भारो नाम कठिनं कर्म विवाहाद्यवसरो वा भवति तदा सोऽप्यन्यस्य हस्तं नाम साहाय्यं गृह्णाति। तस्मादेव कुत्रचिल्लिखितं वर्तते यत्- 'परस्परेण शोभनोऽयं संसारः' ।

अत्र वल्लभदेवेनात्युन्नतिरेवाधःपतनस्य कारणं भवतीति सूचितम्, अन्यच्च दुःखावसरेऽन्यस्योपकारस्यापेक्षा स्वाभाविकीति सूचितम्। यत्र कुत्रापि टीकाकारा यत् किमपि लेखितुं न शक्नुवन्ति, यतो हि तेषामपि मर्यादा भवति। ते यल्लिखन्ति

---

[१४] गता नाशं तारा उपकृतमसादविव जने
वियुक्ताः कान्तेन स्त्रिय इव न राजन्ति ककुभः।
प्रकामान्तस्तप्तं त्रिदशपतिशस्त्रस्य शिखिना
द्रवीभूतं मन्ये पतति जलरूपेण गगनम्।।
**मृच्छकटिकम्; (५-२५); सं नारायणराम आचार्य, प्रका0 निर्णयसागर-मुद्रणालयम् मुंबई ई. १९५०पृ. १४३/१४४.**

[१५] काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मितयोपदेशयुजे।।
काव्यप्रकाशः (१-२) पृ. ५.

[१६] यात्येकतोऽस्तशिखरं पतिरोषधीनामविष्कृतोऽरुण पुरःसर एकतोऽर्कः।
तेजो द्वयस्य युगपद्व्यसनोदयाभ्यां लोको नियम्यत इवात्मदशान्तरेषु।।२।।
अभिज्ञानशाकुन्तलम्(४-२) पृ. १२९.

तत्र केनापि प्रमाणेनावश्यं भवितव्यम्। अतः शिर इत्यस्यार्थः ‘शिखर’, ‘मस्तकञ्च’ भवति, ‘कर’ इत्यस्यार्थः ‘रश्मिः’, ‘हस्तश्च’ भवति। अनेनार्थद्वयं गृहीत्वा वल्लभदेवेनान्योऽर्थः प्रकाशितः।

एतस्मात् श्लोकादिदं तात्पर्यं भवति। यथा – मल्लिनाथाद् वल्लभदेवस्य सामाजिकी दृष्टिसृष्टिर्विशेषा दृश्यते। अन्यच्च काव्यप्रयोजनानि तस्य मानसे विशेषतस्स्पष्टानि वर्तन्ते।

**आसादितस्य तमसा नियतेर्नियोगादाकाङ्क्षतः पुनरपक्रमणेन कालम्।**
**पत्युस्त्विषामिह महौषधयः कलत्रस्थानं परैरनभिभूतममूर्वहन्ति।।** ४-३४

चतुर्थसर्गे रैवतकपर्वतवर्णनावसरे कविना माघेन सूर्यवर्णनं कृतम्। तद् यथा अत्र पर्वते विधेराज्ञाकारणात् तमसा पराकृतस्य तमोनिवृत्तिकालस्य प्रतीक्षां कुर्वतः प्रभास्वमिनः सूर्यस्य प्रभारूपपत्नीनामन्यस्मादपराजितास्तित्वं दिव्यौषधयो रक्षन्ति।

अस्मिन् श्लोके सूर्यः स्वपत्नीरूपां प्रभां न्यासीकृत्यास्तं गच्छति, पुनः प्रातः काले पुनर्ग्रहणं करिष्यति। सूर्यस्यायं विपत्कालस्तस्मादिदमित्थं भवति। अत्र विशेषणानां श्लिष्टत्वादन्योऽप्यर्थो भवितुमर्हति। यथा- विपदि यदा शत्रवः आक्रमणं कुर्वन्ति तदा वीरपुरुषा भार्यारक्षणं कथं कुर्वन्ति तर्हि ते साधुभ्यः स्वभार्यां न्यासरूपेण दत्त्वा यान्ति, पुनः साधुसमये समायाते सत्यागत्य पुनः स्वीकुर्वन्ति। अत्र सूर्यवर्णने निशेषणद्वाराऽयमर्थः प्राप्यते।

पूर्वकथनं वल्लभदेवेन मल्लिनाथेन च लिखितम्। उमावपि टीकाकारौ द्वावप्यर्थौ स्वीकुरुतः। परं तयोरर्थस्वीकृतिमार्गो भिन्नः। एकेन श्लेषद्वारार्थद्वयं स्वीक्रयते तर्हि द्वितीयेन समासोक्तिद्वारार्थद्वयं स्वीक्रयते। समानार्थकथनेऽपि कस्मान्मतभेदो जायते। अत्र कारणं श्लेषालङ्कारेऽप्यर्थद्वयं भवति, समासोक्तावप्यर्थद्वयं भवति। तस्मात् कारणादत्र मतभेदो दृश्यते। द्वयोरप्यलङ्कारयोरर्थे विशेषणानि विशेष्यञ्चोभयमपि श्लिष्टं भवति। समासोक्तौ केवलं विशेषणान्येव श्लिष्टानि भवन्ति न तु विशेष्यमपि। श्लेषेऽर्थद्वयमपि प्रकृतं वाच्यं च भवति, परमन्योऽर्थोऽप्रकृतो गम्यश्च भवति। श्लेषस्य सौन्दर्यं द्वयोरप्यर्थयोः कथनेन प्रकटीभवति, परं समासोक्तेः सौन्दर्यमप्रकृतव्यवहारस्य प्रकृतारोपणे स्थितम्।

एवं यदि विचार्यते तर्हि वल्लभदेवः श्लेषालङ्कारेणार्थद्वयं लिखति[17], मल्लिनाथस्तु समासोक्त्यलङ्कारेणार्थद्वयं लिखति[18]। श्लेषसमासोक्तिलक्षणानुसारं यदि श्लोकस्यार्थघटनं क्रियते तर्हि मल्लिनाथस्य समासोक्तिरेव योग्येति प्रतिभाति।
एवमन्यत्रापि कतिपयश्लोकेषु एवम्विधोऽर्थः स्वीकृतः[19]। अत्रापि स एवालङ्कारो युक्तियुक्तो दृश्यते। कारणं कवेरत्र सूर्यव्यवहार एवाभिष्टो भवेत्, तत्र भार्यारक्षणं वाञ्छतः कस्यचिद् वीरस्य भार्यान्यासीकरणरूपो व्यवहारस्त्वाक्षिप्तः। तस्मादत्र भार्यान्यासीकरणव्यवहारस्तु गम्य एव वर्तते।
परं श्लोकेऽस्मिन् नियतिः तमः, पतिः, कलत्रमिमे शब्दा यथाक्रमंविधातारम्, परिस्थितिम्, अन्धकारम् आपत्कालम्, सूर्यम्- पतिम्, प्रभाम्-भार्याम् तथाविधानर्थानपि सूचयन्ति, परमत्रौषधयोऽर्कश्च विशेष्यपदानि श्लिष्टानि न सन्ति तस्मादत्र समासोक्तिरेव। अत्रेदमपि चिन्तनीयं यदत्रार्थद्वयमपि गम्यमेव वर्तते व्यवहारात्। तस्मादत्र विश्वनाथस्य समासोक्तिलक्षणं विशेषतः कार्यान्वितं दृश्यते। विशेषणानां लिङ्गसाम्यादर्थप्राप्तिर्जायते।
एतस्य तात्पर्यमिदमेव श्लोकेऽस्मिन् सर्वाणि पदानि श्लिष्टानि न सन्ति तस्मादत्र न श्लेषः। अपरं सूर्यव्यवहार एवात्र प्रकृतो वाच्यश्च वर्तते, तस्मान्नात्र श्लेषः। कवेरत्र गुह्यार्थे गौरवमिति नात्र श्लेषः। श्लेषस्य समासोक्तेश्च लक्षणानि साम्यभेदादिसर्वञ्चावलोक्य वल्लभदेवान्मल्लिनाथस्य समासोक्तिचिन्तनं प्रसङ्गानुरुपं लक्षणानुरूपं च दृश्यते। माघेऽलङ्कारविमर्शग्रन्थोऽप्यत्र समासोक्तिमेव स्वीकरोति[20]।

---

[17] श्लेषः स वाक्ये एकस्मिन् यत्रानेकार्थता भवेत्। काव्यप्रकाशः (१०-९६) पृ ३६६
शब्दैः स्वभावादेकार्थैः श्लेषोऽनेकार्थवाचनम्। साहित्यदर्पणः (२-३१०)
संपादिका- डॉ. जागृति पंड्या, प्रका0 सरस्वतिपुस्तक भंजार अहमदाबाद ई १९४४ पृ ८२.
श्रुत्यैकयानेकार्थप्रतिपादनं श्लेषः। रसगङ्गाधरः पृ ६६०.

[18] परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः। काव्यप्रकाशः (१०-९७) पृ. ३६७
समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः।
व्यवहारसमारोपः प्रकृतेऽन्यस्य वस्तुनः।। साहित्यदर्पणः (१०-५६), पृ. ७७७

[19] अयमतिजरठाः प्रकामगुर्वीरलघुविलम्बिपयोधरोपरुद्धाः।
सततमसुमतामगम्यरूपाः परिणतदक्करिणास्तटी र्बिभर्ति।।२९।।
अत्र प्रकृततटीविशेषणमहिम्ना अप्रकृतवृद्धाङ्गनाप्रतीतेः समासोक्तिः।
शिशुपालवधम्(चौखम्बा)., पृ. १५३.

[20] 'आसादित........' अत्र प्रस्तुतेऽप्रस्तुतस्य साम्यप्रतीतेः विशेषणमूलासमासोक्तिः।
माघेऽलङ्कारविमर्शः पृ १९९.

**पुरः पतिस्कन्धनिषण्णबालप्रबालहस्ताः प्रमदा इवात्र।**
**पुष्पेक्षणैर्लम्बितलोचकैर्वा मधुव्रतव्रातवृतैर्व्रतत्यः।।(4-35)**

रैवतकवर्णनं कुर्वन् कविवरो माघो लिखति। यत् – अत्र (रैवतके) प्रियतमतुल्य-वृक्षस्य प्रकाण्डतुल्ये स्कन्धे संस्थापितहस्ततुल्यकोमलकिसलयास्तादृश्यो लताः भ्रमरसमूहेनावगुण्ठितत्वात् कृतनीलावगुण्ठननयनसमानपुष्पत्वात् नार्य इवाशोभन्तः।

अत्र नार्य इव लतानामपि चरित्रं दर्शितम्। यथा नार्यः पतिमाश्रित्य जीवन्ति तथैव लता अपि वृक्षमाश्रित्य स्थिताः[२१]। यत्र श्लेषो न भवति तत्रापि वल्लभदेवेन श्लेषचर्चा क्रियते तदेव चित्रम्। अत्र न श्लेषस्तथापि वल्लभदेवेन श्लेषः स्वीकृतः। परमत्र 'लम्भित' स्थाने 'लम्बित' पाठं गृहीत्वा लोचकस्य च ग्राम्यनारीशिरोवस्त्रमित्यर्थं कृत्वा साध्वर्थो दर्शितः। मल्लिनाथेनात्र 'लम्भिता प्रापिता' लोचकास्तारकाणि इति पाठस्स्वीकृतः। परमत्र न किमपि वैशिष्ट्यं दृश्यते। लोचकशब्दस्यार्थो मल्लिनाथेन कोशद्वारा प्रमाणीकृतश्चेत्[२२] वल्लभदेवेनापि प्रहेलिकातुल्यं सुभाषितं विलिख्यार्थः प्रमाणीकृतः[२३]। एवमत्र भ्रमरसमूहोऽवगुण्ठनतुल्य आधिक्याच्च स्त्रीसन्दर्भत्वाच्च युक्तियुक्तः। अस्मिन्नर्थे सौन्दर्यं दृश्यते,न तथा मल्लिनाथकृतार्थे सौन्दर्यम्।

❋❋❋

---

[२१] अनाश्रया न शोभन्ते पण्डिता वनिता लाताः। (कस्यापि)

[२२] लोचको मांसपिण्डे स्यादक्षितारे च कज्जले। - इति मल्लिनाथः।।
शिशुपालवधम् निर्णयसागरप्रेसः पृ. १०१.

[२३] यो गोपीजनवल्लभः कुचतटव्याभोगलब्धास्पदं
छायामात्रविरक्तको बहुगुणश्चारुश्चतुर्हस्तकः।
कृष्णः सोऽपि हताशयाऽप्यपहृतः सत्यं कयाऽप्यद्य मे
किं राधे! मधुसूदनो न हि नहि प्राणप्रियो लोचकः।।
(वल्लभदेवेनोद्धृतसुभाषितम्)- इति वल्लभदेवः।।
शिशुपालवधम् सैव श्रीनगरस्यावृत्तिः पृ. १३९.

# सर्गः-५
## सेनानिवेशः

शिशुपालवधमहाकाव्यस्य पञ्चमे सर्गे रैवतकपर्वते स्थितस्य भगवदनुयायिवृन्दस्य तदश्वगजादिवरणञ्चायाति।

सामान्यरूपेण लेखनपद्धतिं विहाय पञ्चमसर्गे वल्लभदेवमल्लिनाथयोर्लेखने न विशेषं किञ्चित्परिवर्तनं दृश्यते। तथापि क्वचिद् अलङ्कारविषये पूर्ववद्विवेचने मतभेदो दृश्यते। अश्वलक्षणविषये वल्लभदेवेन शालिहोत्रग्रन्थानुसारं लिख्यते, मल्लिनाथेन भोजराजानुरूपाणि हयलीलावत्यनुरूपाणि च लक्षणानि लिखितानि[1]। सन्दर्भग्रन्थानामुल्लेखाय मल्लिनाथस्य विशेषो यत्नो दृश्यते। मल्लिनाथेन नायिकाभेदा अपि लिख्यन्ते[2]। क्वचिदर्थे भेदो दृश्यते[3]।

एवमत्र पूर्वलिखितानुसारं वल्लभदेवमल्लिनाथयोर्लेखने विवेचने वा भिन्नता दृश्यते।

इदानीमुदाहरणमुखेन कानिचित्पद्यानि समीक्ष्यन्ते।

**अल्पप्रयोजनकृतोरुतरप्रयासैरुद्गूर्णलोष्टलगुडैः परितोऽनुविद्धम्।**
**उद्यातमुद्द्रुतमनोकहजालमध्यादन्यः शशं गुणनल्पमवन्नवाप।।** ५-२५

पञ्चमसर्गे रैवतकरमणीयतां विलोक्य भगवतः श्रीकृष्णस्य सैन्यं तत्रैव निवासं चकार। तत्र स्वल्पकालपर्यन्तं निवासतां वीराणां कालः कथमगच्छदिति वर्णयन् माघकविर्लिखति। तद् यथा- स्वल्पप्रयोजनस्य कृतेऽधिकं प्रयत्नं ये कुर्वन्ति तादृशा वीराः पुनः कीदृशास्तर्हि यैर्हस्तेषु दण्डा धृताः तथा च यैः पाषाणखण्डाः क्षिप्ताः, तादृशेभ्यः वीरेभ्यः प्राणरक्षाहेतवे वृक्षजालमध्यात् निःसृत्य दूरं धावन्तं कमपि शशं कश्चिद्वीरोऽवाप।

अत्र शशवधं कर्तुं वाञ्छन्तो वीरा इतस्ततो धावन्तो दृश्यन्ते। तत्र कारणं पूर्वस्मिन् काले पशुवधो राज्ञां कर्तव्यमासीदिति। महाकविना कालिदसेन

---

१ पद्यं(५-१०) पश्यतु। इत्यत्र टीकाद्वयम्। शिशुपालवधम् (5-10) चौखम्बा पृ. १७७.

२ नायिकाभेदार्थं (५-२३) पद्यं विलोकयतु। इत्यत्र टीकाद्वयं। शिशुपालवधम् (५-२३) चौखम्बा पृ. १८४.

३ अर्थभेदार्थं (5-25) पद्यं विलोक्यताम्। इत्यत्रापि टीकाद्वयम्। शिशुपालवधम् (5-25) चौखम्बा पृ.185.

शाकुल्तले मृगमनुधावतो दुष्यन्तस्य शरीरं सुदृढं जातमिति वर्णितम्[४]। अतो मृगया राज्ञां धर्मस्तस्मादत्र वीरा मृगयां कुर्वन्ति येन युद्धाभ्यासोऽपि जायते।

वल्लभदेवस्य प्रथमार्थस्तु तं भीतं शशं कश्चित् अवाप, अर्थात् तद्रक्षणं कृतवानिति। तत्र कारणमवतेर्त्राणार्थत्वम्। अतः केनचिद्वीरेण शशो रक्षितः। अस्मिन्नर्थे द्ववप्येतौ समानमतौ स्तः। अन्यत्र वल्लभदेवेन 'अवतेर्हिंसार्थत्वादिति विलिख्य 'अवाप' इत्यस्यार्थः 'जघान' इति कृतः '। तस्यैव 'अवाप' पदस्य मल्लिनाथेन जग्राहेत्यर्थः कृतः[५]। तेन 'गुणमवत्' इत्यस्यार्थः 'पाशं' प्रयुञ्जानः कृतः। एवमेकस्मिन्नर्थे- मृगो रक्षितः, द्वितीयार्थे मृगो हतः, तृतीयार्थे मृगो गृहीतः, एवं त्रयोऽर्था दर्शिताः। प्रथमार्थे भीतस्य रक्षणेन धर्मोभवतीति प्रयोजनम्[६], द्वितीयार्थे कटकमध्ये हि शशको व्रजन् सर्वथा वध्य इति लोकाचारः प्रयोजनम्, तृतीयार्थे यो हन्ता तस्यैव मृग इति व्याधसमयः।

रक्षणं तु द्वयोरपि टीकाकारयोरभिमतोऽर्थो विद्यते। तस्मादत्र न चर्चा विषयः। येन केनापि प्रकारेण वधस्तु सरलः परं शशो जीवन् ग्राह्यश्चेत् कठिनं कर्म। तस्मात् जग्राहेति धात्वर्थो स्वीकर्तुमुचितः। अपरं तत्र विशेषप्रयत्नोऽपि करणीयो भवति। तस्मात् 'अल्पप्रयोजनकृतोरुतरप्रयासैः' इति विशेषणमपि सार्थकं भविष्यति। यद्यपि वल्लभदेवस्याप्यर्थो योग्य एव वर्तते। परं श्लोकस्यास्य भाषान्तरं विचिन्त्य, तथा च गुणस्यार्थः पाश इति क्रियते। तर्हि स एवार्थो विशेषयोग्यतां दधाति। अस्माभिः केषुचित्प्रदेशेषु विलोक्यते यत् बहवो वीरा अश्वानारुह्य कमपि पशुमनुधावन्ति, तञ्च गृहीत्वा यः समायाति, स एव विजता भवति। अतः श्लोकेऽस्मिन् यद्वर्णनं वर्तते, तत्कदाचित् तादृशमेव स्यात्। मांसलाभ

---

४ मेदच्छेदकृशोदरं लघुभवत्युत्थानयोग्यं वपुः
सत्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः।
उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले
मिथ्या हि व्यसनं वदन्ति मृगयामीदृग् विनोदः कुतः।।
अभिज्ञानशाकुन्तलम् (२-५) पृ ६३.६४

५ शशमवाप= जग्राह। यो हन्ता तस्यैव मृग इति व्याधसमयादिति भावः।।
इति मल्लिनाथः।।
शिशुपालवधम् (५-२५) निर्णयसागरप्रेसः पृ. १२४.

६ सर्वकामसमृद्धस्य अश्वमेघस्य यत्फलम्। त्तफलं लभते सम्यग्रक्षिते शरणागते।।
हितोपदेशः (१०-६३) सं. M.R KALE; प्राका0 THE ORIENTAL PUBLISHING COMPANY; BOMBAY ई. १९१०, पृ. १२४.

एव करणीयश्चेत् वने तु बहवो बृहत्पशवो भवन्ति, तर्ह्यल्पस्य मारणे को लाभः। अत्र ग्रहणकौशलमेव दर्शनीयमिति कवेरभिमतं स्यादिति भावः।

**ये पक्षिणः प्रथममम्बुनिधिं गतास्ते**
**येऽपीन्द्रपाणितुलिता युधलूनपक्षाः।**
**ते जग्मुरद्रिपतयः सरसीर्विगाढु-**
**माक्षिप्तकेतुकुथसैन्यगजच्छनेन।।(5-31)**

पञ्चमसर्गे कविना माघेन रैवतकसमीपे स्थितस्य भगवद्बलस्य वर्णनं कृतम्। तत्र 'गजाः पर्वता इवासन्' तथा वर्णनं कर्तुमयं श्लोको रचितः। श्लोकेऽस्मिन् प्राचीनसमये पर्वताः पक्षयुक्ताः आसन्, ततश्च देवेन्द्रेण वज्रेण पक्षच्छेदो विहितः। एतस्योल्लेखो भर्तृहरिणाऽपि कृतः[७]। तात्पर्यं पर्वताः सपक्षा आसन्, तेषां पक्षच्छेदस्तु वज्रिणा वज्रेण कृतः, एतज्ज्ञात्वा मैनाकादयः कतिपयपर्वताः पूर्वमेव सागरनिमग्ना बभूवुः। एनं प्रसङ्गमेव गृहीत्वा कविनाऽत्र गजानां वर्णनं कृतम्।

यद्यर्थो विलोक्यते तर्हि – ये पक्षान्विताः पर्वताः आसन् ते तु देवेन्द्रा क्रमण भयात् पूर्वमेव सागरं गताः परं येषां देवेन्द्रहस्तेन पक्षच्छेदो जातस्तेऽपि केतुकुथरहिताः सेनागजरूपेण सरसि स्नातुं निमग्नाः।

श्लोकेऽस्मिन्नलङ्कारविषये वल्लभदेवस्य मतं विचार्यते चेत्तेनास्मिन् श्लोके उत्प्रेक्षा स्वीकृता मल्लिनाथेनाप्यत्रोत्प्रेक्षा स्वीकृता। परं सा गम्या वर्तते, स्पष्टरूपेणात्रापह्नुत्यलङ्कारो वर्तते इति तन्मतम्। उभयोरपि मतयो र्विचारः क्रियते तदा मल्लिनाथस्य मतं सर्वप्रकारेण योग्यं भाति।

पद्येऽस्मिन् मन्ये शङ्के ध्रुवादाय उत्पेक्षावाचका ये शब्दा दण्डिनिर्दिष्टाः सन्ति तेभ्यो नैकोऽपि दृष्टिपथमायाति, तस्मात् कारणादत्र स्पष्टोत्प्रक्षा न स्वीक्रियते। तथापि यदि कस्यचिदन्यस्यालङ्कारस्य सम्भावना न भवति तस्मात् स्वीक्रीयते; परमत्र तु अपह्नुत्यलङ्कारस्तु स्फुट एव [८]। कारणमपह्नत्यलङ्कारे प्रकृतस्य निषेधं कृत्वाऽर्थात् उपमेयस्य निषेधं कृत्वा उपमानस्य स्थापना भवति। अस्मिन् पद्येऽपि

---

७ वरं प्राणच्छेदः समदमघवन्मुक्तकुशिल-
प्रहारैरुद्गच्छद्गहनदहनोद्गारगुरुभिः।
तुषाराद्रेः सूनोरहह पितरि क्लेशविवशे
न चासौ संपातः पयसि पयसि पयसां पत्युरुचितः।
शतकत्रयादि-सुभाषितसंग्रह (३२१) पृ. १२६.

८ प्रकृतं यन्निषिध्यान्यंसाध्यते सात्वपह्नुतिः।।7।।
काव्यप्रकाशः (१०/७) पृ. ३६४.

गजा उपमेयरूपाः सन्ति, तन्निषेधं कृत्वोपमानरूपाणां पर्वतानां तत्रारोपः कृतस्तस्मादत्रायमलङ्कारो भवितुमर्हति।।

अस्मिन्नलङ्कारे प्रकृतस्य निषेधर्थं कपट-कैतव-छद्म-छल-मिष-वपुस्-आदिभ्यः कस्यचिदुल्लेखोऽनिवार्यो भवति। अस्मिन् पद्ये गजच्छलेन इत्यस्योल्लेखः कृतः। तस्मादयं **कैतवापह्नुतिप्रकारः** कथ्यते[९]।

यद्यपि माघेऽलङ्कारविमर्शकारेणात्रोत्प्रेक्षा स्वीकृता वर्तते[१०], तथा च तेनापह्नुत्यलङ्कारस्योल्लेखोऽपि न कृतः। अर्थो विचार्यते तर्हि गजा पर्वता इव तथा भवितुमर्हति, तदर्थमेव मल्लिनाथेन उत्प्रक्षा व्यज्यते तथा लिखितमस्ति।

श्लोकेऽत्रालङ्कारविषये मल्लिनाथस्य सूक्ष्मदृष्टिर्वर्तते। या स्वल्पमपि भेदं विलोकयितुं शक्नोति। तस्मादत्र पद्येऽपह्नुत्यलङ्कार एव योग्यः स्फुटश्च। उत्प्रेक्षा तु व्यज्यत एव।

**अतीन्द्रकुञ्जचरकुञ्जरगण्डकाष-**
**संक्रान्तदानपयसो वनपादपस्य।**
**सेनागजेन मथितस्य निजप्रसूनै-**
**र्मम्ले यथागतमगामि कुलैरलीनाम्।। (५-४३)**

पञ्चमसर्गेऽस्मिन् रैवतकपर्वते स्थितायाः सेनाया गजानां वर्णनं कविना माघेन कृतम्।

यथा – गिरिराजस्य रैवतकस्य कुञ्जेषु भ्रमतां गजानां गण्डस्थलानां घर्षणैर्मदजलाधिवासं गतस्तस्मादेव सेनागजेन स वृक्षो भग्नः। तस्य भग्नतरोः पुष्पाणि म्लानीभूतानि, परं भ्रमरास्तु यथागतास्तथैव प्रयाताः।

पूर्वलिखितोऽर्थो वल्लभदेवेन मल्लिनाथेन च दर्शितः। परं मल्लिनाथेन समासोक्त्यलङ्कारमाश्रित्यान्योऽप्यर्थो दर्शितः[११]। यद्यपि समासोक्तौ विशेषणानि श्लिष्टानि भवन्ति[१२], परमत्र तथा स्पष्टा समासोक्ति र्न विद्यते। किन्तु

---

[९] केतवापह्नुतिर्व्यक्तौ व्याजाद्यैर्निह्नुतेः पदैः।
निर्यान्ति स्मरनाराचाः कान्तादृक्पातकैतवात्।।३२।।
कुवलयानन्दः (३१) पृ ३४.

[१०] ये पक्षिणः......जातिगतगम्योत्प्रेक्षा स्वरूपगा च सा।
माघेऽलङ्कारविमर्शः पृ. ११०.

[११] इभवनपादपादीनां विशेषणसाम्यादापन्नाद्यौपम्यप्रतीतेः कथञ्चित्समासोक्तिरुन्नेया।।
इति मल्लिनाथः।।
शिशुपालवधम्(१३१) निर्णयसागरप्रेसः पृ. १३१.

[१२] परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः। काव्यप्रकाशः (१०-९) पृ. ३६७.

गजवृक्षविशेषणद्वारा ज्ञायते। अत्र पुष्पाणि म्लानीभूतानि अर्थात् शुष्काणि तथा च भ्रमरास्तु दूरादेव पलायिताः अनेनाप्यन्योऽर्थो ज्ञायते। अत्र भ्रमराः पुष्पाणि च वृक्षाश्रयं कृत्वा तिष्ठन्ति। यथा सरसि मत्स्यकूर्मखगादयोऽन्येऽपि निवसन्ति परं तस्य सरसो नितान्तमात्मीयास्तु मीना एवेति, प्रस्ताविकविलासे जगन्नाथेन वर्णितम्[१३]। तत्र कारणं जलाभावे यदा सरः शुष्कं तदा अन्ये तत् त्यक्त्वा यान्ति परं मीनाः सरसा सह स्वीयं जीवनं त्यजन्ति। सैवोत्तमा प्रीतिः।

अन्यत्रापि सुभाषितेषु लोके स्वार्थव्यवहारो दर्शितः[१४]। मल्लिनाथेनापि पुष्पभ्रमराणां वृक्षं प्रति स एव व्यवहारो दर्शितः। वृक्षो भग्नो नामापद्गतस्तस्मात् तस्यात्मीयभूतानि पुष्पाण्यपि नष्टानि सहजस्नेहत्वात् परं मधुपास्तु समागताः परमापद्गतं वृक्षं विलोक्य दूरादेव भ्रष्टाः।

समाजेऽपि द्विविधा जना भवन्ति, केचन तु यत्राश्रयं कुर्वन्ति तस्मिन् स्वामिनि विपद्गते सति स्वयमपि दुःखमनुभवन्ति। तथा च यथा सम्पत्तौ तथैव विपत्तावपि सहैव तिष्ठन्ति। केचन जनाः सम्पातौ तिष्ठन्ति, यथा भ्रमरा मधुपानं कुर्वन्ति तथैव शोषणं कुर्वन्ति, किन्तु विपत्तौ दूरादेव पलायन्ते, तदा साहाय्यं न कुर्वन्ति।

प्रकृतिरपि प्रतिक्षणं किञ्चित् पाठयति। कवयोऽप्येवं प्रकृतिवर्णनं कृत्वा समाजदर्शनं कारयन्ति[१५]। समाजव्यवहाररस्य ज्ञानमप्येकं काव्यप्रयोजनमिति मम्मटः स्पष्टं कृतवान्[१६] ।

---

[१३] आपेदिरेऽम्बरपथं परितः पतङ्गा
भृङ्गा रसालमुकलानि समाश्रयन्ति।
संकोचमञ्चति सरस्त्वयि दीनदीनो
मीनो नु हन्त कातमां गतिमभ्युपैतु।।16।।
**प्रास्ताविकविलासः (१६)** सं आर्येन्द्रशर्माः प्रका0 उस्मानियाविश्वविद्यालयः हैदराबाद . १९५८, पृ ३८.

[१४] वृक्षं क्षीणफलं त्यजन्ति विहगाः शुष्कं सरः सारसाः
निर्द्रव्यं पुरुषं त्यजन्ति गणिका भ्रष्टं नृपं मन्त्रिणः।
पुष्पं पर्युषितं त्यजन्ति मधुपा दग्धं वनान्तं मृगाः
सर्वः कार्यवशाज्जनोऽभिरमते तत्कस्य को वल्लभः।।
सुभाषितरत्नभाण्डागार(१०-१२) सं, नारायणराम आचार्य; प्रका निर्णयसागर प्रेस;मुंबई. ई. १९५७,पृ. १७८

[१५] LET NATYRE BE YOUR TEACHER. (कस्याचित्)

तस्मात् विचक्षणाः टीकाकारास्तादृशं प्रसङ्गमधिगत्यानुकूलमर्थं प्रकाशयन्ति। अस्मिन् श्लोकेऽपि गजवृक्षपुष्पभ्रमरादीनां वर्णने यथाक्रममापत्स्वात्मीयानात्मीयादीनां व्यवहारो मल्लिनाथेन सूक्ष्मार्थदर्शिन्या दृष्ट्या विलोक्य प्रकाशितः। विशेषणसाम्यात्समासोक्त्यलङ्कारमाश्रित्यायमर्थो दर्शितः। अनेन तस्यार्थग्रहणकौशलं नितान्तं स्फुटं भवतीति भावः।

**स्तम्भं महान्तमुचितं सहसा मुमोच दानं ददावतितरां सरसाग्रहस्तः।**
**बद्धापराणि परितो निगडान्यलावीत्स्वातत्र्यमुज्ज्वलमवाप करेणुराजः।। (५-४८)**

पञ्चमसर्गे रैवतकपर्वताश्रितशैन्यस्य गजानां वर्णनं कविना माघेन विहितम्। अत्र श्लोकेऽस्मिन् कस्यचिन्मदोन्मत्तस्य गजराजस्य वर्णनं वर्तते।

यथा- सहसा गजराजेन परिचितो बृहत्स्तम्भो दूरीकृतः। सजलाग्रभागेन स्वकरेणानल्पो मदोऽपि त्यक्तः। परितो बद्धानि निगडबन्धनान्यपि मुक्तानि। एवं प्रकारेणानेन गजराजेनोज्ज्वलं स्वातत्र्यमधिगतमिति भावः।

पूर्वलिखितानि सर्वाण्यपि विशेषणानि श्लिष्टानि सन्ति। तस्मात् श्लोकस्यार्थद्वयमपि भवितुमर्हति। प्रकरणद्वारा तु गजस्यार्थ आगच्छत्येव परं राज्ञोऽपि स्वातन्त्र्यार्थ आगच्छति। कथमिति तर्हि- केनचिद् राज्ञाऽपि नितान्तमुज्जवलं स्वातन्त्र्यमधिगतम्। तेन बुद्धेर्जाड्यं त्यक्तम्। सजलकरेणानल्पं दानमपि दत्तम्। शत्रूणां निगडबन्धनान्यपि मुक्तानि। एवं तेनोज्वलं स्वातन्त्र्यं प्राप्तम्।

वल्लभदेवेनायमर्थो दर्शितः, स एवार्थो द्वितीयो मल्लिनाथेनापि दर्शितः न तत्र किमपि नवीनं तेनोक्तम्।

परमत्र वल्लभदेवान्मल्लिनाथस्य लेखनपद्धतिः श्लाध्येति प्रतिभाति। कारणं यत्र द्वावर्थौ भवतस्तत्र प्रमाणमपेक्षितं भवति। तथा च टीकाकारेण स्वमत्यैवान्यार्थः प्रकाश्यते चेन्न चलति। तस्मादेव मल्लिनाथेन प्रारम्भे प्रतिज्ञा कृता यथा नामूलं लिख्यते किञ्चित्। अत एवाधारोऽप्यपेक्षितो भवति।

समान्यरीत्या विचारः क्रियते तर्हि स्तम्भस्य स्थाणुः गर्भः वा जाड्यमित्यर्था भवन्ति, दानस्य मदजलं धनदानं वाऽर्थो भवति, हस्तस्य गजकरो मनुष्यहस्तो

---

[१६] काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः पर निर्वृतये कान्तासम्मिततयोपदेशयुजे।। इति मम्मटः।।
काव्यप्रकाशः (१-२) पृ. ०५

वाऽर्थो भवति। एतानर्थान् स्पष्टीकर्तुं वल्लभेवेनामरकोषस्यैवोल्लेखः कृतः[१७]। परं मल्लिनाथेन विश्ववैजयन्त्यमरकोशानामत्र प्रमाणत्रयं प्रस्तुतम्[१८]।

अन्यच्चायमर्थः केन कारणेन क्रियते। तर्हि यत्रैकाधिकार्थाः भवन्ति तत्र श्लेषसमासोक्तिध्वनिकारणेष्वेकं भवति। केन कारणेनात्रर्थद्वयं प्रकाशितमिति वल्लभदेवेन न स्पष्टं कृतम्। मल्लिनाथेन कारणं स्पष्टं कृतम्। यथा यत्र विशेषणानि श्लिष्टानि भवन्ति परं विशेष्यं श्लिष्टं न भवति तत्र समासोक्तिर्भवति। परमत्र श्लोके करेणुराज इति विशेष्यमपि श्लिष्टं तस्मादत्र न समासोक्तिः।

---

१७ स्तम्भः स्थाणौ च गर्भे च। शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः, इत्यमरः।।
इति वल्लभदेवः
**शिशुपालवधम् (५-४८) चौखम्बा पृ** १९८

१८ स्तम्भस्थूणाजडत्वयोः इति विश्वः।
अन्दुको नगडोऽस्त्रियाम् इत्यमरः।
अपरः पश्चिमः पादः इति गजप्रकरणे वैजयन्ति। अत्र करेणुराजपदसाधर्म्यध्वनिः।
विशेष्यस्यापि श्लिष्टत्वान्न श्लेष इत्युक्तम्।। इति मल्लिनाथः।।
शिशुपालवधम् (5-82) निर्णयसागरप्रेसः पृ. 131/133.

# प्रकरणम्-८
# ऋतुचक्रानुभूतिः

## सर्गः-६
## ऋतुवर्णनम्

महाकाविना माघेन शिशुपालवधमहाकाव्यस्य षष्ठे सर्गे वर्णितं यद् भगवान् श्रीकृष्णस्तत्र रैवतकपर्वते सयादव: ससेन: स्थित:। स: रैवतकपर्वतरमणीयतां विलोक्य रन्तुकामो वर्तते। तस्य भगवत इच्छापूर्तिं कर्तुं सर्वे ऋतवो युगपत्तत्रैवागत्य स्थिता:। अनेन प्रसङ्गेन कविना ऋतुवर्णनस्य प्रकृतिसौन्दर्यस्य च प्रसङ्ग उद्भावित:। प्रकृते: प्रभावो मनुष्यजीवने भवत्येव, तस्मात् लोक व्यवहारवर्णनं कृतम्।

तात्पर्यमत्र सर्गे षण्णामृतूनां वर्णनं वर्तते। अत्र वल्लभदेवमल्लिनाथयोर्विवेचने वैषम्यविचार: क्रियते। सर्गादौ वल्लभदेवेन वृत्तपरिचियोऽस्मिन्सर्ग एव न दत्त:, परं मल्लिनाथेन वृत्तपरिचयो दीयते। अपरञ्च वल्लभदेवेन क्वचिदेवालङ्काराणामुल्लेखः कृतः परं मल्लिनाथेन 'समस्तेऽपि स यमकालङ्कारो वर्तते" तथा विलिख्य सर्गस्यालङ्कारविवेचने प्रथमं सामान्यरूपेण, ततश्च विशेषरूपेण विवेचनं कृतम्। अर्थविवेचने पाठान्तरग्रहणे वल्लभदेवस्य विशेष: प्रभावो दृश्यते। काव्यद्वारा माघकविना शास्त्रं पाठ्यते तस्मादत्रालङ्कारशास्त्रस्य नायिकाभेदप्रभेदादिकवर्णनं वर्तते, तत्सर्वमपि मल्लिनाथेन स्पष्टं विवेचितम्। अन्यच्च यत्रार्थद्वयं भवति तत्र वल्लभदेव: केवलमर्थमेव स्पष्टं विदधति, पर मल्लिनाथ: तत्कारणानामपि स्पष्टतां करोति। यथा - यत्रार्थद्वयंर्भवति तत्र श्लेषालङ्कारो भवति वा समासोक्त्यलङ्कारो भवति वा ध्वनिर्भवति। तेषामपि मल्लिनाथेन चर्चा क्रियते।

क्वचित्केषाञ्चित् सन्दिग्धशब्दानां वल्लभदेवेनार्थग्रहणे 'तत्रार्थ: क: ग्राह्य:' इति लिखितम्। एवमत्र द्वयोरपि टीकाकारयोर्विवेचने विषमता दृश्यते। स्वस्वमतानुसारं द्वावप्येतौ प्रशंसनीयौ वर्तेते एव।

**अथ रिरंसुममुं युगपद्गिरौ कृतयथास्वतरुप्रसवश्रिया।**
**ऋतुगणेन निषेवितुमादधे भुवि पदं विपदन्तकृतं सताम्॥६-१**

यदा भगवान् श्रीकृष्णो रन्तुकामस्सन् तत्र रैवतके स्थितस्तदा सज्जनानां विपत्तिनाशकरं तं हरिमाराधयितुं स्वस्ववृक्षानुसारं पुष्पाणां शोभाया: रचयिता ऋतुगणो युगपदेव गिरौ पदं कृतवान् । तात्पर्यं सर्वेऽपि ऋतवो युगपदेवागताः। एवमत्रर्तुवर्णनप्रसङ्गोऽङ्गीकृतः।

अस्य श्लोकस्यार्थविषये तु वल्लभदेवमल्लिनाथौ समानौ स्तः। परं सर्गादौ यद्येकस्मिन्नेव वृत्ते प्रायः सर्वे श्लोका भवन्ति तदानीं वृत्तोल्लेख: प्रथमपद्यविवेचने कर्तव्यो भवति।

पञ्चमसर्गपर्यन्तं तु वल्लभदेवेन तथोल्लेखो वृत्तानां कृत: किन्त्वत्र वृत्तोल्लेखो न कृतः। तद्विपरीतं मल्लिनाथेनात्र द्रुतविलम्बितवृत्तस्य लक्षणं दत्त्वोल्लेख: कृत:।[१] अन्यच्चात्र सर्ग एवेदं मल्लिनाथस्थालङ्कारविषये विशेषं विधानं दृश्यते, तद्यथा - 'अत्र सर्गे सर्वत्र यमक इति शब्दालङ्कार' इतिः।[२] अनेनेदं वक्तुं शक्यते यत् मल्लिनाथेन सम्पूर्णसर्गस्यावलोकनं कृत्वा सामान्यविधानं क्रियते। एवं वल्लभदेवापेक्षया मल्लिनाथस्यालङ्कारचर्चा विशेषपदमर्हत्येव, परं तस्य विहङ्गावलोकनन्यायेन पूर्वाभ्यासोऽपि प्रशस्य इति भावः।[३]

**स्फुरदधीरतडिन्नयना मुहु: प्रियमिवाऽगलितोरुपयोधरा।**
**जलधरावलिरप्रतिपालितस्वसमया समयाज्जगतीधरम्।।(६-२)**

ऋतुवर्णनप्रसङ्गादुद्धृतोऽयं श्लोको वतर्ते। श्लोकेऽस्मिन् वर्षावर्णनं कविना कृतम्।

यदा श्लोकस्यास्यार्थो विचार्यते तदा मेघपङ्क्तिस्तत्र रैवतकपर्वतमागता सा कीदृशी तर्हि वारं वारं स्फुरच्चञ्चलविद्युन्नेत्रा, अपतितजलविशालमेघसम्पन्ना, यया

---

१ ‘द्रुतविलम्बितमाह नभौ भरौ’ इति।
वृत्तरत्नाकरः (३-४९); सं. आचार्य बलदेव उपाध्याय: प्रका० चौखम्बा
सुरभारती प्रकाशन; वाराणसी; ई. १९९१; पृ. ७९.

२ सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते।।
साहित्यदर्पणः (१०-८) पृ. ६७२.

३ विहङ्गावलोकनन्याय: - यथा पक्षिण आकाश एव वर्तमाना भूतलावलोकनं कुर्वन्ति तथैव समस्तमपि सामान्याविलोकनं क्रियते तदाऽयं न्याय उपयुक्तो भवति।

स्वपरिपक्वसमयस्य प्रतिपालनं न कृतं तादृशी (मेघमाला) प्रियतमतुल्यं पर्वतमागतवती।

अत्र मेघमालाया: सर्वाण्यपि विशेषणानि श्लिष्टानि तस्मात् श्लोकस्यास्यान्योऽप्यर्थो भवितुमर्हति। तद्यथा - 'चञ्चलनयना, पीनोरुस्तना, अप्रतीक्षितसमया प्रियतमं मिलितवती

पूर्वलिखितमर्थद्वयं वल्लभदेवेन लिखितम्, तदेव मल्लिनाथेन लिखितम्। परं तत्रेदं नव्यं यद् वल्लभदेवेनार्थद्वयं दर्शितं तद्वयं ज्ञातुं शक्नुम:, परं कुतोऽयमर्थ आगत इति ज्ञातव्यं तर्हि मल्लिनाथस्य विवेचनं पठनीयं भविष्यति। अत्रेदमपि स्मरणीयं यन्मल्लिनाथस्यान्योऽर्थ: प्रथमं वल्लभदेवेन दर्शित:। परं मलिनाथेनात्रार्थद्वयस्य कारणं समासोक्यलङ्कारो दर्शितः। समासोक्त्यलङ्कारे विशेषणानि श्लिष्टानि भवन्ति,[४] तत्कारणादेवान्योऽप्यर्थो वाक्यस्य भवति।

एवमत्र वल्लभदेवस्यैवार्थं विलिख्य मल्लिनाथेन तत्कारणं दर्शयित्वा काव्यास्वादनं रुचिकरं कृतम्। यत्र कुत्रापि विशेषार्थप्रतीतिर्भवति तत्र कारणान्वेषणेऽपि वाचका यतन्ते, तेषां यत्नोऽयं मल्लिनाथेन दूरीकृत:। टीकाकारस्येयमेवेतिकर्तव्यता स्यात्।

**द्रुतसमीरचलै: क्षणलक्षितव्यवहिता विटपैरिवमञ्जरी।**
**नवतमालनिभस्य नभस्तरोरचिररोचिररोचत वारिदैः॥(६-२८)**

माघरचिते शिशुपालवधे पष्ठसर्गस्य वर्षावर्णने श्लोकोऽयमायाति। अस्यार्थस्तु यथा - सवेगेन पवनेन चञ्चलवृक्षशाखाभि: क्षणं यावत् दृष्टाऽऽच्छादिता च मञ्जरी तथैव तमालसमानश्यामस्य वृक्षसमानविशालस्य नभस: सवेगेन पवनेन भ्रमद्भिः क्षणं यावत् दृष्टाऽदृष्टा च विद्युत् शुशुभे।

श्लोकेऽत्र नभसः कृते उपमानद्वयं तमालवृक्षो वृक्षश्च। तमालेन वर्षर्तु वर्णनत्वान्नभस:श्यामवर्ण: सूचित: वृक्षेन च विशालताऽस्य दर्शिता। अत्र वल्लभदेवेन वृक्षस्य पुनरुल्लेखः कृतः, तस्मात् पुनरुक्तिदोषो दर्शितः।

मल्लिनाथेन वल्लभदेवस्य पुनरुक्तिदोषकथनं मिथ्या कर्तुं वृक्षस्य 'श्रेष्ठ' इत्यर्थघटनं कृत्वा स दोषो दूरीकृत:।[५] यदा वयं 'पुरुषव्याघ्र' इति वदामस्तदा तत्र

---

[४] परोक्तिर्भेदकैः श्लिष्टै: समासोक्तिः। काव्यप्रकाशः (१०-९); पृ. ३६७.

[५] अत्र नभस्तरोर्नभ: श्रेष्ठस्येति व्याख्याने तरुशब्दस्य व्याघ्रादिवच्छ्रेष्ठार्थगोचरत्वात् मालशब्देन विशेषवाचिना तन्नीलसामान्येन पौनरुक्त्यमिति वल्लभः। तमालशब्दस्येन्द्र

व्याघ्रगुणान् स्मृत्वाऽर्थघटनं कुर्मस्तथैवात्र वृक्षस्य श्रेष्ठताऽर्थो ग्राह्योऽथवा तमालस्येन्द्रनीलवर्णग्रहणमेव कार्यमनेन तद्दोषो दूरीभविष्यति।

**शमिततापमपोढमहीरजः प्रथमबिन्दुभिरम्बुमुचोऽम्भसाम्।**
**प्रविरलैरचलाङ्गणमङ्गनाजनसुगं न सुगन्धि न चक्रिरे॥(६-३३)**

शिशुपालवधस्य षष्ठे सर्गे सर्वर्तूनां वर्णनं माघेन कृतम्। अस्मिन्पद्ये वर्षावर्णनं वर्तते।

अथ श्लोकस्यार्थो विचार्यते। मेघा पर्वताङ्गणं सुन्दरमकुर्वन्, कथं तर्हि जलबिन्दुनिपातेन सूर्यताप: शमयति। धरारज: शान्तं जातम्, सुरभिसमन्वितञ्च जातं तत्स्थलम्। एवं युवतयस्तत्र सानन्दं निर्बाधं गन्तुं समर्था भवेयुस्तथा पर्वतस्थलं मेघै: कृतमिति भाव:।

अत्रार्थविषये वल्लभदेवमल्लिनाथयो: समानमतमस्ति। परमम्बुमुचोऽचलाङ्गणं प्रमदाजनसुगम्यं न न चक्रिरे वाक्यस्यार्थे चिन्तनीयं वर्तते। न चक्रिरे इति न अथात् चक्रिरे एव। वल्लभदेवमतानुसार मल्लिनाथेनात्रार्थो दर्शितः, परं तेनैकस्य नियमस्यापि स्थापना कृताः। यथा द्वौ नञौ प्रकृतार्थं गमयत: अर्थात् नकारद्वयमुक्तार्थं दृढीकरोति। अत्र ज्ञानं प्राप्य यत्र कुत्रापि स **एव वाचकोऽन्यत्र** नकारद्वयस्य वाचनं करिष्यति तदा तस्यार्थ: स्फुष्टो भविष्यति।

तर्कशास्त्रेऽपि तथानियमोऽस्ति। एवं मल्लिनाथस्य टीकयाऽन्यदपि शास्त्रीयज्ञानं प्राप्यते यदन्यत्राप्युपकारकं भवति।

**दलितमौक्तिकचूर्णविपाण्डव: स्कूटितनिर्झरशीकरचारव:।**
**कुटजपुष्पपरागकणा: स्फुटं विदधिरे दधिरेणुगुविडम्बनाम्।।(६-३५)**
**नवपयःकणकोमलमालतीकुसुमसन्ततिसन्ततसङ्गिभिः।**
**प्रचलितोड्डुनिभै: परिपाण्डिमा शुभरजोभरजोऽलिभिराददे।।(६-३६)**
**निजरज: पटवासमिवाऽकिरद्धृतपटोपमवारिमुचां दिशाम्।**
**प्रियवियुक्तवधूजनचेतसामनवनी नवनीपवनावलि:।।(६-३७)**
**प्रणयकोपभृतोऽपि पराङ्मुखाः सपदि वारिधराऽऽरवभीरवः।**
**प्रणयिनः परिब्धुमनन्तरं ववलिरे वलिरेचितमध्यमा:।।(६-३८)**

---

नीलवन्नैल्यमात्रोपमानत्वात्तरुशब्दस्य स्वार्थवृत्तित्वेऽपि न पौनरुक्त्यमित्यन्ये।। इति मल्लिनाथ: ।शिशुपालवधम् (६-२८); निर्णयसागरप्रेस, पृ. १४९.

पूर्वलिखिताः श्लोकाः षष्ठे सर्गे ऋतुवर्णने समायान्ति। तेषु श्लोकेषु वल्लभदेवमल्लिनाथयो- र्विवेचनं समानमेव वर्तते। परमत्रैकं वैशिष्ट्यं दृश्यते यत् पूर्वसर्गविवेचनेषु वल्लभदेवेन प्राय: पर्यायवाचिनः शब्दा न दत्ताः, परमत्र वल्लभदेवेन परिवर्तनं कृतम्। तद्यथा तेनात्र पर्यायवाचिन: शब्दा: लिख्यन्ते, तथा च निघण्ट्वमरविश्वादिकोशानामपि तेनोल्लेख: कृत:।

तद्विपरीतं पूर्वसर्गेषु मल्लिनाथेन प्रायः सर्वत्र पर्यायशब्दानां कोशनिर्देषपूर्वकमुल्लेख: कृत: तेनात्रैव तद्विषयकं मौनमाकलितम्।

एतस्य तात्पर्यमिदमेव वल्लभदेवस्य विवेचनं विलोक्य मल्लिनाथेन टीका लिख्यते, तस्मात् तेनेत्थं लिख्यते। यदा वाचकाः टीकाद्वयं पठन्ति तदैव ज्ञानं जायते, तस्मादियं पद्धतिस्त्वमान्या। वल्लभदेवेन क्वचिल्लिङ्गनिर्देशोऽपि क्रियते तदपि तस्य सारल्यम्।

**अरमयन्भवनादचिरद्युतेः किल भयादपयातुमनिच्छवः।**
**यदुनरेरन्द्रगणं तरुणीगणास्तमथ मन्मथमन्मनभाषिणः॥(६-४०)**

षष्ठे सर्गे ऋतुवर्णने माधेनात्र वर्षावर्णनं कृतम् वर्षासमये सकामा जना: सक्रिया भवन्तीति साहित्यग्रन्थेषु सुविदितमेतत्।[६] महाकविना माघेनापि तथावसरं प्राप्य कामिजनचित्तवृत्तिवर्णनं कृतम्।

अथैतस्य श्लोकस्यार्थचिन्तनं कियते यथा - सामान्यरूपेण विद्युद्भयाद्भवाद् दूर गन्तुं या नेच्छन्ति स्म, परमार्थरुपेण कामवशं गतास्ता अव्यक्तमधुरभाषिण्यो युवतयो नृपगणं प्रसन्नमकुर्वन्निति भाव:।

अस्य श्लोकस्य 'मन्मन-मन्थर' पाठस्य चर्चा करणीया भविष्यति तयो: कश्च योग्य इत्यपि चिन्त्यम्। मन्मनमन्थरशब्दयो: पाठान्तरग्रहणं वल्लभदेव-मल्लिनाथाभ्यां कृतम्। मन्मथशब्दस्य विवेचने वल्लभदेवेन लिख्यते यत् मन्मनशब्दोऽव्यक्तमधुरवाचकं देशीपदम्, तथा च मन्थरशब्दस्यार्थोऽलसार्थ: कृतः। द्वयोरपिशब्दयोरौचित्यविचारः क्रियते। कामावस्थायां कामिन्य: सालसं वदन्तीति सामान्यम्। मल्लिनाथस्यैतद्वचनं कामावस्थायां सर्वप्रवृत्तित्यागं सूचयति

---

[६] तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो-
रन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ।
मेघालोके भवति सुखिनोऽप्यन्यथावृत्तिचेत:
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूसंस्थे।।३।।मेघदूतम् (पूर्वमेघ–३); पृ. ३.

वाग्व्यवहारोऽपि सालसो भवति तर्हि कामावस्थां सूचयति, वल्लभदेवस्य पाठान्तरे मन्मनशब्दो वर्तते यो देशी वर्तते तथा वल्लभदेवेन सूचितम्। तस्यार्थस्तु 'अव्यक्तमधुरगुञ्जनम्' भवति। पूर्वस्मिन् काले नार्य: पठनं न कुर्वन्ति स्म, अत: तासां संवादेषु प्राकृतशब्दानां बाहुल्यं भवति, तस्मात् मन्मनपाठो युक्तियुक्तो भवेत्। अन्यच्च यदा कश्चिदपि जनोऽनङ्गरङ्गरक्तो भवति तदा तमानन्दं मधुरगुञ्जनेन प्रकटीकरोति। तमेव भावं स्वीकृत्य वल्लभदेवेनैतद् ग्रहणं कृतं स्यात्।

मल्लिनाथस्य टीकायां शास्त्रानुसारं शुद्ध: पाठ: वर्तते। वल्लभदेवस्य टीकायां भावप्रधानः पाठः वर्तते। यद्यपि भाषादृष्टया मल्लिनाथस्य पाठ: समीचीनस्तथापि भावदृष्टया वल्लभदेवस्य पाठ: समीचीन:।

द्वयोरपि पाठयोरौचित्यविषये तथा वक्तुं शक्यते, यथा भवतु नाम मल्लिनाथस्य पाठ: भाषादृष्ट्या समीचीन: किन्तु प्रणये भाषाया: महत्त्वं न भवति, तत्र तु भावस्यैव प्राधान्यं भवति। अतो मन्थरशब्दापेक्षया मन्मनशब्दस्यौचित्यं दृश्यते।

एवमत्रापि पाठान्तरग्रहणे मल्लिनाथापेक्षया वल्लभदेवस्य चातुर्यं प्रसङ्गनुरूपं वर्तते। स: नितान्तं काकलीकोविदः प्रतिभाति।

**तनुरुहाणि पुरो विजितध्वनेर्धवलपक्षविहङ्गमकूजितैः।**
**जगलुरक्षमयेव शिखण्डिनः परिभवोऽरिभवो हि सुदुःसहः।।(६-४५)**

शिशुपालवधमहाकाव्यस्य षष्ठे सर्गे सर्वेषाम् ऋतूनां वर्णनं कृतम्। तत्र शरत्कालवर्णनादयं श्लोक उद्धृतः।

एतस्मिन्पद्ये हंसानां विजयो मयूराणाञ्च पराजयो वर्णितः। अस्य श्लोकस्यार्थस्तु यथा श्वेतपक्षयुतानां हंसानां कूजनध्वनिना येषां केकारव: पराजित: तादृशानां मयूराणां तनुरुहाणि ईर्ष्ययेव पतितानि। तत्र कारणं शत्रुद्वारा जातः पराभवोऽसह्यो भवति।

अत्र धवलपक्षविहङ्गमा नाम हंसा एवञ्च शिखण्डिनो नाम मयूराः तेषां मध्ये स्पर्धा दर्शिता। द्वयोरपि ध्वनिर्मधुरः। सामान्यरूपेण शरत्काले मयूरा मौनं भजन्ते तथा च तेषां लोमपातो भवति। अनेन कविना हंसानां विजयो मयूराणा पराजयो दर्शित:।

अत्रार्थविषये न किमपि वैशिष्ट्यं वल्लभदेवमल्लिनाथयोर्विवेचने विहाय लोकव्यवहारम्। मयूराणां लोमपातवर्णनाद् वलभदेवेनान्योऽप्यर्थ: सूचित: यथा ये जना पराभवं प्राप्नुवन्ति ते शिरोमुण्डनं कुर्वन्ति। पूर्वस्मिन्काले समाजे पराजितानामयं व्यवहार: स्यात्। ग्रन्थाः समाजादर्श इव भवन्ति। तस्माद्

व्यवहारदर्शनमेव प्राधान्यं दधाति। काव्येऽस्मिन् वल्लभदेवस्य व्यवहारविलोकनविवेचनं नितान्तं योग्यमिति भावः।

**विगतवारिधरावरणा: क्वचिद्दृशुरुल्लसिताऽसिलताऽसिता:।**
**क्वचिदिवेन्द्रगजाजिनकञ्चुका: शरदि नीरदिनीर्यदवो दिश:।।(६-५१)**

महाकविमाघविरचितशिशुपालवधमहाकाव्यस्य षष्ठे सर्गे शरदवर्णने श्लोकोऽयमायाति। शरत्काले दिग्वर्णनं कुर्वता माधेनेत्थं लिखितम्। यथा - शरत्काले यादवै: दिशा: क्वचिन्मेघावरणरहितास्तस्मात् कोशाकृष्टासिलता इवासिता विलोकिता, तर्हि क्वचित् समेधास्तस्माद् देवेन्द्रगजचर्मनिर्मिताच्छादनयुता इव विलोकिताः।

पूर्वश्लोकविवेचने वल्लभदेवमल्लिनाथयोर्विवेचनं तु समानमेव वर्तते। परं वल्लभदेवस्य विवेचने स्वल्पं वैशिष्ट्यं दृश्यते। यथा - अस्मिन् पद्ये मेघानामुल्लेख: कविना द्विवारं कृत:। प्रथमोल्लेखे "वारिधर" इति लिखितं द्वितीयोल्लेखे "नीरद" इति लिखितम्। उभयोरपि मेघवाचकशब्दोयोरर्थग्रहणं क्रियते। यथा - "वारि धारयतीति वारिधर:" तथा च "नीरं ददातीति नीरद:" एवं भवितुमर्हति। अत्रवारिधरनीरेदशब्दाभ्यां सजलानामेव मेघानां ग्रहणं भवेत्, परं श्लोके तथार्थघटनं न भवेत्। तत्र कारणं सजला मेघास्तु कृष्णा एव भवेयु:, एवमत्र श्लोके श्वेताश्वेतमेघानां ग्रहणं कृतम्, तस्मात् वल्लभदेवेन नीरदशब्देनासिता मेघा ग्राह्या इति स्पष्टं लिखितम्।

अनेनेदं स्पष्टं यन्मल्लिनाथापेक्ष्या वल्लभदेवोऽर्थस्य प्रसङ्गानुसारित्वं प्रकटयति।

**प्रियतमेन यया सरुषा स्थितं**
**न सह सा सहसा परिरभ्य तम्।**
**श्लथयितुं क्षणमक्षमताङ्गना**
**न सहसा सहसा कृतवेपथु:॥५७ (६-५७)**

महाकविमाघविरचितस्य शिशुपालवधमहाकाव्यस्य षष्ठेऽस्मिन् सर्गे हेमन्तवर्णने कयाचिन्नायिकया प्रियतमस्य समीपे स्थितिरपि न कृता। सैवाङ्गना मार्गमास-कारणात् सकम्पा सहास्या सहसैव प्रियतमालिंगनमयच्छत्, तथा च सा तत्र शैथिल्यमपि नैच्छत्।

अत्र श्लोके नायिकाव्यवहारो विलोक्यते तदा सा कीदृशी नायिकेति वाचकानां जिज्ञासाविषय: स्यात्। कारणं माघेनात्र वर्णनच्छद्मना नायिकाभेदा एव

वर्णिता:। तस्मादिदं वक्तुं पार्यते यत् कविरयं शास्त्रीयं ज्ञानं प्रदर्शयितुं कृत्रिमतयाऽपि प्रसङ्गोद्भावनां करोति, तच्च काव्यस्य नैसर्गिकं सौन्दर्यमवरुणद्धि।

नायिकानां प्रणयक्रीडासु रतिचेष्टां विलोक्य साहित्यशास्त्रविवेचकै: नायिकानां प्रकारा: वर्णिता:। तत्र प्रमुखतया नायिका: त्रिधा भवन्ति।[७] यथा (१)स्वीया (२)परकीया (३)साधारणा च। अपरञ्च नायिकाभेदप्रभेदविलोकनं क्रियते, तर्हि तत्र-स्वाधीनभर्तृका-खण्डिता-अभिसारिका-कलहन्तरिता-विप्रलब्धा-प्रोषितभर्तृका-वासकसज्जा-विरहोत्कण्ठिता श्चेत्यष्टविधास्तासामवस्थाभि:।[८]

यदा वल्लभदेवमल्लिनाथयो:टीके पठ्येते तदा तत्र नायिकाभेदविषये वल्लभदेवस्य मौनम्, परं मल्लिनाथेनात्र श्लोकविवेचने कलहान्तरिता नायिकेत्युल्लेख: कृत:। न केवलं नायिकानामोल्लेख एव परं लक्षणमपि लिखितम्।[९] याऽऽदौ क्रोधं कृत्वा प्रियतमं त्यजति, ततश्च संतप्ता भूत्वा पुनर्मिलति सा कलहान्तरिता नायिका कथ्यते।[१०] एवमत्र वल्लभदेवेन नायिकाविषये स्पष्टता कृता।

अनेन विवेचनेन वाचकानां माघकाव्यस्य रसास्वादोऽपि स्यात्, तेन सह साहित्यशास्त्रस्य ज्ञानमपि स्यात्। लक्षणोल्लेखत्वाल्लक्षणज्ञानमपि वाचकानां भवितुमर्हति।

---

७ अथ नायिका त्रिभेदा स्वान्या साधारणा स्त्रीति।
नायकसामान्यगुणैर्भवति यथा सम्भवैर्युक्ता॥
साहित्यदर्पण: (३-५६); पृ. १५५

८ अवस्थाभिर्भवन्त्यष्टावेताः षोडशभेदिताः।
स्वाधीनभर्तृका तद्वत्खण्डिताऽथाभिसारिका।।
कलहान्तरिता विप्रलब्धा प्रोषितभर्तृका।
अन्या वासकसज्जा स्याद्विरहोत्कण्ठिता तथा।।
**शिशुपालवधम्** (३-७२/७३); पृ. १६८

९ कोपात्कान्तं पराणुद्य पश्चात्तापसमन्विता।। - इति मल्लिनाथः।।
शिशुपालवधम् (६-५७); निर्णयसागरप्रेसः पृ. १५७.

१० चाटुकारमपि प्राणनाथं रोषादपास्य या।
पश्चात्तापमवाप्नोति कलहान्तरिता तु सा।।
साहित्यदर्पण: (३-८२); पृ. १७१

माघकविना यथा शिशुपालवधस्य रचनया विद्वज्जनवध: कृत:। अर्थात् तेन काव्यरचनाच्छलेन शास्त्रचर्चाऽपि कृता। तथैव मल्लिनाथेनापि शिशुपालवधस्य टीकायां विवेचनकर्मणा विद्वन्मदो दूरीकृत:।

**उपचितेषु परेष्वसमर्थतां व्रजति कालवशाद्बलवानपि।**
**तपसि मन्दगभस्तिरभीषुमान्न हि महाहिमहानिकरोऽभवत्॥(६-६३)**
**स्मररागमयीवपुस्तमिस्रा परितस्ताररवेरसत्यवश्यम्।**
**प्रियमाप दिवापि कोकिले स्त्री परितस्ताररवेरसत्यवश्यम्॥(६-७०)**

षष्ठसर्गस्यानयो: श्लोकयो: प्रथमश्लोके शिशिरवर्णनं द्वितीयश्लोके चात्र वसन्तवर्णनं माघकविना कृतम्।

पूर्वश्लोकयो: "अभीषुमामन्" तथा च "रवि" शब्दद्वारा सूर्यस्य सूचनमस्ति। वल्लभदेवेन अभीषुमान् इत्यस्य अंशुमालीश्रीसूर्य: तथा रवे: श्रीसूर्यस्य इति पर्यायलेखनं कृतम्। मल्लिनाथेन अभीषुमान् इत्यस्य अंशुमान् सरलत्वाच्च रवे: पर्यायोऽपि न लिखित:।

अत्र सूर्यस्य स्थाने द्वयोरपि श्लोकयोर्विवेचने वल्लभदेवेन श्रीसूर्य: इति विलिख्य श्रीयुतमानार्हपदेन विशेषादर: सूचित:। माघकविना प्रकृतिवर्णने सामान्यरूपेण सूर्यस्योल्लेख: कृत:, परं वल्लभदेव: श्रीपदेन सूर्यं प्रत्यादरं दर्शितवान्।

अनयो: श्लोकयो: इदं ज्ञातुं शक्यते यथा मङ्गलाचरणे विशेषादरस्तस्य वर्तते तत्र न शङ्कास्थानं क्वचित्।

# सर्गः–७

## पुष्पावचयः

महाकविमाधविरचितशिशुपालवधमहाकाव्यस्य सप्तमे सर्गे रैवतकपर्वर्‌ते प्रकृतिमनुभवतां यादवानां विलासवर्णनं कविना कृतम्। अत्र प्रकृतिमाश्रित्य नरनारीसंयोगशृङ्‌गारवर्णन कवे- र्वर्णनविषयो वर्तते।

अस्मिन् सर्गे वल्लभदेवमलिनाथयो: टीकाविचारो विधीयते। वल्लभदेवस्य भाषा सरला मधुरा च वर्तते। प्राथमिकपाठकानां कृते केषाञ्चित् शब्दानां लिङ्‌गवचननिर्देशोऽपि कृतः। क्वचिदलङ्‌कारचर्चाऽपि क्रियते। ध्वन्यर्थविषये प्राय: मौनं स्वीकृत्यैव स्थित:। तेन नूतनशब्दानां कोशप्रमाणमपि यथावसरं दीयते। उद्गारादिसूचका येऽव्ययशब्दाः सन्ति तेषामपि विवेचनं क्रियते।

मल्लिनाथस्य विवेचनं विशेषतः पाण्डित्यपूर्णं दृश्यते। अलङ्‌कारचर्चा प्रायः सर्वत्र क्रियते। तत्र च लक्षणलेखनमस्य वैशिष्ट्यम्। व्याकरणसूत्रोल्लेखोऽपि क्रियते एव। ध्वन्यर्थविषयेऽस्य चातुरी नितान्तं प्रशस्या। नायिकायाः नायकस्य च प्रणयव्यवहाराभ्यासं कृत्वा तल्लक्षणलेखने सिद्धहस्तोऽयं टीकाकार:। अत्र वल्लभदेवेन वृत्तपरिचयो न दत्त: परं मल्लिनाथेन वृतपरिचय: सलक्षणं दत्त:। क्वचित् तु मल्लिनाथेन श्लोकस्थ शब्दार्थद्वयमाश्रित्य नितान्तं विपरीतोऽर्थ: प्रदर्शितः।

अस्मिन् सर्गे नायकनायिकाभेदप्रभेदकथनं 'मल्लिनाथस्य वैशिष्ट्यम्। क्वचित् तेन रसचर्चाऽपि विधीयते। अन्यदन्यसर्गवद् वल्लभदेवमल्लिनाथयोः विवेचनं प्राय: समानमेव वर्तते।

**दधति सुमनसो वनानि बह्वीर्युवतियुता यदवः प्रयातुमीषुः।**
**मनसिशयमहास्त्रमन्यथामी न कुसुमपञ्चकमप्यलं विसोढुम् ।।(७-२)**

महाकविमाधविरचिते शिशुपालवधस्य सप्तमेऽस्मिन् सर्गे भगवतः श्रीकृष्णस्य रैवतकपरिभ्रमणवर्णनं वर्तते। यथा यादवै: सपुष्पवनानि गन्तुं युवतिभि: सह वाञ्छा विहिता। ता विना ते (यादवाः) कामदेवस्य महास्त्ररूपपञ्चपुष्पाण्यपि सोढुं समर्था नाभवन्।

अत्र वल्लभदेवमल्लिनाथयोर्विवेचने किञ्चिद् विचारणीयमस्ति। तदिदं यथा- वल्लभदेवस्य टीकायां विवेचने सारल्यं प्रशंसनीयं कारणं तेन शब्दानां

लिङ्गवचनोल्लेखोऽपि क्रियते।[१] तेन ये प्रौढपाठकाः सन्ति तेषां तु न कश्चिद्विशेषो लाभो दृश्यते, परं ये प्राथमिका: पाठका: सन्ति तेषां कृते विवेचनमिदं ज्ञानप्रदं भविष्यति। अन्यशब्दानामपि विवेचने लेखनं कृतं तदपि काव्यमयं दर्शितम्, तस्मात् पाठकानां रुचिकरमपि भवितुमर्हति।

अन्यच्चैतस्यार्थो नायं यद् वल्लभदेवस्य विवेचनं प्रौढानां पाठकानां कृते तथोपकारकं नास्ति, तेषामपि तथैवोपकारकं वर्तते। वल्लभदेवः क्वचित् सरलं विवेचनं करोति, क्वचिच्च विद्वन्जनरञ्जकं विवेचनं विदधाति। तस्मादेतस्यायं गुण: प्रशस्य:।

अन्यच्च मल्लिनाथस्य लेखने काठिन्यं तु भवत्येव, परं क्वचिल्लेखने व्यवस्थापि दृश्यते तेन कृत्रिमं काठिन्यमपि दृश्यते। वल्लभदेवेन यस्य शब्दस्य समाधानं भवति तत्तत्रैव लिख्यते तेन विवेचनं सरलं सहजं च भवति।

मल्लिनाथस्य विवेचने सर्वत्र समस्यासमाधानक्रम: सुरक्षितो नास्ति।[२] सामान्यरूपेण प्रथमं समस्या भवति ततश्च तस्य समाधानमिति क्रमो भवति। न तथा मल्लिनाथस्यास्मिन् विवेचने दृश्यते। अतः रसभङ्गोऽपि पाठकानां भवत्येव। अस्मिन्नेव पद्ये तद्विषयकं किञ्चिद् विचार्यते तदा प्रथमं कुसुमपञ्चकपदस्य विवेचनं कृतम् ततः काव्यलिङ्गालङ्कारस्य विवेचनं कृतं ततश्च पुन: कामदेवस्य पञ्चबाणानामुल्लेख: कृत:। यस्यावश्यकता कसुमपञ्चकस्य पश्चादेवासीत्। तत्रैव पाठकस्य जिज्ञासा भवति, स कोशस्य विषय:, ततोऽलङ्कारशास्त्रं ततश्च पुन: कोश: इति क्रमोऽयं कुटिल: प्रतिभाति।

---

१ सुमनस् शब्द: स्त्रीलिङ्गो बहुवचनान्त:। उक्तं च -
आपः सुमनसो वर्षा अप्सर: सिकता: समा:।
एते स्त्रियां बहुत्वे स्युरेकत्वेऽप्युत्तरत्रयम्।। - इति वल्लभदेवः ।।
शिशुपालवधम् (७-२); चौखम्भा, पृ. २४७.

२ सकलसुमनसां सामर्थ्ये तत्रारविन्दादीनामेव पञ्चबाणबाणत्वस्य सम्भवप्रमाणसिद्धत्वादिति भावः।
अतो युवतिभिः सह प्रयाणं युक्तमिति वाक्यार्थेन वाक्यार्थ
समर्थनाद्वाक्यार्थसमर्थनरूपकाव्यलिङ्गमलङ्कारः।
अरविन्दमशोकं च चूतं च नवमल्लिका।
नीलोत्पलं च पञ्चैते पञ्च बाणस्य सायका:।। इति मल्लिनाथः।।
शिशुपालवधम् (७--२); निर्णयसागरप्रेस, पृ. १६५

अनेनेदं तात्पर्यं वल्लभदेवस्य विवेचनं पाठकानां कृते विशेषं सरलं भवति तथा चार्थग्रहणे साधकं भवति । तथैव मल्लिनाथस्य विवेचनं क्वचित् कठिनं कृत्रिमं वा जायते।

**"स्वाधीनपतिका"**

**इति वदति सखीजनेऽनुरागाद्दयितमामपरश्चिरं प्रतीक्ष्य।**
**तदनुगमवशादनायतानि न्यधित मिमान इवाऽवर्निं पदानि।।(७–१३)**

**"कलहान्तरिता"**

**यदि मयि लधिमानमागतायां तव धृतिरस्ति गताऽस्मि सम्प्रतीयम्।**
**अनिभृतपदपातमापपात प्रियमिति कोपपदेन कापि सख्या:।।(७-१४)**

शिशुपालवधमहाकाव्यस्य सप्तमे सर्गे रैवतकपर्वते स्थितानां यादवानां रैवतकपरिभ्रमणं प्रणयचेष्टाश्च कविना वर्णिता:। अत्रैका सखी द्वितीयां प्रति वदति। यथा यदा सखीजनेनेत्थं भणितं तदाऽनुरागवशात् स्वीयपरमप्रीतिभाजनस्य प्रतीक्षां कृत्वा तदनुसरणक्रियानुकूलतां प्राप्य पृथ्वीं मीयत इव स्वल्पपदानि कृतवान्।

"यद्यहं लघुत्वं प्राप्नोमीति ते सन्तोषस्तदैषा गच्छामि" एवं सखीजनेन सह कोपव्यापारेण काचिन्नायिका तु शीघ्रं गत्वा प्रियं प्राप्नोत्।

पूर्वलिखितश्लोकयोश्चिन्तनं कृत्वा यदि नायिकाव्यवहारो विलोक्यते तर्हि ज्ञानं भवति यत् प्रथमश्लोके नायिका पतिं त्यजति गमनादिसर्वकार्येषु तस्योपस्थितिं वाञ्छति। एतदेव चिन्तयित्वा मल्लिनाथेन नायिकाभेदोल्लेख: कृत:।[३] अत्र स्मरणीयं षष्ठे सर्गेऽपि तस्येत्थं चिन्तनं सुन्दरमासीत्।

द्वितीयपद्ये नायिकाया व्यवहारे विलोक्यते यत् नायिका प्रथमं रुष्टा, ततश्च पश्चात्तापमनुभूय प्रियतमसङ्गमकरोत्। एतस्मात्कारणादियं कलहान्तरिता

[३] एषा च नायिका स्वाधीनपतिका। 'स्वाधीनपतिका सा तु या न मुञ्चति वल्लभम्' इति लक्षणात्।।इति मल्लिनाथः।।
शिशुपालवधम् (७–१३); निर्णयसागरप्रेस; पृ. १६९.

नायिका धनञ्जयेन कथिता।[४] कोपेन प्रियतमं त्यक्त्वा पश्चात् दु:खमनुभूय या पुनः पतिसङ्गं विदधाति सा कलहान्तरिता कथ्यते।[५]

दशरूपकादिग्रन्थेषु नायिकायाः प्रणयचेष्टावलोकनं कृत्वा तत्प्रकारा लिखितास्सन्ति। वल्लभदेवेन नायिकाभेदविषयस्य चर्चा न क्रियते। मल्लिनाथेन पद्यार्थानां सूक्ष्मावलोकनं कृत्वा तासां व्यवहारदर्शनं कृत्वा च नायिकाभेदा लिखिताः सन्ति। अनेन वल्लभदेवापेक्षया मल्लिनाथस्थालङ्कारशास्त्रचिन्तनं विशेषमिति वक्तुं शक्यते।

माघकवेरप्यत्रालङ्काराशास्त्रज्ञानदर्शनमेवाभियुक्तं स्यादित्यपि चिन्त्यम्।

अनेन प्रकारेणात्र मल्लिनाथस्य नायिकाभेदप्रभेदचिन्तनं प्रशस्यमिति भावः।

**अनुवनमसितभ्रुव: सखीभि: सह पदवीमपरः पुरोगतायाः।**
**उरसि सरसरागपादलेखाप्रतिमतयाऽनुययावसंशयान:॥(७-२२)**

सप्तमसर्गे महाकविना माघेन रैवतकपर्वतस्थितानां यादवानां प्रणयक्रीडावर्णन कुर्वता पद्यमिदं लिख्यते। अस्मिन् तादृशमेव वर्णनं वर्तते।

यथा - कस्यचिन्नायकस्य प्रिया स्वसखीभिः सह वनं गता। तस्याः असितभ्रुवः प्रियायाः पादरेखाविन्यासं च वक्षसि सरसपदचिह्नं विलोक्य नि:शङ्कभावेन स प्रियः स्वप्रियतमामनुययौ।

अयं पूर्वदर्शितोऽर्थस्तु वल्भदेवेन मल्लिनाथेन च दर्शित:। ततो मल्लिनाथेन ध्वन्यर्थोऽपि प्रकाशित:।

मल्लिनाथमतेन माघकविनात्र यद्वर्णनं कृतम्, तत्र वने यदा सा गतवती तदा तस्याः पदयोर्य आद्र्ररस आसीत्, तस्य चिह्नानि पथि अवर्न्तन्त, तादृशान्येव पदचिह्नानि तस्य वक्षस्यप्यासन्, तस्मात् प्रियतमेन ज्ञातं यत् तस्य प्रियतमा कुत्र गतवती स्यादिति। अत्रायं प्रश्नः, प्रियस्य वक्षसि पदचिह्नं कुतः आगतम्। तद्विचार्यते तर्हि नायिकया सुरतव्यापारलीलाविधौ प्रियतमः पदेन ताडितः स्यात्।

---

४ कलहान्तरिताऽमर्षाद्विधूतेऽनुशयार्तियुक्।
दशरूपकम् (२); डॉ. राजू (राजेश्वर) शास्त्री, प्रका० चौखम्बा संस्कृतभवन; वाराणसी: सं. २०५७, पृ. १९२.

५ एषा च स्वयं प्रवृत्ता स्वलाघवशङ्कितया पूर्वं निर्वासितप्रिया। अथेदानीं स्वयं प्रवृत्तेः पश्चात्तप्ता चेति गम्यते। कोपात्कान्तं पराणुद्य पश्चात्तापसमन्विता इति लक्षणात्॥ इति मल्लिनाथः ॥ शिशुपालवधम् (७-१४); निर्णयसागरप्रे; पृ. १६९

यथा प्रकृतिस्थित्या तत्स्थानस्थितानां जनानां यौवनं कीदृशं रतिक्रीडा च कीदृशीति ज्ञायते तथैव माधकवेरपि पद्येऽस्मिन् सुरतव्यापार एवाभिमत: स्यात् ।

मल्लिनाथेनश्लोकार्थे विशेषत: सुरतक्रीडासमये पादताडनव्यापारो दर्शित:। तात्पर्यमत्र 'नायको नायिकामनुययौ' इति भावो नास्ति।

**मदनरसमहौघपूर्णनाभीह्रदपरिवाहितरोमराजयस्ता:।**

**सरित इव सविभ्रमप्रयातप्रणदितहंसकभूपणा विरेजु:।।(7-23)**

महाकविमाघविरचितस्य शिशुपालवधस्य सप्तमसर्गस्य लोकऽस्मिन् रैवतक स्थितानां नारीणां वर्णन वर्तते।

यथा - नार्यो नद्य इव शुशुभिरे। अत्र श्लेषप्रणितोपमया नारीणां नदीभि: सह तुलना कृता। श्लोकेऽस्मिन् सर्वाण्यपि विशेषणानि श्लिष्टानि सन्ति। अत: सर्वेषामपि पदार्थानामर्थद्वयं दर्शनीयं भवति।

वल्लभदेवेन मल्लिनाथेन चात्रार्थद्वयं सम्यग् दर्शितम्। अत्र द्वयोरपि टीकयोरभ्यास: क्रियते, तर्हि 'मदनरस' इत्यत्र 'रस'स्यार्थः वल्लभदेवेन 'राग' इति सूचितः परं द्वितीयार्थो न दर्शित:। परं मल्लिनाथेमात्र रसस्यार्थ: "जलम्" "शृङ्गार:" इत्यर्थद्वयं लिखितम्। ततश्च "हंसक" नारीपक्षे हंसकनामकम् "आभूपणम्", नदीपक्षे च हंस एव हंसकः तथा अर्थो दर्शितः।[६]

एवं रसविवेचनं मल्लिनाथस्य समीचीनं वर्तते, तथा च हंसकविवेचनं वल्लभदेवस्य योग्यं वर्तते। अस्य श्लोकस्यार्थो यदि पूर्णतया ज्ञातव्यो भवति तर्हि द्वयोरपि टीकाकारयोर्विवेचने पठनीये भवतः।

तात्पर्यमत्र वल्लभदेवमल्लिनाथयोः टीकाद्वयं परस्परपूरकमिति प्रतिभाति।

माघकविस्तत्रस्था युवतयः रतिक्रीड़ायां कीदृश्यो निर्लज्जा आसन् तत् प्रादर्शयत्। सामान्यरूपेण लज्जा स्त्रीणां भूषणं कथ्यते, परं रतिसमये निर्लज्जा स्त्री एव प्रशंसनीया भवति।[७] मल्लिनाथस्य सूक्ष्मदृष्ट्या वनगमनव्यापारेण

---

६ हंसकः पादकटक:।।इति मल्लिनाथः॥ शिशुपालवधम् (७–२३); पृ. १७२.

७ अन्यदा भूषणं पुंस: क्षमा लज्जेव योषितः।
पराक्रम: परिभवे वैयात्यं सुरतेष्विव॥२-४४॥
शिशुपालवधम् (२-४४); निर्णयसागरप्रेस; पृ. ४३.
इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधै: कथित: ॥
काव्यप्रकाशः (१-४); पृ. १३

वनितागमनव्यापारस्यावलोकनं कृतम्।पद्यमिदं वल्लभदेवस्य टीकया विलोक्यते तर्हि वस्तुवर्णनत्वात् सामान्यं कथ्यते। परं मल्लिनाथेनात्र ध्वनिचिन्तनं कृत्वार्थ: प्रकाशितस्तस्मात् तस्य विवेचने वैशिष्टयं दृश्यते। कारणं ध्वनिकाव्यमलङ्कारविद्भिरुत्तमं कथ्यते।

कालिदासेनापि मेघदूतेऽनेनैव प्रकारेण स्वीयवर्णनेषु प्रकृतिवर्णने तत्स्थानस्थितानां जनानां यौवनं वर्ण्यते।[८] तात्पर्यमत्र मल्लिनाथोद्घाटितध्वन्यर्थ: प्रशस्य:। पाठकानां दृष्टिस्तु ध्वन्यार्थान्वेषणमेव करोति, तस्मादिदं विवेचनं विशेषमुचितम्।

**अनवरतरसेन रागभाजा कराजपरिक्षतिलब्धसंस्तवेन।**
**सपदि तरुणपल्लवेन वध्वा विगतदयं खलु खण्डितेन मम्ले।।(७-३९)**

महाकविमाधविरचितशिशुपालवधमहाकाव्यस्य सप्तमे सर्गे रैवतकपर्वतमाश्रित्य स्थितानां जनानां प्रणयवर्णनं प्रकृतिवर्णनव्याजेन समायाति। तस्मादुद्घृतोऽयं श्लोको वर्तते। अथास्यार्थविचारः क्रियते।

नूतनं किसलयं सपदि म्लानं जातम्। तत्र कारणमङ्गनया निर्दयं खण्डितम्। तत्कीदृशमासीदिति यथा- तन्नितान्तं रसान्वितमासीत्। रक्तवर्णयुतं चासीत्। तेन नखव्रणस्य परिचयः प्राप्त आसीत्।

अत्र वल्लभदेवस्य टीकायामेतादृशं विवेचनं पठ्यते। कस्यचित् तरुणस्य व्यवहारो गम्यते। यथा - तरुणतुल्य: प्रियतमः प्रियतमायाः निर्दयव्यवहारेण म्लानीभूत:। स कीदृश आसीत् तर्हि नितान्तं स्नेहपरायण आसीत्, सोऽपि प्राप्तनखव्रणपरिचयोऽवर्तत।

एतस्यैवाधारं गृहीत्वा मल्लिनाथेनायमर्थो सविशेषमलङ्कृतः। मल्लिनाथस्य किसलयं प्रति विवेचनं वल्लभदेवानुसारमेवास्ति। परं नायकविवेचने स्वल्पं परिवर्तनं दृश्यते मल्लिनाथेन तरुणपल्लवेनेत्यस्यार्थ: युवविटेन कृत:।[९] तत्र तेन विश्वकोशस्य प्रमाणं दत्वा दृढीकरणं कृतम् एतस्मात्समस्तान्यपि विशेषणानि

---

[८] नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतोस्त्वत्सम्पर्कात्पुलकितमिव प्रौढपुष्पै: कदम्बै:, यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणामुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि।। मेघदूतम् (पूर्वमेघ-२५)

[९] 'पल्लव: किसलये विटे' इति विश्व:।।इति मल्लनाथः।।
शिशुपालवधम् (७-३१); निर्णयसागरप्रेस; पृ. १७४:

तु श्लिष्टान्यासन्नेव विशेषणमपि श्लिष्टं जातम्। एतस्माच्चात्रालङ्कारिकदृष्टया पद्येनानेन विशेषं महत्त्वमधिगतम्।

वल्लभदेवेनार्थद्वयमेव दर्शितम्, परं तस्य चर्चा न कृता, यद्यपि तत्र स्पष्टता करणीयाऽऽस्त इत्यनुभूयते। तत्र त्रीणि कारणानि-प्रथमं समासोक्ति: द्वितीयं श्लेष:, तृतीयं ध्वनि:।

यत्र विशेषणानि श्लिष्टानि भवन्ति तत्र समासोक्त्यार्थद्वयं प्राप्यते; परमत्र मल्लिनाथेन पल्लवशब्दस्य विटार्थो दर्शितः। तस्मादत्र न समासोक्तिरर्थद्वयस्य हेतुः।[१०] श्लेषालङ्कारेणाप्यर्थद्वयस्य प्राप्तिर्भवति परं तत्र प्रकरणादत्र द्वितीयोऽर्थोऽपेक्षितो भवति।[११] परमत्र विटस्यार्थ: प्रकरणान्नायाति तस्मादत्र न श्लेषः। परमत्राभिधाशक्तिद्वारा प्रकृतार्थस्य नियन्त्रणं कृतश्चाप्रकृतार्थस्य प्रतीतिर्भवति। तस्मादत्र शब्दशक्तिमूलो ध्वनि:।[१२]

मल्लिनाथेनानया चर्चयाऽत्रार्थद्वयस्य कारणं स्पष्टं कृत्वा पाठकानां सा कारणज्ञानसमस्या दूरीकृता। अत्रेदमपि स्मरणीयं यदेतस्यार्थस्य प्रतीतिस्तु वल्लभदेवविवेचनादेव तस्य समुद्भूता स्यादिति। वल्लभदेवविवेचनमेव मल्लिनाथस्य प्रेरणास्थानं स्यादिति प्रतीयते।

**मध्या**

**अवनतवदनेन्दुरिच्छतीव व्यवधिमधीरतया यदस्थिताऽस्मै।**
**अहरत सुतरामतोऽस्य चेतः स्फुटमभिभूषयति स्त्रियस्त्रपैव।।(७–३८)**

**प्रौढा**

---

[१०] समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः।
व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः।।
साहित्यदर्पणः (१०-५६); पृ. ७७७.

[११] शब्दै: स्वभावादेकार्थै: श्लेषोऽनेकार्थवाचनम्॥
साहित्यदर्पणः (१०-५७); पृ. ७८८.

[१२] शब्दार्थोभयशक्त्युत्थे व्यङ्ग्येऽनुस्वानसन्निभे।
ध्वनिर्लक्ष्यक्रमव्यङ्ग्यस्त्रिविध: कथितो बुधैः।।
साहित्यदर्पण: (४–६); पृ. २८८.
अत्राभिधायाः प्रकृतार्थे नियन्त्रितत्वादप्रकृतार्थप्रतीतेः शब्दशक्तिमूलो ध्वनि:, न श्लेष: इति॥मल्लिनाथ:॥ शिशुपालवधम् (५-३१); निर्णयसागरप्रेस; पृ. १७४.

कृतकृतकरुषा सखीमपास्य त्वमकुशलेति कयाचिदात्मनैव।
अभिमतमभि साभिलाषमाविष्कृतभुजमूलमबन्धि मूर्ध्निमाला।।(७-४०)

**मुग्धा**

मुखकमलकमुन्नमय्य यूना यदभिनवोढधूर्बलादचुम्बि।
तदपि न किल बालपल्लवाग्रग्रहपरया विविदे विदग्धसख्या।। ५-४४।।

**हर्षौत्सुक्यवती प्रौढा**

विकसितमनुकुर्वती पुरस्ताद्धरणिरुहाधिरुहो वधूर्लतायाः।
रमणमृजुतया पुरः सखीनामकलितचापलदोषमालिलिङ्ग॥७–४६।।

**प्रौढा**

सललितमवलम्ब्य पाणिनांसे सहचरमुच्छ्रितगुच्छवाञ्छयाऽन्या।
सकलकलभकुम्भविभ्रमाभ्यामुरसि रसादवतस्तरे स्तनाभ्याम्॥७-४७॥

**स्वाधीनपतिका प्रौढा**

उपरिजतरुजानि याचमानां कुशलतया परिरम्भलोलुपोऽन्यः।
प्रथितपृथुपयोधरं गृहाण स्वयमिति मुग्धवधूमुदास दोर्भ्याम्।।७-४९।।

**स्वाधीनपतिका प्रौढा**

इदमिदमिति भूरुहां प्रसूनैर्मुहुरभिलोभयता पुरः पुरोऽन्या।
अनुरहसमनायि नायकेन त्वरयति रन्तुमहो जनं मनोभूः।।७-५०।।

**प्रगल्भा**

विजनमिति बलादमुं गृहीत्वा क्षणमथ वीक्ष्य विपक्षमन्तिकेऽन्या।
अतिपतितुमना लघुत्वभीतेरभवदमुञ्चति वल्लभेऽतिगुर्वी॥७-५१॥

**खण्डिता**

अधिरजनि जगाम धाम तस्याः प्रियतमयेति रुषा स्रजाऽवनद्धः।
पदमपि चलितं युवा न सेहे किमिव न शक्तिहरं ससाध्वसानाम्॥७–५२।।

महाकविमाघविरचितस्य शिशुपालवधमहाकाव्यस्य सप्तमे सर्गे स्त्रीपुरुषाणां प्रणयव्यवहाराः निरूपिताः सन्ति। दशरूपकादिप्रमुखसाहित्यशास्त्रग्रन्थेषु तद्व्यवहारान् विलोक्याभ्यासञ्च कृत्वा

नायकनायिकाभेदप्रभेदाः निरूपिताः सन्ति। पूर्वलिखितपद्येषु तदेव विलोकनीयं वर्तते। तत्पूर्वमेतेषां पद्यानामर्थचिन्तनं करणीयं भविष्यति।

यथा-(अत्र श्लोकलेखनक्रमानुसारमेव भावार्थलेखनं ग्राह्यम्) काचिन्नायिका प्रियतमाद् व्यवधानमिच्छन्तीवाधीरतया मुखचन्द्रं नम्रीकृत्य स्थिता तस्माच्च तस्याश्चेतोऽपहृतम्। सत्यं लज्जयैव नार्योऽधिकशोभान्विता जायन्ते।

काचिन्नायिका कृतकक्रोधेन त्वमकुशलेति कथयित्वा सखीं दूरीकृत्य प्रियसम्मुखे साभिलाषं बाहुमूलदर्शनं यथास्यात्तथा मालां बध्नाति।

अपरञ्च केनचिन्नायकेन नूतनविवाहितां वधूं गृहीत्वा तस्याश्चन्द्रमुखं चुम्बितम्। तच्च नूतनजातकिसलयग्रहणलग्नाभिरन्याभि र्न ज्ञातम्।

कयाचिन्नायिकयाऽऽलिजनसमक्षं वक्षलतालिङ्गनाभिनयं कृत्वा निर्व्याजेन धृष्टताज्ञानञ्च न भवेत् तथा प्रियतमस्यालिङ्गनं कृतम्।

अन्या काचिन्नायिकोर्ध्वपुष्पगुच्छमिच्छन्ती प्रियतमं साधारं गृहीतवती। गजकुम्भभ्रमोत्पादनचतुरस्तनाभ्यामनुरागाद् आलिङ्गनं कृतवती।

केनचिन्नायकेन या नायिकोर्ध्वपुष्पमिच्छन्ती वर्तते, तां प्रति 'त्वमेवागत्य गृहाणेति' उक्त्वा बाहुभ्यामूर्ध्वीकृता।

कश्चिन्नायक: कामपि नायिकामिदं पुष्पं गृहाण 'इदं गृहाणेति' वदन् दूरं रह:स्थलं नीतवान्। अहो ! कामदेव: जनं परिभोगाय त्वरयति।

काचिन्नायिका स्वप्रियतमं रहसि नीतवती, तत्र च विपक्षं विलोक्य भीताऽभवत्। परं नायकेन पुनर्गन्तुमिच्छन्ती सा बाहुयुगलेन धृता, तस्मात् सा धन्यतामन्वभवत्।

कयाचिन्नायिकया 'त्वमर्धनिशायां तस्या धाम गच्छसीति' उक्त्वा पुष्पमालया बद्ध: स नैकं पदमपि गन्तुं समर्थो जात:। सलज्जानां कृते किं वस्तु शक्तिहरं न स्यात्, अर्थात् सर्वमेव शक्तिहरं स्यादेवेति भावः।

एतेषां श्लोकानां यद्यभ्यासो विधीयते तदा सर्वेषु लोकेषु नायकनायिका भावानामेव वर्णनं कविना कृतम्। यद्यपि सर्वे नायका: पुरुषा:, सर्वाश्च नायिका नार्यस्तथापि सर्वेषामपि नायकानां सर्वासामपि नायिकानाञ्च भिन्नभिन्न भावाः कविना वर्णिताः। तत्र कारणं सर्वेषामपि जनानां प्रकृतयो भिन्ना भवन्ति। एतान् सर्वान् विशिष्टान् भावान् विलोक्यालङ्कारशास्त्र- विद्भिर्नायकनायिकानां भेदप्रभेदविवेचनं कृतम्।

माघकवेरपि सर्गेऽस्मिन् प्रायः नायकनायिकानाप्रकारोल्लेखोऽभिमतो वर्तेत, तस्मादेव तेन तथाविधा: प्रणयचेष्टाः वर्णिताः।

एतेषां श्लोकानां विवेचने वल्लभदेवेन नायिकाया: नायकस्य वा प्रकारोल्लेखो न क्वचिदपि कृतः। यद्यपि तदुल्लेखस्तु विवेचनस्य हृदयं वर्तते। परमत्र मल्लिनाथेन यथापद्यं क्वचिन्नायिकाभेदो लिखितः क्वचिन्नायकभेदो लिखितः, क्वचिच्च नायकनायिकयोरपि भेदो लिखितो दृश्यते।

मल्लिनाथेन मध्याप्रौढामुग्धाऽतिप्रगल्भानां नायिकानां लक्षणानि दर्शितानि। दक्षिणादिनायकानामपि भेदा दर्शिता:।

तत्र 'अनवरत...' श्लोके मध्यानायिकायाः वर्णनं कृतम्।[१३] कृतकृतकरुषा... इति पद्ये प्रौढानायिकायाः वर्णनं वर्तते।[१४] मुखकमल....इति पद्ये मुग्धानायिकायाः वर्णन वर्तते।[१५] ततश्च 'विकसित....'इति पद्ये 'सललित....'इति पद्ये, 'उपरिजतरूजानि....'इति पद्ये, 'इदमिदमिति.....'इति पद्ये च प्रौढानायिकायाः एव भेदाः वर्णिता: ततश्च 'विजनमति....'इति पद्ये प्रगल्भानायिकायाः।[१६] 'अधिरजनि...' इति पद्ये खण्डितानायिकाया: वर्णनं कृतम्।

---

[१३] 'लज्जामन्मथमध्यस्ता मध्यमादितयौवना' इति।।इति मल्लिनाथः।। ७-३८ ।।
शिशुपालवधम् (७-३८); निर्णयसागरप्रेस; पृ. १७५.

[१४] 'स्मरमन्दीकृतव्रीडा प्रौढा सम्पूर्णयौवना' इति ।।मल्लिनाथः॥ ७–४० ।।
शिशुपालवधम् (७-४०); निर्णयसागरप्रेस; पृ. १७७.

[१५] प्रथमावतीर्णयौवनमदनविकारा रतौ वामा।
कथिता मृदुमाने समधिकलज्जावती मुग्धा॥
साहित्यदर्पणः (३-५८); पृ. १५६/१५७.
'उदयद्यौवना मुग्धा लज्जापिहितमन्मथा'॥इति महिनाथ:॥
शिशुपालवधम् (७-४४); निर्णयसागरप्प्रेसः पृ. १७८.

[१६] स्मरान्धा गाढतारुण्या समस्तरतकोविदा।
भावोन्नतादरव्रीडा प्रगल्भा क्रान्तनायका॥ ३-६०॥
साहित्यदर्पण: (-६०); पृ. १६०

'उपरञ्जितरुजानि.....'तथा च 'इदमिदमिति....' तथा च 'अधरजनि....' पद्येष्वनुकूलस्य नायकस्य वर्णनं प्रथमपद्ये,[१७] द्वितीयपद्ये च तृतीयपद्ये दक्षिण-नायकस्य वर्णनं कृतम्।[१८]

एवमत्र मल्लिनाथेन सलक्षणं नायिकाभेदानां चर्चा कृता। अनया चर्चया च पाठकानां नायकनायिकाभेदानां लक्षणज्ञानं स्यादिति महान् लाभः।

**सरजसमकरन्दनिर्भरासु प्रसवविभूतिषु वीरुधां विरक्तः।**

**ध्रुवममृतपनामवाञ्छयाऽसावधरममुं मधुपस्तवाजिहीते।।(7-42)**

माघविरचितशिशुपालवधमहाकाव्यस्य सप्तमसर्गस्य पद्येऽस्मिन् नायकद्वारा भ्रमराणां वर्णनं वतते। अस्य सामान्यार्थविचार: क्रियते।

निश्चयरूपेण परागरजोयुक्तपुष्परसपूर्णवृक्षाणां पुष्पसमृद्धिविरिक्तस्तादृशो मधुपोऽमृतपानावाञ्छया तवाधरं प्रत्यायाति।

अत्र पूर्वलखित: शृङ्गारप्रधानोऽर्थो वल्लभदेवेन लिखित:, मल्लिनाथेनापि पद्यस्यास्य वाच्यार्थ: प्रबोधित:। परमत्र शब्दशक्तिमूलकध्वन्यर्थोऽपि मल्लिनाथेन व्यज्यते इति स्पष्टीकृत:।

मल्लिनाथेनात्र ध्वन्यर्थे सरजसमकरन्दनिर्भरासु नाम स्त्रीपुष्पशुक्राधार-युक्तासु प्रसवपरम्परासु भूरुहामिति जनानां विगतरागो विरक्त:।[१९] कश्चित् मधुपो नाम मद्यपानकर्ताऽधरं नाम धराभिन्नं धरायामलभ्यं स्वर्ग एव सुलभं तादृशममृतं पातुमिच्छति, नाम तेन देवेन भवितव्यम्।[२०]

तात्पर्यं स आत्मकल्याणं कर्तुमिच्छति।

---

[१७] अनुकूल एक निरतः। एकस्यामेव नायिकायामासक्तोऽनुकूलनायक:। साहित्यदर्पण: (३-३); पृ. १४२.

[१८] एषु त्वनेकमहिलासु समरागो दक्षिण: कथित:।
**साहित्यदर्पण**: (३-३५): पृ. १४२.
दक्षिणोऽस्यां सहृदयः - योऽस्या ज्येष्ठायां हृदयेन सह व्यवहरति स दक्षिण:
**दशरूपकम्** (२–६); पृ. १६४.
दक्षिणं भयसहनसम्बन्धसहनादिभिस्तुल्यो नैकत्र दक्षिणः।।इति मल्लिनाथः।।
**शिशुपालवधम्** (७-द२); निर्णयसागरप्रेस पृ. १८०.

[१९] स्याद्रजः पुष्पमार्तवम्।

[२०] श्रेयो नि:श्रेयसममृतम्॥इति मल्लिनाथः॥
**शिशुपालवधम्** (७-४२); निर्णयसागरप्रेस; पृ. १७८.

लोकेऽस्मिन् मल्लिनाथेन स्वमत्यनुसारमेव द्वितीयोऽर्थः प्रकटितः यद्यप्यत्र मधुपशब्देन मद्यपानकर्ता कश्चित् भर्ता भार्यामुखचुम्बनाभिलाषी वर्तते। सोऽर्थस्तु प्रकरणाद् मधुपशब्दस्यार्थद्वयात् संसाधितः। यतो हि 'मधु पिबतीति मधुपः' अत्र मधुशब्दस्य 'मदिरा' 'पुष्परसः' चेत्यर्थद्वयं भवति। सोऽर्थो वल्लभदेवेनापि दर्शितः।

मल्लिनाथेनात्र तद्विपरीतोऽर्थोऽपि दर्शितः। कश्चिद् भोगी योगी भवितुं वाञ्छति तथाविधोऽर्थो मल्लिनाथेन कृतः तमर्थं दृढीकर्तुं तेन कोशप्रमाणं पुरस्कृतम्।

पूर्वश्लोकविवेचनेऽपि विलोकितं यत् यत्रैकाधिकार्था भवन्ति तत्र समासोक्ति श्लेषध्वन्यादय: कारणभूता भवन्ति। यत्र विशेषणानि श्लिष्टानि भवन्ति तत्रायमर्थः समासोक्त्याऽऽयाति, अपरञ्च यत्र सर्वाण्यपि पदानि श्लिष्टानि भवन्ति तत्र श्लेषालङ्कारेण द्वितीयार्थस्य प्राप्तिर्भवति। परं तत्र प्रकरणेनापि तस्यार्थस्य सङ्गतिर्भवति सा चानिवार्या। ध्वनिद्वारा चाकल्पितस्यार्थस्य प्रतीतिर्भवति। अत्र शब्दशक्तिमूलकध्वनिनाऽयमर्थः समायातः।

अत्रेदमपि वैशिष्ट्यमस्ति यद् यत्रान्यत्र द्वितीयोऽर्थो मल्लिनाथेन दर्शितस्तत्र वल्लभदेवस्य विवेचने एव किञ्चित् परिवर्तनं कृत्वा विशेषञ्च विलिख्य दर्शितः। अत्र योऽर्थो मल्लिनाथेन दर्शितस्तस्यार्थस्योल्लेखो वल्लभदेवेन स्वल्पोऽपि न कृतः। तदिदं वचोऽतिशयोक्तिरहितं स्याद् यदत्र मल्लिनाथ एव द्वितीयार्थस्य प्रणेता।

मल्लिनाथेन ध्वनिसम्प्रदाय: स्वीकृतः। तस्मात्तेन यत्र स्वल्पोऽप्यवकाशः प्राप्यते तत्र तं गृहीत्वा विशेषार्थविवेचनं न त्यज्यते। तात्पर्यमयमर्थो नितान्तं प्रशस्यः सामान्यानां पाठकानाञ्च दृष्टिगोचरो न भवेदिति भावः। नितान्तं नूतनोऽयमर्थः।

**अवचितकुसुमा विहाय वल्लीर्युवतिषु कोमलमाल्यमालिनीषु।**
**पदमुपदधिरे कुलान्यलीनां न परिचयो मलिनात्मनां प्रधानम्।।(७–६१)**

कविप्रवरेण माघेन शिशुपालवधस्य सप्तमसर्गे सकामानां प्रणयचेष्टावर्णनं विहितम्। प्रस्तुतपद्येऽपि किञ्चित् तादृशमेव वर्णनं वर्तते। यत्र युवतिजनवचनीयजनस्य वर्णनं वर्तते। इदानीं तस्यार्थचिन्तनं क्रियते।

चुण्टितपुष्प लताः विहाय भ्रमराः पुष्पमालायुतानां युवतीनामुपरि स्थानं प्राप्तवन्तः। येषामात्मा मलिनो भवति तस्य कृते परिचयस्य न किमपि महत्वम्।

अत्र यथा वलभदेवेनार्थो दर्शितस्तथैव मल्लिनाथेनापि स एवार्थो दर्शित: परमलङ्कारविषयचर्चायां स्वल्पं विचारणीयं वर्तते। यत्र सामान्यद्वारा विशेषस्य

वा विशेषद्वारा सामान्यस्य चिन्तनं भवति।[२१] तत्रार्थान्तरन्यासालङ्कारो भवति। अत्र भ्रमरव्यवहारविशेषेण मलिनात्मजनस्योल्लेखः कृतस्तस्मादत्रार्थान्तरन्यासालङ्कारस्तु स्वाभाविकः।

घृतबिन्दुर्यथाऽम्भसि स्पष्टं दृश्यते तथैवात्र सोऽलङ्कारस्तु सर्वेषामपि दृष्टिगोचरो वर्तते। परमत्रान्यालङ्कारसम्भावनाऽपि वर्तते, तदर्थं सूक्ष्मदृष्टिरावश्यकी भवति। मल्लिनाथस्य सूक्ष्मदृष्टि: सूचयति यदत्र श्लेषालङ्कारो वर्तते,[२२] तथैवातिशयोक्त्यलङ्कारोऽपि वर्तते एव।[२३]

अत्र 'मलिनात्मा' तत्र मलिना तनुर्यस्य स भ्रमरश्च मलिन आत्मा यस्य स: शठः, अर्थद्वयं श्लिष्टं तस्मादत्र श्लेष:। तथा चोपमानद्वारोपमेयस्य निगरणं भवति तत्रातिशयोक्त्यलङ्कारो भवति। अत्रापि अवचितकुसुमा 'वल्ली' अनेन द्वितीयान्तबहुवचनपदेनास्वादितयौवनानां युवतीनामुल्लेखो वर्तते, तस्मादत्रातिशयोक्तिः। एवमत्रार्थान्तरन्यासातिशयोक्त्योः सङ्करो वर्तते।

अत्र पद्येऽलङ्कारचर्चायां यत्स्पष्टं दृश्यते, तद्विवेचने किं वैशिष्ट्यं भवेत्, परं यदगोचरं सामान्थानां तद्दर्शने गौरवमिति भाव:। एतद्गौरवमस्मिन् पद्ये मल्लिनाथेनेवाधिगतम्। तस्यालङ्कारचर्चा विशिष्टा।

**मुहुरिति वनविभ्रमाऽभिषङ्गादतमि तदा नितरां नितम्बिनीभि:।**
**मृदुतरतनवोऽलसा: प्रकृत्या चिरमपि ता:किमुत प्रयासभाज:।।(७-६८)**

कविवरमाघविरचितशिशुपालवधमहाकाव्यस्य सप्तमसर्गस्य पद्येऽस्मिन् युवतयो यदा वनभ्रमणं कुर्वन्ति तदा ताः श्रान्ता अभवन् तथा तासां वर्णनं कविना कृतम्।

---

[२१] ज्ञेय: सोऽर्थान्तरन्यासो वस्तु प्रस्तुत्य किंचने।
तत्साधनसमर्थस्य न्यासो योऽन्यस्य वस्तुनः।।
काव्यादर्शः (२-१६९); पृ. ५६,

[२२] श्लिष्टमिष्टमनेकार्थमेकरूपान्वितं वच:।
काव्यादर्श: (२-=-२१०); पृ. ८२.

[२३] विवक्षा या विशेषस्य लोकसीमातिवर्तिनी।
असावतिशयोक्तिः स्यादलंकारोत्तमा यथा।।
काव्यादर्शः (२-२१४); पृ. ६४.

अस्य पद्यस्यार्थो विचार्यते तदानी नार्य: प्रकृत्यैव कोमलशरीरा भवन्ति, तस्मात् ताः अचिरादेव श्रान्ता भवन्ति। वनविलासे पुष्पावचयनादिक्रीडाभिस्त्रस्ता: स्युस्तदा तासां विषये किं वक्तव्यमिति भाव:।

अत्रालङ्कारविषये वल्लभदेवस्य मल्लिनाथस्य च विवेचनं चिन्तनमपेक्षते। वल्लभदेवेनात्रार्थान्तरन्यासालङ्कार: कथ्यते, तथा च मल्लिनाथेनात्रार्थापत्त्यलङ्कार: कथितः। यत्र सामान्यविशेषकार्यकारणादीनां समर्थनं भवति तत्रार्थान्तरन्यासालङ्कारो भवति। यत्र दण्डापूपिकान्यायेन वा कैमुत्यन्यायेनान्यार्थस्य प्रतीतिर्भवति सोऽर्थापत्त्यलङ्कारः कथ्यते।

प्रथमं तावद्वल्लभदेवमतचिन्तनं विधीयते। अत्र युवतयः श्रान्ता जाताः तस्य कार्यस्य समर्थनं कारणेन क्रियते कारणं तासां शरीराणि कोमलानि भवन्ति। तस्मात् कारणेन कार्यस्य समर्थनरूपोऽर्थान्तरन्यासालङ्कार आविर्भवति।[२४]

अथ मल्लिनाथमतचिन्तनं क्रियते तर्हि **दण्डापूपिकान्यायेन** कस्यचिदेकस्य कर्मणो यदि ज्ञानं भवति तदा तेन कर्मणाऽन्यस्यापि ज्ञानं भवति।[२५] तत्रार्थापत्त्यलङ्कारो भवति। अत्र नारीणां स्वाभाविकालस्यकथनेन तासां खेदस्य ज्ञानं जायते तस्मादत्रार्थापत्तिः। अत्र **कैमुत्यन्यायेन** मल्लिनाथेनास्यालङ्कारस्य स्वीकृतिः कृता।[२६]

अत्र 'किमुत' पदेनात्रार्थापत्तिरिति वक्तुं शक्यते। परमत्रार्थान्तरन्यासालङ्कारस्तु स्वाभाविको दृश्यते। तस्मादत्रार्थान्तर-

---

[२४] सामान्यविशेषभावकार्यकारणभावाभ्यां निर्दिष्टप्रकृतसमर्थनमर्थान्तरन्यासः।।इति रुय्यकः।।
अलङ्कारसर्वस्वम् (३७); पृ. १३९.
सामान्यं वा विशेषेण विशेषस्तेन वा यदि।
कार्यञ्च कारणेनेदं कार्येण च समर्थते।।
साधर्म्येणेतरेणार्थन्तरन्यासोऽष्टधा ततः॥इति विश्वनाथः।। साहित्यदर्पण: पृ. ७९९.

[२५] दण्डापूपिकयान्यार्थागमोऽर्थापत्तिरिष्यते ।।इति विश्वनाथः।। साहित्यदर्पण: पृ. ८४५

[२६] एकस्य वस्तुनो भावाद्यत्र वस्त्वन्यदापतेत्
**कौमुत्यन्यायत:** सा स्यादर्थापत्तिरलङ्क्रिया।।इति मल्लिनाथ:।
**शिशुपालवधम्** (७-६८); निर्णयसागरप्रेस, पृ. १८५.
'दण्डापूपिकयाऽर्थान्तरस्यापतनमर्थापत्तिः॥इति मल्लिनाथ:।।
शिशुपालवधम् (7-६८); निर्णयसागरसः१८५.
दण्डापूपिकान्याय:-'मूषिकेण दण्डो भक्षित' इत्यनेन तत्सहचरितमपूपभक्षणमर्थादायातं भवतीति नियतसमानन्यायादर्थान्तरमापततीत्येष न्यायो दण्डापूपिका। साहित्यदर्पणः पृ. ८४५.

न्यासालङ्कार एवोचितः। माघेऽलङ्कारविमर्शकारोऽप्यत्र समर्थकः।[२७] प्रायः अन्यत्राप्यलङ्कारविषयेऽर्थान्तरन्यासे द्वयोरपि टीकाकारयोर्मतभेदः प्रवर्तते। परं तत्रार्थान्तरन्यास-दृष्टान्तयोः चर्चा भवति। अत्रार्थान्तरन्यासार्थापत्त्यलङ्कारयोश्चर्चा वर्तते इति विशेषता।

अत्रेदमपि स्मरणीयं यदस्य श्लोकस्य विवेचनं वल्लभदेवेन निरर्थकमेव पूर्वं कृतं यद्यपि क्रमेऽयं श्लोकोऽन्तिमः वर्तते। तस्य विवेचनस्य न किमपिदृढं कारणं दृश्यते। अत्र पाठकानां मतिभ्रमो भवितुमर्हति।

***

२७ मुहुरिति......पद्ये कारणेन कार्यस्य समर्थनरूपोऽर्थान्तरन्यासः। माघेऽलङ्कारविमर्शः; पृ. २१४

## सर्गः-८

## जलविहारवर्णनम्

महाकविमाधविरचितशिशुपालवधमहाकाव्यस्याष्टमे सर्गे यादवानां स्त्रीणां जलक्रीडावर्णनं वर्तते। अस्मिन् सर्गे मुख्यरसः शृङ्गारो वर्तते। समस्ते सर्गे प्रहर्षिणीवृत्तं वर्तते।[१] अन्तिमे पद्येऽतिशायिनीवृत्तं वर्तते।[२] ह्येतत् सामान्यं वर्तते।

अथ वल्लभदेवमल्लिनाथयोर्विवेचनविषये विशेषविचारो विधीयते। मल्लिनाथेन प्रायः सर्वपद्येष्वलङ्कारचर्चा कृता। यथावसरं वृत्तपरिचयोऽपि लक्षणं विलिख्य दत्त:। वल्लभदेवस्य विवेचनं विस्तृतं सरलं स्पष्टं च भवति तस्मात्पाठकानां कृते विशेषानुकूलं भवति। मल्लिनाथस्य विवेचनं विद्वज्जनभोग्यमेव भवति। ध्वन्यर्थस्य दर्शने मल्लिनाथस्य विशेषं चातुर्यम्। अस्मिन्सर्गेऽर्थान्तरन्यासालङ्कारो विशेषतो दृश्यते तच्चालङ्कारज्ञानं मल्लिनाथटीकया ज्ञायते। अन्येषामप्यलङ्काराणां स्थायिभावसञ्चारिभावादीनामालम्बनोद्दीपनविभावादिकाव्यतत्त्वानाञ्च ज्ञानं मल्लिनाथस्य टीकया यथाऽवसरं ज्ञायते। यथाकालं द्वावपि कोशसन्दर्भं विलिख्य लेखनपुष्टिं कुरुत:। क्वचिदर्थविषयेऽपि वैविध्यं दृश्यते। समासविग्रहेऽपि क्वचिद्विरोधो दृश्यते। यत्र वल्लभदेवेनार्थद्वयस्य कारणं श्लेषः कथ्यते तत्र मल्लिनाथेन ध्वनि: स्वीकृतस्तत्र सम्प्रदाय एव कारणं दृश्यते। यद्यपि द्वयोर्दृष्टिभेदस्तथापि तत्त्वं त्वेकमेव। वल्लभदेवस्य समाजानुरूपं व्यावहारिकञ्चार्थघटनं प्रशंसनीयम्। वल्लभदेवस्य शैल्यपि सरला तस्मादधिकप्रियेति दृश्यते।

**नीरन्ध्रशिशिरां भुवं व्रजन्तीः साशङ्कं मुहुरिव कौतुकात्करैस्ताः।**
**पस्पर्श क्षणमनिलाकुलीकृतानां शाखानामतुहिनरश्मिरन्तरालैः।।(८-३)**

माघेनाष्टमसर्गेऽरण्यगतानां युवकयुवतीनां शुङ्गाररसवर्णनं कृतम्। अस्य श्लोकस्यार्थविचारः क्रियते तदा पूर्वकथनं विशेषतस्स्पष्टं भविष्यति।

तप्तकिरण: सूर्यो विरन्ध्रवृक्षच्छायाशीतलधरातले गच्छन्तीनां स्त्रीणां क्षणपर्यन्तं पवनेन कम्पमानानां शाखानां मध्ये रिक्तस्थानद्वारा स्वकरैः कौतुकात् सभयः सन् पुन: पुन: स्पर्शं कृतवान्।

---

[१] म्नौ जौगस्त्रिदशयति: प्रहर्षणीयम्।। - इति मल्लिनाथः॥
**शिशुपालवधम्** (८-१); निर्णयसागरप्रेस पृ. १८८.

[२] स सजा भजतोऽतिशायिनी भवति गौ दिगश्वैः।। - इति मल्लिनाथः।।
**शिशुपालवधम्** (८-७१); निर्णयसागरप्रेस, पृ. २१३.

अत्र सूर्यः स्वकरैः सभयं यथा भवति तथा स्त्रीणां स्पर्शसुखं प्राप्तवानिति सामान्यार्थो वल्लभदेवेन लिखितः, मल्लिनाथेनापि स एवार्थः प्रकटीकृतः।

अत्र वल्लभदेवेन विशेषार्थोऽपि दर्शितः।[३] तद्यथा - कस्याश्चिदपि नार्या: विवाहो जातश्चेत् तर्हि तस्याः पतिं विहाय कश्चिदन्य: पुरुषस्तदङ्गस्पर्श-सुखमिच्छति स: भयान्वितो भवति। तत्र कारणं स सम्बन्धो लोकविरुद्धस्तस्माल्लोकास्तं सम्बन्धं नाङ्गीकुर्वन्ति। अपरञ्च नार्या: कृते तद्वर्तनं कलङ्काय भवति। तस्मादन्यनारीस्पर्शस्तु रहस्येव भवितुमर्हति। अन्यच्च कश्चिदन्यः पुरुषः कस्यचिदन्यस्य पुरुषस्य भार्यायां स्निह्यति तदा लोकभयात् स गृहन्तर्गमनं कृत्वा न मिलति न च स्पर्शसुखमनुभवति। तर्हि कुत्र मिलतीति प्रश्नस्योत्तरकथने वल्लभदेवो लिखति।

यथात्र सप्तसप्तिः शाखामध्ये रिक्तस्थानं प्राप्य करैस्स्पर्शं करोति तथैव कश्चिदन्यः पुरुषः कस्यचिदन्यस्य भार्यायाः स्पर्शं करोति तदा गवाक्षमध्ये यद्-रिक्तं स्थानं भवति तस्मात् हस्तं प्रसार्य स्पर्शसुखमनुभवति येन पलायनावसरेऽनुकूलता भवेदिति भाव:।

समाजे समाजास्वीकृतव्यवहारा: असामाजिककर्मणि कथं भवन्ति, कथं जना: लोकनयनानि यथा न पश्येयुस्तथा प्रणयलीलाविस्तरं विदधति। एतत्सर्वं वल्लभदेवेन श्लोकस्यास्यार्थं विशेषरूपेण विलिख्य दर्शितम्। माघस्यापि मनसि कदाचिदयं भावो न स्यात्। परं त एव पण्डिता येऽकल्पितार्थमपि प्रकटीकुर्वन्ति।[४] काव्यं सामाजिकव्यवहारं शिक्षयति तदेव तस्य प्रयोजनम्। वल्लभदेवेन सामाजिकासामाजिकव्यवहाराणां सम्यक्चिन्तनं कृत्वा श्लोकानुसारं तदर्थघटनं कृत्वा पाठकेभ्यो विशेषं व्यावहारिकज्ञानं दत्तम्। अत्र चेदं स्मर्तव्यं यत् करशब्दस्यार्थः सूर्यांशवः हस्ताश्च भवत्यतः द्वितीयोऽर्थोऽनेन तस्मात् प्रकटीकृतः। ध्वन्यर्थं स्वीकृत्यापि तन्नामोल्लेखाभावः सूचयति यन्नायं वल्लभदेवो ध्वनिसम्प्रदायसमर्थक इति।

**आघ्राय श्रमजलनिन्द्यगन्धबन्धुं निःश्वासश्वसनमसङ्गमङ्गनानाम्।**
**आरण्या: सुमनस ईषिरे न भृङ्गैरौचित्यं गणयति को विशेषकामः।।(८-१०)**

---

[३] अन्योऽपि यः किल पराङ्गनाः करैः स्पृशति स गवाक्षजालैः सभयः सन् वारंवार स्पर्शं करोति इत्युक्तिः।। - इति वल्लभदेवः ।। **शिशुपालवधम्** (८-०३); सैवक्रीनगरस्यावृत्तिः; पृ. ५८.

[४] कविः करोति काव्यानि रसं जानन्ति पण्डिता:।
तरुण्या अपि लावण्यं पतिर्जानाति नो पिता।। (कस्यचित् )

कविवरेण माघेनाष्टमसर्गे प्रकृतिरतानां युवकयुवतीनां प्रणयवर्णनं कृतम्। अत्र श्लोके भ्रमराणां युवतिनि:श्वासवायुतुष्टानां भ्रमराणां वर्णनं वर्तते।

यथा - भ्रमरै: स्त्रीणामस्खलितरूपेण गच्छन्तीनाम् प्रशस्यगन्धसहचरं श्रमजन्यनि:श्वासवायुमाघ्रायारण्यकुसुमानामिच्छा त्यक्ता। महेच्छ: क औचित्यं पश्यत्यर्थान्न कोऽपीति भावः।

एतस्मिन्पद्ये भ्रमरवृत्तिवर्णनं कृत्वा कविना समाजे येऽधिककामा लुब्धा भवन्ति ते योग्यायोग्यविचारं न कुर्वन्ति। अत्र पठनावसरे पाठकानां प्रायोऽपेक्षा भवति यत् कीदृशमनौचित्यं कवेरभिमतं स्यात्। कारणं भ्रमरमाश्रित्यैतस्यौचित्यानौचित्यविचारो विधीयते तदा भ्रमराणां स्वभावो भवति, यथैकं पुष्पं स्वीकृत्य यदि तदनन्तरं तदुत्कृष्टं प्राप्यते तर्हि पूर्वपुष्पस्य ते त्यागं कुर्वन्ति। तस्मादयं स्वार्थपूर्णो व्यवहार एवानौचित्यम्। ये पुरुषा: शाकुन्तलस्य दुष्यन्तवत् (यथा दुष्यन्तो हंसपदिकां विहाय शकुन्तलायामासक्तः) स्त्रीलोलुपा भवन्ति ते भ्रमरवृत्तयः कथ्यन्ते। अतः कविनास्य व्यवहारस्यानौचित्यविषयिकी चर्चा कृता स्यादिति प्रथममनुमानं कर्तुं शक्यते। ततश्च द्वितीयमिदमनुमानं यत् पुष्पाणि पवित्राणि भवन्ति, तस्मादेव पूजाकर्मण्यपि तेषामुपयोगो भवति। तेषां कुसुमानां त्यागं कृत्वा श्वासोच्छ्वासानिलग्रहणं नोचितम्। उत्तररामचरिते भवभूतिनाऽपि पुष्पादरः करणीय इति सूचितम्।[५] श्वासोच्छ्वासपवनस्त्वपवित्रो भवति, तस्मात् तस्य गृहणेऽनौचित्यम्। अत्र भ्रमरस्य पूर्वत्यागेऽनौचित्यं वाऽन्यग्रहणेऽनौचित्यं वा मूल्ययुतं त्यक्त्वाऽल्पमूल्यग्रहणेऽनौचित्यमिति त्रयो विचारा मनस्यायान्ति।

इत्थं कस्माद्भवतीति विचार: क्रियते। 'विशेषकामः' इत्यत्र कामो नाम मनोरथस्तथा च कामो नाम पञ्चशर:। अर्थे यदि मनोरथस्यार्थः क्रियते तदा लुब्धस्यार्थो युक्तियुक्तस्तथा च यदि कामदेवस्यार्थ: स्वीक्रियते तदा मदनासक्त इत्यर्थः सङ्गतो भवति।

पूर्वप्रश्नानां निराकरणं वल्लभदेवस्य टीकापठनेन न जायते, परन्तु मलिनाथस्य टीकापठनेन ज्ञानं भवति। कारणं तेन स्पष्टं कृतं यत् पूर्वपरिचितस्य

[५] नैसर्गिकी सुरभिण: कुसुमस्य सिद्धा।
मूर्ध्नि स्थितिर्न चरणैरवताडितानि ॥ भवभूति: ॥ **उत्तररामचरितम्** (१-१४); सं. रमानाथ त्रिवेदी, प्रका० चौखम्बा सुरभारती प्रकाशन; वाराणसी, ई, १९९९, पृ. २७,

यस्मिन् कस्मिन्नपि काले सम्पन्ने च कार्ये त्यागः क्रियते तन्नोचितं, तच्च भ्रमरैः कृतम्।[६] अनेन पूर्वसंशयो दूरीकृतः। तेन विशेषकामस्य पदस्य विग्रहोऽपि कृतस्तस्मात् विशेषतयेदं स्पष्टमभवत्। एतेन स्वल्पं सुभाषितवचनमपि स्वीयं विलिख्य समर्पितमिति विशेषलाभो विशेषकामानां कृते।

**आलापैस्तुलितरवाणि वाणिनीनां माधुर्यादमलपतत्रिणां कुलानि।**
**अन्तर्धामुपययुरुत्पलावलीषु प्रादुःष्यात्क इव जितः पुरः परेण॥(८-१२)**

कविवरेण प्राप्तघण्टामाघपदेन माघेनास्मिन्पद्ये विदग्धस्त्रीणां वाग्माधुर्येण निर्जिता हंसाः कमलसमूहेष्वन्तर्धां प्राप्तवन्त इति वर्णितम्। समस्तार्थचिन्तनं क्रियते तर्हि हरिसुन्दरीणामालापै र्माधुर्यविषये येषां स्वरतुलना जातास्तादृशा मरालाः कमलसमूहेष्वदृश्या बभूवुः। अन्यस्माज्जितः को मुखदर्शनं कारयेदिति भावः।

अस्य श्लोकस्यार्थविचारे वल्लभदेवस्य यथा चिन्तनं तथैव मल्लिनाथस्यापि चिन्तनं वर्तते। तथापि मल्लिनाथस्य लेखने किञ्चिद् वैशिष्ट्यं दृश्यते। तद्यथा-यत्र टीकाकाराः सार्थपदानां विवेचनं कुर्वन्ति तथैव निरर्थकपदानामपि विचारं कुर्वन्ति। निरर्थकपदानां कारणं पद्यरचनायां वृत्तलक्षणरक्षणहेतुर्मुख्यो भवति। वैदिकसाहित्ये त्वक्षरगणनयैव छन्दसां रचना वर्तते, तत्रापि न्यूनाधिक्यं भवति तर्हि न कापि हानिः। परं लौकिकसाहित्ये वृत्तरचनायां तथाविधोऽवकाशो न प्राप्यते, तस्मात् लौकिकसाहित्ये वृत्तानां रचना काठिन्य धारयति। अतः कवयो यदा वृत्तरचनां कुर्वन्ति तदा वृत्ते मात्रान्यूनताधिक्यरक्षणहेतवे क्वचित् 'च तु खल्वित्यादयः' एतत्पदानि विलिख्य पादपूर्तिं कुवन्ति। इत्थं प्रायोऽभिनवानां कवीनां विषये वाऽपर्याप्तशब्दधनानां कवीनां कृते भवति। कवीनां कृते वृत्तलक्षणरक्षणं प्रधानं भवति। परमेतादृशानां परिपक्वपण्डितकवीनां विषये कारणरूपं न भवति। तथापि ते निरर्थकपदानां प्रयोगान् कुर्वन्ति, तादृशं तद्ग्रन्थेषु दृश्यत एव। शास्त्रीयग्रन्थेषु यथा केषाञ्चिद्विवेचकानां मतान्यनुचितानि भवन्ति, तदाऽनुचितं न लिखन्ति परं 'चिन्त्यम्' विलिख्य दर्शयन्ति। तथैवात्रापि कारणं तेषां

---

[६] अनुचितोऽयमकाण्डे परिचितपरित्याग इत्याह विशेषं कामयते इति विशेषकामः ॥
इति मल्लिनाथः ॥ **शिशुपालवधम्** (८-१०); निर्णयसागरप्रेस; पृ. १९१.

विषये दोषलेखनं दोषाय भवति। काव्येषु निरर्थकपदानां कृते 'वाक्यालङ्कार' इति विचारका लिखन्ति।

अतः महाकवेर्माघस्य विषयेऽपि तथैव लेख्यं भवति। कारणं नवसर्गाणां समाप्तौ सर्वेऽपि शब्दास्तेन लिखितास्तादृशी तस्य ख्यातिर्वर्तते।[७] अस्मिन् श्लोके 'इव' द्वारा माघेन पादपूर्तिः कृता। वल्लभदेवेन न किमपि तद्विषये लिखितम्, परं मल्लिनाथेन तत्र 'इव' वाक्यालङ्कारे इति विलिख्य तन्निरर्थकमिति स्पष्टता कृता। 'च खलु....' पदानि तु वाक्यालङ्करे ख्यातानि तस्मात् ज्ञातुं शक्यते यदिदं निरर्थकमिति केवलं वृत्तपरिपूर्तये एव लिखितं वर्तते। 'इव' पदम् अपरिचितमस्मिन् विषये तस्मात् तत्र स्पष्टताऽनिवार्या भवति। यदि स्पष्टं न क्रियते तर्हि तत्र सामान्यपाठकानां कृते 'उपमा' वा 'उत्प्रेक्षा' अलङ्कारदृष्टिर्भवितुमर्हति। कारणं तत्र तुलनार्थमुपमेयोपमानयोः साधारणधर्मं दर्शयितुं 'इव' पदस्य प्रयोगो भवति।

पूर्वलिखितरूपेण मल्लिनाथेन निरर्थकपदानामपि सम्यग्विचारं कृत्वा तद्विषये चर्चा क्रियते।

**कान्तानां कुवलयमप्यपास्तमक्ष्णोः शोभाभिर्न मुखरुचाऽहमेकमेव।**
**सङ्घर्षादलिविरुतैरितीव गायल्लोलोर्मौ पयसि महोत्पलं ननर्त॥(८-२३)**

महाकविमाधविरचितशिशुपालवधमहाकाव्यस्याष्टमसर्गे युवकयुवतीनां शृङ्गारवर्णनं वर्तते।

श्लोकस्यार्थविचारो विधीयते तदा सुन्दरीणां नयनशोभावर्णनं वर्तते। यथा स्त्रीणां नयनशोभाभिः न केवलमेकं पद्मं परास्तमपितु नीलकमलमपि परास्तमिति स्पर्धायां न केवलं ममैव किन्तु नीलोत्पलस्यापि पराजयो जात इति हर्षाच्चञ्चलोर्मौ पद्मं भ्रमरगुञ्जनरवेण शब्दं कुर्वन्नृत्यमकरोत्।

अस्मिन् श्लोके वल्लभदेवमल्लिनाथयोः टीकाविचारः कृतस्तदाऽधोऽङ्कितं। फलमधिगतम्।

यथा - प्रकृतिरस्मान् प्रतिक्षणं किञ्चिद् बोधयति। अत्र पद्मव्यवहारेण तद्वर्णनेन वाऽस्माभि: किञ्चिद् ग्राह्यमिति कवेः कर्मणस्तात्पर्यं स्यात्। तेन काव्यप्रयोजनमपि सिद्धम्। वल्लभदेवेनैतस्य पद्यस्य शब्दार्थो लिखितः, परं

---

[७] नवसर्गे गते माघे नवो शब्दो न विद्यते। **संस्कृतमहाकाव्य;** सम्पादक डॉ. वसन्तकुमार भट्टः प्रका० सरस्वती पुस्तक भंडार; अहमदाबाद, ई.१९८७; पृ. ७४.

तात्पर्यार्थोऽपि लिखितः। समाजेऽपि स्पर्धायामेकस्य पराजयो भवति तदा स जनो दु:खी भवति, तथा च कस्यचिदन्यस्यापि पराजयो भवति तदा नाहमेकाकी पराजितः, परं मया सहान्योऽपि मम सहचरः पराजितः। असूयावशादयमानन्दः प्राप्यते। अत्र लोकव्यवहारस्य चर्चा वल्लभदेवेन कृता। 'लोलोमौं' पदस्य पर्यायः 'चञ्चलकल्लोले' इति वल्लभदेवेन लिखितं वर्तते। एतत् पदं नितान्तं नूतनमेव दृश्यते तदपि स्मरणीयमत्र।

मानवः पशुर्वा यदा प्रसन्नतामधिगच्छति तदा स्वहर्षातिरेकं सूचयितुं दर्शयितुं वा शब्दं करोति, उच्चैर्वदति, नृत्यञ्च तनोति। अत्र कमलेनापि शब्द: कृत:, नृत्यमपि कृतम्। कमलस्य कृते तत् कथं शक्यं स्यात्, कारणं निर्जीवं वर्तते, अयञ्च व्यापार: सजीवस्य। अत्र कमलस्य कोलाहलस्तु भ्रमरशब्दैरवगम्यते। परं तस्य नृत्यं प्रायः पवनेनैव भवति।

वल्लभदेवेनात्र नृत्यविषये न किञ्चिल्लिखितम्। परमत्र मल्लिनाथेनालङ्कारचर्चायां 'लोलोमौं' पदस्य विवेचनं कृतम्।[८] तत्र जलस्य लौल्यात् पद्मे कम्प उत्पन्न: स एव नृत्यस्य प्रकार इति। इयं स्पष्टता मल्लिनाथस्य सूक्ष्मचिन्तनं दर्शयति।

'एका क्रिया द्व्यर्थकरी प्रसिद्धा' तथैव मल्लिनाथेनाप्यत्र भ्रमररवक्रियया पद्मं वदतीव तथा च जलचाञ्चल्यान्नृत्यमिव करोतीति विलिख्य नृत्यस्य स्पष्टता तु जातैव, परमत्र तेन भ्रमररवे कमलस्य वाग्व्यवहारः कल्पितश्च जलोर्मिचाञ्चल्ये नृत्यस्योत्प्रेक्षा कृता। तस्मादत्र क्रियास्वरूपोत्पेक्षाऽलङ्कार एवं विलिख्यात्रालङ्कारस्पष्टताऽपि कृता।

**योग्यस्य त्रिनयनलोचनाऽनलार्चिर्निर्दग्धस्मरपृतनाधिराज्यलक्ष्म्याः।**
**कान्तायाः करलकशोद्यतैः पयोभिर्वक्त्रेन्दोरकृत महाभिषेकमेकः।।(८-२३)**

महाकविमाधविरचितशिशुपालवधस्याष्टमसर्गे युवकयुवतीनां जलक्रीडा-वर्णनं वर्तते। अस्मिन्पद्येऽपि तथैव वर्णनं वर्तते। विशेषज्ञानार्थं चिन्तनमपेक्षितं भवति।

---

[८] अत्रोर्मिचलनहेतुके महोत्पलचलने अलिनादसंहर्षहेतुकसमाननृत्यत्वोत्प्रेक्षणात् - क्रियानिमित्तक्रियास्वरूपोत्प्रेक्षा वाच्या॥ - इति मल्लिनाथः ।।
**शिशुपालवधम्** (८-२३); निर्णयसागरप्रे; पृ. १९५.

केनचिद् भगवतो महादेवस्य लोचनाग्निना सम्पूर्णदग्धस्य कामदेवस्य सेनाया आधिपत्यलक्ष्म्यनुरूपकान्तायाः मुखचन्द्रस्य करकलशैर्घृतेन पयसां समूहेनाभिषेकः कृतः।

माघो नूतनशब्दानां प्रयोगे चतुरः। तस्मादेव कारणान्नवसर्गपर्यन्तं शिशुपालवधं पठ्यते तर्हि न ततः कश्चिन्नूतनशब्दः शब्दकोशे भवेत्। 'नवसर्गे गते माधे नवो शब्दो न विद्यते' इति ख्यातिर्माघेन नूतनशब्दानां प्रयोगेन प्राप्ता। विशेषतो नवसर्गपर्यन्तं विशेषापरिचितशब्दानां प्रयोगा: प्राप्यन्ते।

श्लोकस्यास्य पठनं क्रियते तदा 'पृतना' पदं नितान्तमपरिचितमिति पाठकानामनुभवो वर्तते। मल्लिनाथेन प्रायः सर्वेषामपि पदानां पर्यायलेखनं कृतं परं महत्त्वपूर्ण: स एव शब्दस्त्यक्त:। तदपेक्षया वल्लभदेवेन 'पृतना' इत्यस्य 'सेवा' पर्यायशब्दोऽलिख्यत। अयमर्थ: श्लोकार्थे महत्त्वपूर्ण:।

अनेनेदं ज्ञायते। यथा - क्वचिद् येऽपरिचितशब्दाः समायान्ति तदा कतिपयप्रसङ्गेषु मल्लिनाथेन पर्यायलेखनं न क्रियते, परन्तु विषयेऽस्मिन् वल्लभदेवस्य ध्यानं भवत्येव। तस्य दृष्टिः कमपि शब्दं न जहाति। एवं वल्लभदेवस्य पर्यायलेखने प्रशस्यं कर्म वर्तते।

**हूतायाः प्रतिसखि कामिनाऽन्यनाम्ना ह्रीमत्याः सरसि गलन्मुखेन्द्रकान्तेः।**
**अन्तर्धिं द्रुतमिव कर्तुमश्रुवर्षै भूमानं गमयितुमीषिरे पयांसि॥(८-४२)**

अष्टमसर्गस्य जलक्रीडावर्णने श्लोकोऽयं माधेनालिख्यत।

पद्यार्थः - सख्यो वर्तन्ते तथापि केनचिद्-युवकेन प्रियतमा कस्याश्चिदन्यनार्या अभिधानेनाहूता। तदा म्लानाननाया अन्तर्धानाय अश्रूणि पतितानि। तैर्यथा जलवृद्धिरिवापेक्षिता।

अत्र पद्ये भावचिन्तनं वल्लभदेवेन कृतम्। यथा तेन लिख्यते यदस्मिन् काव्ये प्रियतमाया अपमानो जातस्तस्मात् सा मरणमिच्छतीति पद्यस्यास्य तात्पर्यम् समाजेऽपि रुष्टा नारी स्वात्मविलोपनं करोति तथा दृश्यते।

मल्लिनाथेन वस्तुध्वनिना पद्यस्यास्यार्थे स्वल्पेयं चमत्कृतिरानीता। यथा - सा मरणमिच्छति तथा जलवृद्ध्या ज्ञायते, परमेतादृशाज्जीवनान्मरणमेव मङ्गलमिति विचार्य सा जलवृद्धिव्यवहारमकरोत्। सामान्यरूपेण मरणे दुःखं भवति, परं सकामानां जनानां तादृश्यामवस्थायां मरणमपि मङ्गलाय कल्पते।[१]

---

[१] सतां माने म्लाने मरणमथवा दूरगमनम्। ( कस्यचित् )

अत: वल्लभदेवस्यार्थे सा सामान्यदुःखत्रस्ता देहं त्यक्तुकामा नारी वर्तते, परं मल्लिनाथमते सा स्वाभिमानरक्षणमिच्छन्ती नारी वर्तते। अत: गौरवेण देहत्यागमिच्छतीति भावः, न तु दु:खेन।

**नारीभिर्गुरुजघनस्थलाहतानामास्यश्रीविजितविकासिवारिजानाम्।**
**लोलत्वादपहरतां तदङ्गरागं सञ्जज्ञे स कलुष आशयो जलानाम्।।(८-४७)**

श्लोकोऽयमष्टमसर्गादुद्धृतो वर्तते। अस्मिन् सर्गे संक्रान्तयौवनानां कामीनां कामिनीनाञ्च जलक्रीडावर्णनं शृङ्गारान्वितं वर्तते। महाकविना माघेनास्मिन् पद्ये सरसं मदनमोहमायामयं वर्णनं कृतम्।

यथा - स्त्रीणां जघनस्थलैराहतानाम्, नारीमुखशोभाभिर्येषां विकसितपद्मानि पराकृतानि तेषां, चञ्चलत्वात् स्त्रीणामङ्गरागो यैरपहृतस्तेषां जलानामाशयः मलिनीभूतः।

अभिधाशक्त्या यो वाच्यार्थो भण्यते, स वाच्यार्थस्तु सामान्यपाठकस्यापि दृष्टिपथमायाति। ततो यदि समासोक्तिश्लेषादीनामपि द्वितीयार्थो विशेषपाठकानां कथञ्चिद् दृष्टिपथमायात्येव। परं ध्वन्यर्थनिपुणास्तु कतिपयजना एव जायन्ते, कारणमेतत्कर्म टीकाकाराणामपि दुर्गमं दृश्यते। तदेव कर्म टीकाकर्मण: श्रेष्ठतां दर्शयति।

पूर्वलिखितपद्यस्यार्थस्तु विलोकितः, परं तस्य ध्वन्यर्थोऽपि विलोकनीयो भविष्यति। यथा - नारीणां जघनस्थलताडितानां चञ्चलप्रकृतित्वात् तरङ्गरागं हरतां जड़ानामाशयो नाम मनोभावः कलुषो भवति। एतदेवास्य तात्पर्यम्।

डलयोरैक्यादत्र जलशब्दस्य जडशब्देनापि ग्रहणं भवति, तस्माच्चायमर्थोऽवगतो भवति।[१०]

एतस्य पद्यस्य ध्वन्यर्थविषये मल्लिनाथस्य विवेचनं समस्तं वर्तते, कारणं तेन केवलमेकस्यामेव पङ्क्तौ विवेचनं कृत्वाऽन्योऽर्थो दर्शित:।[११]

---

[१०] जलशब्दस्य विवेचने वल्लभदेवेन 'डलयोरैक्यात्' तथा लिखितम्। मल्लिनाथेन च 'डलयोरभेदात्' तथा लिखितम्। **शिशुपालवधम्** (८-४७); चौखम्बा; पृ. २९९.

[११] अपहर्तुस्ताऽनस्वहरणादिभिराशय: कलुषो भवतीति ध्वनि:। अभिधाया: प्रकृतार्थे नियन्त्रणान्न श्लेषः॥ - इति मल्लिनाथ: ॥ **शिशुपालवधम्** (८-४७); निर्णयसागर; पृ. २०४.

परं वल्लभदेवेनाङ्गरागं हरतामिति विशेषणस्यापि स्पष्टता कृता, यदङ्गरागस्य हरणं केन प्रकारेण स्यात्।[१२] तथापेक्षायाम् - शृङ्गारसक्तः कामी सतृष्णो भवत्यतस्तदङ्गरागग्रहणं तेन विधीयते। तस्य मनोभावः कलुषो भवतीति भावः। अत्रेदमपि चिन्तनीयं यन्मल्लिनाथेन 'आशय: कलुष:' इत्यस्यार्थो हृदयमप्रसन्नं भवतीति कृत:। वलभदेवेनात्र 'आशय: कलुष:' इत्यस्यार्थ: 'अन्त:करणं कामेनाविलं भवतीति' कृतः। मल्लिनाथस्यार्थेन रतौ निष्फलता ज्ञायते कारणं तेषामेव हृदयमप्रसन्नं स्याद् येषां रतिसमये जघनताडनेन परित्यागो भवेत्, तात्पर्यं मल्लिनाथमते कामी सम्भोगवञ्चितो दृश्यते। वल्लभदेवमतेनेदं ज्ञायते, यदत्र कामी नितान्तं कामासक्तो वर्तते, तस्मान्नार्या निवारितोऽपि तादृशी चेष्टां करोति, कारणं सम्भोगकाले तु लज्जास्पदं सर्वमपि न दोषाय। शृङ्गारे जघनस्थलास्वादमहत्त्वमतीव भवतीति तु मेघदूते कविकुलगुरुणा कालिदासेनापि स्वीकृतम्।[१३] तस्मादत्र जघनस्थलताडितोऽपि स प्रसन्न एव भवेदिति भावः।

अनेन दुर्व्यवहारेण यथा ताडितोऽपि सम्भोगेऽङ्गरागहरणासक्त उत्कटयौवनोऽयं। युवैष जडविशेषणस्य यथार्थरूपेणाधिकारी भविष्यति। अपरञ्च कामी जन एव योग्यायोग्यविषयविचारे कृपणो भवति। अतः पद्येऽस्मिन् वल्लभदेवस्यार्थो विशेषो दृश्यते।

मल्लिनाथस्तु ध्वनिवाद्यतस्तेन श्लोके ध्वन्यर्थो वर्तते तथा दर्शयितुं निर्देश एव कृतः। तेन सामान्यपाठकानामर्थज्ञानं न जायते। परं वल्लभदेवेनात्र वाच्यार्थो लिखितस्ततस्तस्य सन्दर्भानुरूपा चर्चाऽपि कृता। अतस्तेन सम्पूर्णमपि चित्रं स्पष्टीकृतम्।

अत्रेदमपि दृष्टिपथमागतं यन्मलिनाथस्य विवेचनेन स ध्वनिवादी दृश्यते, तथापि तेन ध्वन्यर्थ: स्पष्टो न कृतः, यद्यपि वल्लभदेवस्त्वलङ्करवादी दृश्यते, तथापि तेन समीचीनरीत्या ध्वन्यर्थः स्पष्टो विहितः। अन्यत्र तु ध्वन्यर्थविषये

---

[१२] यो हि नारीभिर्गुरुजघनस्थलैराहन्यते लोलत्वात्सम्भोगे सतृष्णत्वात्तरङ्गरागमपहरति, जडोश्चाविवेकी कामाकुलितो भवति, तस्याशयः अन्त:करणं कलुषं भवति कामेनाविलं भवतीति॥ इति वल्लभदेव: ॥ **शिशुपालवधम्** (८-४७); चौखम्भा, पृ. ३००.

[१३] ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः। (कालिदासग्रन्थावली)। **मेघदूतम्** (५-४१); सं. रेवाप्रसाद द्विवेदी; प्रका० काशी हिन्दू विश्वविद्याल वाराणसी, ई.स. १९७६, पृ. ३२.

श्लेषालङ्कारं स्वीकृत्य लिख्यते, परमत्र तथा स्पष्टता न कृतेति मौनयुक्ता स्वीकृति: यत: 'मौनं स्वीकृतिलक्षणम्' सर्वस्वीकृतं मतम्। वल्लभदेवस्य ध्वन्यर्थो वैशिष्ट्यमर्हति यतो हि स आद्यो विवेचकः।

**आरूढः पतित इति स्वसम्भवोऽपि स्वच्छानां परिहरणीयतामुपैति।**
**कर्णेभ्यश्च्युतमसितोत्पलं वधूनां वीचीभिस्तटमनु यन्निरासुरापः।।(८-५४)**

अष्टमसर्गस्य श्लोकेऽस्मिन् महाकविना माघेन युवतीनां जलक्रीडावसरवर्णनं कृतम्।

श्लोकार्थो यथा - उच्चपदं प्राप्य ततो य: पतितो भवति स निर्मलजनानां कृते स्वत उत्पन्नोऽपि त्याज्यो भवत्यतोऽङ्गनाकर्णमधिरूढं ततश्च पतितं स्वसम्भवमपि तरङ्गैर्नीलकमलं दूरीकृतम्।

सर्गेऽस्मिन् बहुस्थलेषु अर्थान्तरन्यासालङ्कारो वर्तते। अत्र वल्लभदेवमल्लिनाथयो र्विवचने दृष्टिः क्रियते तदा 'स्वसम्भव' पदस्य 'पुत्र' इत्यर्थ: कृतो यदि सुपुत्र: कुपुत्रो जायते तदा पित्रा तस्य त्यागो विधीयते। गृहप्रवेशः तस्य कृते निषिद्धो भवति। यथात्र वारिणि जातमपि कमलं नारीकर्णच्युतं तस्मात् तरङ्गहस्तेन तद्दूरीकृतं तथैव पुत्रस्य हस्तं गृहीत्वा पित्रा स गृहाद्-बहिः क्रियते।

अत्र मल्लिनाथस्य विवेचनं विलोक्यते तदा तत्र 'स्वसम्भव:' शब्दस्यार्थ आत्मसम्भव एव कृतः। एवञ्च न किमपि विशेषं प्रोक्तम्। यद्यपि यत्रार्थान्तरन्यासालङ्कास्तत्र समाजानुकूलं किञ्चिद् वक्तव्यं भवत्येव। अतः सामान्यविशेषयोर्विवेचनमावश्यकं भवति, यतो हि पाठकानामर्थसिद्धि: समीचीना भवेत्।

वल्लभदेवेनात्र पुत्रस्यार्थं गृहीत्वा समीचीनार्थघटनं कृतमिति भावः।

साम्प्रतमपि समाजे वल्लभदेवस्यार्थघटनं यथार्थं दृश्यते। तत्र कारणं ये बाला अधिगतसंस्कारा भवन्ति, ते संस्कारानुरूपपदमप्यधिगच्छन्ति, ततश्च पदमदमत्ता जायन्ते। तस्माच्च ते पदभ्रष्टा भवति। भतृहरिणाऽपि विषयस्यास्य नीतिशतके सुरसरिदुदाहरणेन पुष्टि- र्विहिता।[१४] अतस्तादृशाः समारूढोच्चपदाश्च ततश्च्युताः स्वाभिमानिना पित्रा गृहाद्दूरीक्रियन्ते।

---

[१४] शिर: शार्वं स्वर्गात्पशुपतिशिरस्तः क्षितिधरम् महीध्राादुत्तुङ्गादवनिमवनेश्चापि जलधिम्।
अधो गङ्गा सेयं पदमुपगता स्तोकमथवा विवेकभ्रष्टानां भवति विनिपातः शतमुखः।।
**भर्तृहरिशतकम् ( नीतिशतकम्-१०);** सं. किशनलाल, बम्बई भूषण प्रेस; मथुरा, पू.०७.

एवमत्रापि समाजानुरूपं तथा चालङ्कारानुरूपमर्थघटनं कृत्वा वल्लभदेवेनातीव सम्यक् समाजचित्रं दत्तम्।

**दन्तानामधरमयावकं पदानि प्रत्यग्रास्तनुमविलेपनां नखाङ्काः।**
**आनिन्यु: श्रियमधितोयमङ्गनानां शोभायै विपदि सदाश्रिता भवन्ति।।(८-५५)**

महाकविना माघेनाष्टमसर्गे नारीणां जलक्रीडावर्णनं विहितम्।

श्लोकस्यास्यार्थविचार: क्रियते । यथा - ललनाया एतानि चिह्नानि शोभां प्राप्तानि, कानि च तानि चिह्ननानीत्यपेक्षायां सत्यां कविना लिख्यते, तोयेऽलक्तकरहित: ओष्टो विगतशोभ: सञ्जात:, तञ्च दन्तानां व्रणानि अभूषयन्, अपरञ्च तनुरपि विगतशोभा सज्जाता, कारणं विलेपनं जलेन नष्टम्, परं तां विनष्टशोभां तनुं नूतना नखाङ्का अभूषयन् । एतस्य कारणं कविनोक्तं यत् सदाश्रिता विपदि स्वामिनः शोभावृद्धिं कुर्वन्ति। अनेन च तत्रस्थानां नारीणामुत्कटयौवनं वर्णितम्। सम्भोगकाले तेषां कीदृशो व्यवहारो वर्तते तदपि दर्शितम्। श्लोकेऽस्मिन्नर्थान्तरन्यासालङ्कारो वर्तते। अत्रेदं स्मरणीयं यदत्र सर्गे प्राय: सर्वेषु पद्येष्वयमेवालङ्कारो वर्तते। अस्मिन्नलङ्कारे सामान्येन विशेषस्य विशेषेण वा सामान्यस्य समर्थनं भवति। माघेऽलङ्कारविमर्शकारेणाप्यत्रार्थान्तरन्यासालङ्कार एव लिखितः।[१५] अत्र सामान्यद्वारा विशेषस्य समर्थनं वर्तते, कारणमत्र दन्तनखव्रणादीनां शोभावृद्धिरूपं कर्म विशेषमस्ति तथा च सदाश्रिता विपदि स्वामिनः शोभाभिवृद्धिं कुर्वन्तीति सामान्यं वर्तते। तद्द्वारा विशेषस्य समर्थनं कृतम्। परमत्रालङ्कारचर्चाऽप्रासङ्गकीति मत्वा विषद्विवेचनं न विधीयते।

पद्येऽस्मिन् ‘सदाश्रिता’ इति पदं जटिलं वर्तते । तस्य पदस्य वल्लभदेवेन मल्लिनाथेन च स्वल्पं भिन्नविवेचनं कृतम्, येनार्थविषये महदन्तरं भवितुमर्हति, अत्र वल्लभदेवेन ‘सदाश्रिता’ नाम ‘नित्यसेवका’ इत्यर्थो लिखितस्तस्मादत्र तेन सदाऽऽश्रिता तथा पदद्वयं स्वीकृत्यार्थः कृतः।[१६]

---

[१५] दन्तानामधर..... । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः। **माघेऽलङ्कारविमर्शः** पृ. २१६.

[१६] यत:कारणात् सदाश्रिताः नित्यसेवकाः विपदि सत्यां व्यसने सति शोभायै श्रियै भवन्ति ॥ - इति वल्लभदेवः ।। **शिशुपालवधम्** (८-५५); चौखम्भा; पृ. ३०४.

एतस्य तात्पर्यं ये नितान्तमाश्रिताः सेवका भवन्ति, ते समर्पिता भवन्ति, विपत्तावपि भर्तुः शोभाभिवृद्धिं कुर्वन्ति। धने विगते सति तेषां भावो विशेषो भवति।

मल्लिनाथस्य विवेचनं विलोकितं तदेदं दृष्टिपथमागतम्। यथा तेन द्वितीयातत्पुरुषसमासं स्वीकृत्य 'सतः आश्रिताः' तथा तत्रैकमेव समस्तं पदं गृहीतम्।[१७] तत्र ये सेवका: सज्जनाश्रितास्ते तेषां विपत्तावपि शोभां वर्धयन्ति।[१८]

उभयोरप्यर्थयोश्चिन्तनं क्रियते, तदा वल्लभदेवस्यार्थे केवलं सेवकानामेव निष्ठा दृश्यते, यतो हि ते विपत्तावपि स्वामिनं न मुञ्चन्ति। परं तत्सहायका भवन्ति। मल्लिनाथस्यार्थविवेचने ये सज्जनानाश्रित्य तिष्ठन्ति तेषां जीवनं नित्यसत्सङ्गात् साधु भवति। अत्र स्वामिनो जीवनस्य महत्त्वं दृश्यते। अत्र कर्मधारयसमासमाश्रित्य 'सन्तश्च ये आश्रिताः ते सदाश्रिता:' तथाऽऽश्रितानां सत्पदं विशेषणरूपेण स्वीक्रियते तर्हि योग्या एव सेवकास्तथाविधायां परिस्थितौ शोभां कुर्वन्ति तथैकोऽर्थो भवितुमर्हति। अर्थत्रयेऽपि मल्लिनाथस्योभयपक्षयोग्यतापूर्णमर्थघटनं योग्यतां तनोति।

**भ्रश्यद्भिर्जलमभि हेमभिर्वधूनामङ्गेभ्यो गुरुभिरमज्जि लज्जयेव।**
**निर्माल्यैरथ ननृतेऽवधीरितानामप्युच्चैर्भवति लघीयसां हि धार्ष्ट्यम्॥(८-६०)**

अस्मिन्पद्येऽपि जलक्रीडावर्णनमेव वर्तते। यथा स्त्रीणामङ्गेभ्यो भ्रष्टानि गुरुभूषणानि लज्जयेव मज्जनमकुर्वन्; तथा च भुक्तानि तस्माच्च त्यक्तानि पुष्पादिभूषणानि जले नृत्यमकुर्वन्। यथार्थमिदं ये निम्नजना भवन्ति ते नितान्तं तिरस्कृता अपि निर्लज्जा भवन्ति।

अथ द्वयोरपि टीकाकारयोर्विवेचनपरम्परां विलोकयामः। मल्लिनाथस्य विवेचने निम्ना जना निर्लज्जा भवन्ति, तथा च ये महान्तः सन्ति ते सलज्जा: सन्तो जीवनं त्यजन्ति, तादृशो भावो विशेषतः स्पष्टो भवति।[१९] अनेनेदमपि दर्शितं यत्

---

[१७] सत: सज्जनान् सुन्दराश्च आश्रिताः सदाश्रिताः ये केचिदिति शेषः॥ - इति मल्लिनाथः ॥
**शिशुपालवधम्** (८-५५): निर्णयसागरप्रेस; पृ. २०७.

[१८] सत्सङ्गति: कथय किं न करोति पुंसाम्। **भर्तृहरिशतकम्** ( नीतिशतकम्-२३); पृ. १४.

[१९] महान्तः पदभ्रंशे लज्जिताः क्वचिन्निलीयन्ते, तुच्छास्तु निर्लज्जा विजृम्भन्त इति भावः। अप्सु गुरूणि मज्जन्ति लघूनि प्लवन्त इति परमार्थ: ॥-इति मल्लिनाथ: ॥
**शिशुपालवधम्** (८-६०); निर्णयसागरप्रेस; पृ. २०९.

जलस्यायं स्वभावो भवति, यतस्तत्र निम्नपदार्थास्तरन्ति गुरुपदार्थाश्च मज्जन्ति। समाजेऽपि तथैव भवति ये महान्तः सन्ति ते सलज्जा भवन्ति तस्मात् गुणवन्तोऽप्यात्मघातं कुर्वन्ति; एवञ्च ये निर्लज्जा भवन्ति ते सुखं जीवन्ति। एतत् तात्पर्यं मल्लिनाथस्य विवेचनात् प्राप्यते। अत्र समाजस्य कीदृशी दयनीया स्थितिर्वर्तते तत्स्पष्टं कृतम्। सज्जनाः कथं जीवन्ति दुर्जनाश्च कथं जीवन्तीति मल्लिनाथ: स्पष्टं कृतवान्। वल्लभदेवेन सामान्यार्थ एव लिखितः।

**वासांसि न्यवसत यानि योषितस्ताः शुभ्राऽभ्रद्युतिभिरहासि तैर्मुदेन।**
**अत्याक्षुः प्लवनगलज्जलानि यानि स्थूलाश्रुस्नुतिभिररोदि तैः शुचेव।।(८-६६)**

अष्टमसर्गस्य पद्येऽस्मिन् नारीणां स्नानलीलावर्णनं वर्तते। अत्र नारीधृतवस्त्राणि धन्यानि तस्मात् तान्यहोभावं प्रकटीकुर्वन्ति, तथा च यानि वस्त्राणि न धृतानि तैः शोको दर्शितः। कथमिति पद्यार्थेन ज्ञायते। यथा - यानि वस्त्राणि स्त्रीभिर्धृतानि तैः शुभ्रतेजसा हास्यं प्रकटीकृतम्। यानि वस्त्राणि नारीभिस्त्यक्तानि तै: स्नानवशाज्जलमोक्षद्वारा शोकेनाश्रुपात: कृत:।

दुःखमनुभवन्तो जनाः प्रायोऽश्रुपातं कुर्वन्ति नाम तेषां नयनेभ्योऽश्रूणि पतन्ति, अत्रापि वस्त्रेभ्यो जलं पतति तस्मात् वस्राणां रोदनं ज्ञायते। जना यदा प्रसन्ना भवन्ति तदा ते हास्यद्वारा प्रसन्नतां प्रकटयन्ति। वस्त्राणि तु निर्जीवानि सन्ति परं जलपातेन तेषां रोदनं ज्ञातुं शक्यते, परं हास्यं कथं ज्ञेयमिति चिन्तनविषयो भविष्यति। तत्र समाधानं यदलङ्कारसास्त्रविद्भिः सर्वेषामपि रसानां वर्णाः निश्चिता विहिताः। तत्र हास्यस्य शुभ्रो वर्णः, अत्र वस्त्राण्यपि श्वेतद्युतियुतानि तथा च हास्यस्य वर्णोऽपि श्वेतः, तस्मादत्र श्वेतमेघद्युतियुतेन वस्त्रवृन्देन हास्यं कृतमिति भावः। अत्र तेषां श्वेतद्युतिरेव हास्यम्।[२०]

***

[२०] शृङ्गार–हास्य-करुण–रौद्र-वीर-भयानक-बीभत्स–अद्भुत-शान्तादयो नवरसा दशमश्च वत्सलरस:।
विकृताकारवाग्वेषचेष्टादेः कुहकाद् भवेत्। हास्यो हासस्थायिभावः श्वेत: प्रथमदैवतः॥ २१४ ॥
**साहित्यदर्पण:** (३-२१४); पृ. २५१.

# सर्गः-९
# सन्ध्यावर्णनम्

शिशुपालवधस्य नवमसर्गे महाकविना माघेन प्रमुखतया शृङ्गारवर्णनमेव कृतम्। पूर्वसर्गानुसारं यदा भगवान् श्रीकृष्णो वनविहारजलक्रीडामनुभवति तदा सूर्योऽपि स्नातुमिवास्तं गतः। तस्मिन् गते कमलान्यपि संकुचितानि जातानि। अत्र कविना सुन्दरं सन्ध्यावर्णनं विहितम्। तत्र भर्तरि मृते भार्ययाऽऽत्मविलोपनं क्रियते तथैव सवितरि गते सन्ध्यापि पश्चादेवास्तं गता, तथा विलिख्य तत्कालस्य सामाजिकी व्यवस्थाऽपि सूचिता। ततश्च चन्द्रोदयवर्णनं सर्वत्रान्धकारस्य प्रभावादिवर्णनम् चन्द्रमस्युदिते सति कामिनां कामो वर्धते, तस्मात् सर्वत्र स्मरानुकूलं वातावरणं प्राप्य कामुका: कामिनीं सर्वविधेन कौशलेन सन्तोषयन्ति स्म। एवमत्र शृङ्गारवर्णने नवमसर्ग: कविना समाप्तिं नीतः।

नवमसर्गमेव लक्ष्यीकृत्य यदि वल्लभदेवमल्लिनाथयोर्विवेचनवैशिष्ट्यं लिख्यते, तर्हि पूर्ववत् वाच्यार्थज्ञानार्थं वल्लभदेवस्य लेखनं विशेषमनुकूलं वर्तते, परं मल्लिनाथस्य लेखने प्रौढपाठकानामपि क्वचित् काठिन्यानुभूतिर्भवेत्। वल्लभदेवः क्वचिदलङ्कारचर्चां करोति, मल्लिनाथस्तु प्रायः सर्वत्रालङ्कारचर्चां विदधात्येव। उभावपि यथावसरं सामान्यार्थेण विशेषार्थं सूचयत:। मल्लिनाथस्यालङ्कारचर्चा, नायिकाभेदप्रभेदचर्चा तथा च प्रणयदशाचर्चा विशिष्टा, यत् आलङ्कारिकाणां कृते टीकेयं विशेषं स्थानमर्हति।

तात्पर्यकथने द्वावप्येतौ टीकाकारौ समानौ वर्तेते।

अत्रेदमपि स्मरणीयं यदस्य सर्गस्य विवेचने वल्लभदेवेन मल्लिनाथेन च प्रायः साम्यमेव दर्शितम्। तस्मादत्र न विशेषचिन्तनचिन्तावकाश:।

**अभितिग्मरश्मि चिरमाविषयादवधानखिन्नमनिमेषतया।**
**विगलन्मधुव्रतकुलाऽश्रुजलं न्यमिमीलदब्जनयनं नलिनी॥(९-११)**

नवमसर्गारम्भे सूर्यास्तवर्णनं महाकविना कृतम्। अस्य पद्यस्यार्थविचार: क्रियते तदा नलिनी प्रखरकिरणं सूर्यमस्ताभिमुखं चिरकालं यावदनिमेषलोचनेन विलोक्य द्विरेफकुलाश्रूणि त्यक्त्वा निमीलितनयना सुजाता।

अत्र सूर्यास्तवर्णनं वर्तते। सूर्यास्तसमये स्वाभाविकरूपेण कमलकुलानि संकोचमधिगच्छन्ति। संकोचाच्च द्विरेफमाला बहिर्याति। एतस्यैव प्रसङ्गस्य वर्णनं कविना कृतम्। वल्लभदेवेनात्र वाच्यार्थस्यैव विवेचनं कृतम्।

मल्लिनाथेनात्र नलिन्या नायिकारूपेण कल्पना कृता,[१] ततश्चोक्तं यथा काचिन्नायिका भर्तरि गृहमागते सति प्रसन्ना भवति तथैवेयमपि नलिनी सूर्योदयकाले प्रफुल्ला भवति तथा च भर्तरि प्रयाणाभिमुखे सति निमीलितनयना सती नयनजलं मुञ्चति, अनेन प्रकारेण वियोगदु:खं प्रकटीकरोति।

अत्रापि नलिनी नेत्रात् भ्रमररूपाण्यश्रूणि मुञ्चति। नलिन्याः रोदनप्रसङ्गे समस्येयं यथा सामान्यरूपेणाश्रूणि तु पारदर्शकानि भवन्ति, परमत्र भ्रमरास्तु कृष्णा वर्तन्ते तत्कथं साम्यं स्यादिति। तत्र समाधानं यदा स्त्रीणां नयनेषु कज्जलं भवति तदा कज्जलजलमिश्रणेनाश्रुवर्णोऽपि कृष्ण एव सम्पद्यते। ततश्च भ्रमराणां कल्पनायामौचित्यं सिध्यति। एतदपि मल्लिनाथेन लिखितं स्यात् तदार्थो विशेषस्स्पष्टो जायेत। नलिनी कथमनिमेषलोचना वर्तते, तर्हि नायिकाऽपि भर्तुर्दर्शनं पुन: कदा भवेदिति विचिन्त्य चिरं विलोकयति, तत्र पक्ष्म बाधारूपं भवति। श्रीमद्भागवते कृष्णद्वैपायनव्यासेनापि गोपीगीते तथैव लिखितम्।[२] दशमस्कन्धे गोप्यो वदन्ति, यदा वयं भगवन्तं श्रीकृष्णं पश्यामस्तदा येनेदं पक्ष्मनिर्माणं कृतं स ब्रह्मा जड इव भाति। एवं व्यासेनापि निर्निमेषदर्शनं महत्त्वपूर्णमिति स्वीकृतम्।

कवीनां काव्यानि जीवनं दर्शयन्ति, तस्मात् काव्यवर्णनेन मानवजीवनदर्शनमेव महत्त्वपूर्णम्। विवेचनेऽपि कविना यल्लिखितं तस्यैव विवेचनं क्रियते। तत् समीचीनमेव। परं यल्लिखितं नास्ति तदपि यदि लिख्यते तत्तु टीकाकर्मणो वैशिट्यं गण्यते। तच्च टीकाकर्तु र्योगदानमपि गण्यते।

अस्मिन् पद्ये मल्लिनाथेन सूर्यस्य नलिन्याश्च स्त्रीपुरुषरूपेण दर्शनं कृत्वा गृहस्थाश्रमस्य निपुणं निरीक्षणं कृत्वा स्नेहपाशबद्धस्य कस्यचिद् युगलस्यार्थग्रहणं कृतम्।

अत्रेदमपि स्मरणीयं यद् वल्लभदेवेनान्यपद्यानां विवेचनेऽन्यस्यार्थस्य कल्पना कृता परमस्यैव पद्यस्यार्थविवेचने लक्ष्यार्थस्य विवेचनं न कृतम्।

---

१ अनुरक्ता हि कान्ता कान्तमनिमेषं पश्यन्ती तदपाये सति निमीलिताक्षी स्यादिति भाव;।
- इति मल्लिनाथ:॥
शिशुपालवधम् (९-११); निर्णयसागरप्रेस; ९, २४६

२ अटति यद् भवानह्नि काननं त्रुटिर्युगायते त्वामपश्यताम्।
कुटिलकुन्तलं श्रीमुखं च ते जड उदीक्षतां पक्ष्मकृद् दृशाम्।।
श्रीमद्भागवतम् (१०-३१-१५) पृ. ४५२.

**निलयः श्रियः सततमेतदिति प्रथितं तदेव जलजन्म तया।**
**दिवसात्यययात्तदपि मुक्तमहो ! चपला जनं प्रति न चोद्यमदः।।(९-१६)**

नवसर्गे महाकविना माघेनारम्भे सूर्यास्तवर्णनं, ततश्च सन्ध्यावर्णनं कृतम्। अस्मिन् श्लोके सन्ध्याया एव वर्णनं वर्तते।

यथा - जलजं लक्ष्म्या गृहं वर्तते। परं दिनान्ते लक्ष्म्याऽऽधारभूतमपि पङ्कजं त्यक्तम्, तत्र कारणं लक्ष्मीस्तु चपला, एवञ्च ये चपला भवन्ति तेषां कृते किं वक्तव्यम्, अर्थात् न किमपीति भावः।

अत्र वल्लभदेवेन दिनान्ते लक्ष्म्या कमलं त्यक्तमेतज्जनं प्रति न **उद्यमित्येव** सामान्यार्थ: कथितः।[३] अन्ते च लिखितं 'लक्ष्मीस्तु चञ्चला नास्तीति' तस्य विवेचनं स्पष्टं नास्ति।

यद्यपि पद्ये निवासस्त्यक्तो नाम चाञ्चाल्यं दर्शितमेव। अनेनापि प्रथमं चपलेति लिखितं ततश्च चपला नास्तीति लिखितं नाम 'वदतो व्याघातन्यायेन' नेदं लेखनं स्पष्टम्। परमेतद् विवेचनं श्रमोत्पादनं करोति।

मल्लिनाथस्य विवेचने कमलत्यागेन लक्ष्याश्चपलतादोषस्तु प्रकटीभूत एव। मल्लिनाथेन विशेषत इदमपि लिखितं यत् सर्वा अपि नार्यश्चपला एव भवन्ति। एवमत्र लक्ष्मीस्तु देवाङ्गना वर्तते, साऽपि यदि चञ्चला भवति तर्हि सामान्यनारीणान्तु का कथा।[४] यदि गुणवतां वर्तनं दोषपूर्णं भवति तर्हि दोषयुतानां भवेदेवेति तत्र किमाश्चर्यमिति मल्लिनाथस्य विवेचनेन स्पष्टीकृतम्। अन्यत्रापि शास्त्रेषु स्त्रीचापल्यं ख्यातमेव वर्तते।[५]

---

[३] एतेन श्रीः चपला, एव अद एतत् जनं प्रति च न उद्यं न वाच्यम्। इत्याश्चर्ये। जलमपि त्यक्तं दिनाभावात्, श्री: चपला नैव भवति॥ - वल्लभदेवः।।
शिशुपालवधम् (९–१६) चौखम्भाः पृ. ३१७,

[४] अहो ! देवानामपि कृतघ्नत्वं, यदापादि महोपकारिणस्त्याग इत्याश्चर्यम्। अथवा चपला चापलवती स्त्री, कमला च। सैव जनश्चपलाजन:। अद इदं कृतघ्नत्वं चोद्यं चोदनीयं कथमित्याक्षेप्यं न।। - इति मल्लिनाथः ।।
शिशुपालवधम् (९-१६); निर्णयसागरप्रेस; पृ. २१८

[५] शास्त्रं सुचिन्तितमपि परिचन्तनीयं वश्यो नृपोऽपि सततं परिषेवणीयः।
अङ्कं गताऽपि तुरुणी परिरक्षणीया शास्त्रे नृपे च युवतौ च कुत: वशित्वम्।। (कस्यापि)

अन्यत् मल्लिनाथेन लिखितं यदेतस्याश्चर्यं यतो हि देवा अपि कृतघ्ना भवन्ति, कथमित्यापदि स्वाधारभूतमपि महोपकारिणमपि त्यजन्ति। लक्ष्म्या इदं वर्तनं सिद्धं करोति यद् देवा अपि नितान्तं कृतघ्नभावपूर्णाः।

अत्र लक्ष्मीश्चपला तत्र 'चपला' पदे श्लेषं स्वीकृत्य नार्यश्चपला इत्यर्थो दर्शितः, ततश्च लक्ष्मीस्तु देवी तस्माद् देवाः कृतघ्ना भवन्ति। वामनावतारे बलिना भगवते सर्वस्वं प्रदत्तम्, भगवता स बन्धने क्षिप्तस्तत्रेदं कृतघ्नत्वं दृश्यत एवं।

एवमत्र मल्लिनाथविवेचनेऽर्थवैशिष्ट्यं वर्तते। अन्यच्चालङ्कारदृष्टिरपि वर्तत एव। तस्मादेतस्य विवेचनं विशेषरोचकं जायते।

अत्रेदमपि स्मरणीयं यद् वल्लभदेवेन च + उद्यम् = चोद्यं गृहीतं नाम पदद्वयं तत्र कल्पितम्।[६] तेनात्र नैकमपि पदं निरर्थकम्, परं च + उद्यम् तत्र चकारस्य निरर्थकता वा पादपूर्त्यर्थमेवेति ज्ञातव्यं भवति। वल्लभदेवेन क्वचिद् व्याकरणपक्षपातं कृत्वेत्थं नूतनं लिख्यते। प्रथमसर्गस्य 'गतं तिरश्चीन.....[७] पद्येऽप्यस्माभिरेतद्विवेचितम्।

**ननु सन्दिशेति सुदृशोदितया त्रपया न किञ्चन किलाऽभिदधे।**
**निजमैक्षि मन्दमनिशं निशितैः क्रशितं शरीरमशरीरशरैः॥(९-६१)**

नवमसर्गे कविना माघेन नायिकानां विरहावस्थावर्णनं कृतम्। श्लोकेऽस्मिन् कस्याश्चिन्नायिकायाः विरहावस्थायां कीदृशी स्थितिर्जाता, तां कविर्वर्णयति।

अयि सन्देशं कथयेति काचित् सुनयना नायिका पृष्टा तदा सा लज्जया न किमपि कथितवती, परं शनैः कामदेवबाणैः कृशतां नीतं स्वशरीरमेवानिमेषलोचना सती विलोकितवती।

अत्र महाकविना माघेन महाकाव्यव्याजेनालङ्कारशास्त्रमपि पाठ्यते। परं वल्लभदेवस्य टीकयेदं ज्ञातुं न शक्यते, कारणं तेन तादृशी चर्चा न क्रियते। मल्लिनाथेनैतस्य समीचीना चर्चा कृता। अलङ्कारशास्त्रे नायिकानां भेदप्रभेदवर्णनं

---

[६] वद् सम्प्रसरणेन-उद्यम्।

[७] शिशु. 1/2

वर्तते। ततश्चारम्भतोऽन्तपर्यन्तं प्रणयस्य दुर्दशा भवन्तीति प्रोक्तम्।[८] विरहयुतानां स्त्रीणां शरीरस्थितिं विलोक्य कस्यां दशायां सा जीवतीति वक्तुं शक्यते।

मल्लिनाथेनास्य पद्यस्य शास्त्रविवेचनं कृत्वा लिखितं यदेषा कलहान्तरिता मध्यमा नायिका वर्तते। अनङ्गस्य दशदशा भवन्ति, तासु वर्तमानाया नायिकायाः कार्श्याख्या कामावस्था वर्तते।

एवमेतस्य विवेचनेन पाठकानां शृङ्गाररसानुभूतिस्तु भवत्येव, परं साहित्यशास्त्रस्यापि सिद्धान्तानां ज्ञानं भवति, तस्मादयं काव्यविनोदेन शास्त्रमपि पाठयति।

**परिमन्थराभिरलघूरुभरादधिवेश्म पत्युरुपचारविधौ।**
**स्खलिताभिरप्यनुपदं प्रमदा: प्रणयाऽतिभूमिमगमन् गतिभि:।।(९-७८)**

माघकृतशिशुपालवधस्य नवमसर्गे स्त्रीणां रतिविलासलीलावर्णनं वर्तते। पद्येऽस्मिन्नपि कासाञ्चित् स्त्रीणां तादृश एव प्रणयव्यवहारो दर्शित:। अस्य पद्यस्यार्थस्त्वधोऽङ्कितो वर्तते।

नार्य आवासे पदे पदे सञ्जातस्खलनाभिरलसाभि गतिभिः पत्युरुपचारार्थं गमनं कृतवत्य:। तत्र स्खलनकारणन्तु गुरुजघनभारः। एवम्विधाः सत्यः प्रणयस्य पराकाष्ठां प्राप्तवत्यः।

अत्र वल्लभदेवेन लिख्यते अन्योऽपि यः किल सञ्जातस्खलनो भवति, अतिभूमिं स न याति। एतेनास्य तात्पर्यं स्पष्टं न भवति जनशब्दस्य पुल्लिङ्गत्वात्। अस्येदं तात्पर्यं यत् कश्चिज्जनः यदि गच्छन् पुनः पुनः पतति, तर्हि सोऽतिभूमिं न याति। परमेतस्मिन् पद्ये शृङ्गारस: तस्मादपि सोऽर्थस्त्वनुकूलो न भवेत्।

मल्लिनाथनात्र विरोधाभासालङ्कारं दर्शयित्वा स्खलनस्यार्थश्चारित्र्यभङ्गः सूचितः, ततश्च विरोधपरिहारार्थं पतनमित्यर्थः सूचितः। सामान्यरूपेण स्त्रीणां स्खलनं पत्युः क्रोधाय भवति, परमत्र तदुपचारविधौ स्खलनं जातं तस्मात् तत्प्रीतिकरमभूदिति भाव:।

---

[८] दृङ्मन: सङ्गसङ्कल्पाज्जागर: कृशताऽरतिः।
हृीत्यागोन्मादमुन्ता इत्यनङ्गदशा दश।। - इति मल्लिनाथः।।
शिशुपालवधम् (९-६१); निर्णयसागरप्रेस पृ. १३०.

अत्र 'स्खलनपदस्य' विशेषार्थं सूचयित्वा मल्लिनाथेन सामान्यार्थस्यापि चमत्कृति र्दर्शिता। यद्यपि वल्लभदेवेनापि स्वल्प आयासः कृतः, परं स मल्लिनाथस्य टीकायां फलित:।

**न विभावयत्यनिशमक्षिगतामपि मां भवानतिसमीपतया।**

**हृदयस्थितामपि पुनः परितः कथमीक्षते बहिरभीष्टतमाम् ।।(९-८१)**

कविवरमाघकृतशिशुपालवधस्य नवमसर्गस्यास्मिन् पद्ये काचिन्नायिका नायकाय क्रुध्यति तस्मै चोपालम्भं ददाति।

अधुनार्थविचारो विधीयते। काचिन्नायिका कथयति, यदहं सततं तव समीपे वसामि तथापि त्वया मम दर्शनं न क्रियते। त्वं मां विलोकयितुमसमर्थस्तर्हि हृदयनिहितां प्रियतमां कथं सर्वत्र पश्यसि।

अस्य पद्यस्य विवेचने सामान्यार्थस्तु वल्लभदेवेन मल्लिनाथेन च दर्शित एव वर्तते। परं विशेषार्थकथनमपि कृतम्।

यथा - अक्षिगतामपि मां न पश्यसि नाम नयनाग्रनिवासिनीमपि मां न विलोकयसि तथा वाच्यार्थ: व्यङ्ग्यार्थस्तु 'भवान्मां द्वेष्यभावान्न पश्यतीत्यर्थ:'।[९] मल्लिनाथेनापि स एवार्थो दर्शितः, परं तेनेदमपि लिखितं यत् 'अपि' शब्देनात्र विरोधो दृश्यते, अत्रापि 'अपि' शब्देनात्र विरोधो बोद्धव्यः। अनेनात्र विरोधाभासालङ्कारः स्पष्टीकृत:। अपरञ्च विरोधपरिहारार्थं तेन समीपत्वादेवादर्शनं कथितम्।[१०] मल्लिनाथस्य मनसि सांख्यकारिकायाः कारिका स्याद् यत्र कदा समीचीनं प्रत्यक्षीकरणं न स्यादिति सिद्धान्तो दर्शित:।[११] एवमत्र मल्लिनाथस्यालङ्कारज्ञानं विशेषं स्पष्टं तथा च तस्य सूक्ष्मविलोकनमपि प्रशस्यम्।

---

[९] अथ च भवेदक्षिगतो द्वेष्य:॥ इति वल्लभदेवः।।
शिशुपालवधम् (९-८१); सैव श्रीनगरस्यावृत्ति: पृ. ११२

[१०] अतिसामीप्यव्यवधानस्यापि दर्शनप्रतिबन्धकत्वादिति भाव:॥ -इति महिनाथ:।।
शिशुघालवधम् (९-८१); निर्णयसागरप्रेस; पृ. २३५

[११] अतिदुरात्सामीप्यादिन्द्रियघातान्मनोऽवस्थानाच्च।
सौक्ष्याद् व्यवधानादभिभवात् समानाभिहारात्।।
सांख्यकारिका (०७); सं. श्री ज्वालाप्रसाद गौड, प्रका० चौखम्बा सुरभारती प्रकाशन; वासणसी: ई. १९८४: पृ. १४.

**अपयाति सरोषया निरस्ते कृतकं कामिनि चुक्षुवे मृगाक्ष्या।**
**कलयन्नपि सव्यथोऽवतस्थेऽशकुनेन स्खलितः किलेतरोऽपि।।(९-८३)**

नवमसर्गे महाकविना माघेन युवकयुवतीनां प्रणयचेष्टावर्णनं कृतम्। अस्मिन् पद्येऽपि तथाविधमेव वर्णनं वर्तते।

यथा यदा कश्चित् कामी मृगनयनया तिरस्कृतस्तदा स गन्तुमारभत तस्मिन्नेव क्षणे नायिकया क्षुतं कृतम्, छिक्का गृहीता एतच्चापशकुनं मत्वा कामी सश्रम इति स्थित:।

पद्यस्यास्यार्थचिन्तने वल्लभदेवमल्लिनाथयो: स्वल्पा दृष्टिसृष्टिर्भिन्ना दृश्यते। यथात्र प्रसङ्गानुसारं शृङ्गाररसाभिव्यक्तिर्दृश्यते, अपरञ्चात्रापशकुनेन सामाजिक्यन्धश्रद्धापि दृश्यते। यथा समाजे श्रद्धाया: स्थानं तथैव समाजेऽन्धश्रद्धाया अपि काकतालीयन्यायेन स्थानं वर्तते। ब्रह्मदेव: कथयति यथा समाजेऽपि विलोक्यते यद् यदाऽपशकुनं भवति तदा कश्चिज्जनो गच्छति, परं स्वल्पकालं तिष्ठति तथैवायमपि स्थित:।[१२] काव्यद्वारा समाजव्यवहारज्ञानं प्राप्यते, तदेव तत्प्रयोजनानुरूपं कथ्यते।

श्लोकस्यास्य पठनं कृत्वा तस्य तात्पर्यं समीचीनं न ज्ञायते, परं मल्लिनाथेन नायकनायिकयो: कृत्रिमव्यवहारं विलोक्य स्पष्टता कृता यथा द्वावपि समानस्नेहौ वर्तेते।[१३] अनेनास्या नायिकाया व्यवहारेणेयं कलहान्तरिता नायिकेति स्पष्टता विहिता।

पूर्वविवेचनेन ज्ञातुं शक्यते यत् वल्लभदेव: काव्यविवेचने समाजिकीं दृष्टिं रक्षति, मल्लिनाथो विवेचनावसरे साहित्यदृष्टिं पुष्णातीति भावः।

**सदृश: सरसव्यलीकतप्तस्तरसाऽऽश्लिष्टवत: सयौवनोष्मा।**
**कथमप्यभवत्स्मराऽनलोष्णः कुचभारो न नखम्पचः प्रियस्य।।(९-८५)**

महाकविना माघेन शिशुपालवधस्य नवमसर्गे युवकयुवतीनां परस्परानुरागवर्णनं कृतम्। अस्मिन्पद्येऽपि तादृशमेव वर्णनं वर्तते।

---

[१२] यथा कश्चिदपशकुनेन स्खलितः सन् तिष्ठति॥ - इति वल्लभदेव:।।
शिशुपालवधम् (९-८३): सैव श्रीनगरस्यावृत्तिः पृ. ११३

[१३] उभावपि समानाऽनुरागाविति भावः॥ - इति मल्लिनाथ:॥
शिशुपालवधम् (९-८३); निर्णयसागरप्रेस; १, २३६.

यथा - सुलोचनायाः नूतनापराधतप्तो यौवनतापतप्तः कामाग्निना संतप्तोऽपि स्तनप्रदेशोऽगम्यरीत्याऽऽश्लिष्टवतः प्रियस्य नखानां दाहको नाभूदिति भावः।

अत्र वल्लभदेवेन पद्यस्यार्थः सरलतया यथा भवति तथा दर्शितः। मल्लिनाथेनात्र यदा सन्तप्ताऽपि प्रियतमासीत् तदाऽपि प्रियतमस्योपरि न कश्चित् प्रभावो जातः।[१४] तत्र मल्लिनाथेन प्रणयस्य महत्त्वं स्पष्टीकृतम्। यथा विक्रमौर्वशीये कविकुलगुरुणा कालिदासेन लिखितं यत् तप्तेनायसा तप्तमयः, योगं प्राप्नोति।[१५] अत्रापि समानसन्तापौ द्वावपि प्रणयकर्तारौ स्तः, तस्मान्न सन्तापानुभूतिः। सन्तप्तः कामी प्रियां मिलति वा सन्तप्ता कामिनी प्रियं मिलति तदा द्वयोरपि सन्तापः शान्तिं गच्छति।

अत्र वल्लभदेवस्य विवेचने न किमपि वैशिष्ट्यं प्रतीयते। परं मल्लिनाथेनात्र प्रणयज्वरसन्तप्तयोर्जनयोः संयोगः समीचीनपद्धत्या दर्शितः।

एवमत्र प्रणयविभावना वल्लभदेवात् मल्लिनाथस्य समीचीना भाति।

❋❋❋

---

[१४] प्रियासङ्गप्रतीकाराः खलु कामिनां सन्तापा इति भावः।। - इति मल्लिनाथः।।
शिशुपालवधम् (९-८५); निर्णयसागरप्रेस; पृ. २३६.।

[१५] तप्तेन तप्तमयसा घटनाय योग्यम्॥ - इति कालिदासः।।
कालिदासग्रन्थावली (विक्रमोर्वशीयम् २-१५); पृ. ३६२.

## सर्गः-१०

## मद्यपानसुरतक्रीडावर्णनम्

शिशुपालवधमहाकाव्यस्य पूर्वार्धसमाप्तौ अर्थात् दशमसर्गे कविना माघेन मद्यपानवर्णनं कृतम्। तत्र नरनारीणां संभोगशृङ्गारवर्णनं मुक्तमनसा विहितम्।

अत्र वल्लभदेवमल्लिनाथयोर्विवेचनं विलोक्यते तदेदं दृष्टिपथमायाति। यथा-प्रथमश्लोकस्यैव विवेचनसारो विलोक्यते तदा वल्लभदेवेन सर्गादौ वृत्तपरिचयो न दत्त:। श्लेषालङ्कारस्यापि न तथा स्पष्टता कृता, यथा मल्लिनाथेन कृता क्वचिद्विशिष्टप्रयोगस्यापि चर्चा मल्लिनाथेन कृता।[1] अलङ्कारचर्चा मल्लिनाथस्य प्रशंसार्हा वर्तते। यथाप्रसङ्गं मल्लिनाथेन भारविकवेरपि स्मृति:क्रियते। वल्लभदेवस्य विवेचने व्याकरणविरुद्धा अपि प्रयोगा दृश्यते।[2] व्यावहारिकार्थघटनं वल्लभदेवस्य विशिष्टम्। तात्पर्यकथने मल्लिनाथस्य प्रावीण्यं दृश्यते। वल्लभदेवस्य भावार्थकथनं सरलं व्यावहारिकञ्च प्रतिभाति।

निष्कर्षरूपेण यदि लिख्यते तदा वल्लभदेवस्य लेखनेऽर्थस्तु स्पष्टो जायत एव परं वृत्तालङ्काररसादीनां विशिष्टा चर्चा यथा प्रथमसर्गे पुष्टा न तथाऽत्र पुष्टा। मल्लिनाथस्यार्थघटनं समीचीनं वर्तते, तत्र च वृत्तालङ्काररसादिकाव्यतत्त्वानां चर्चाऽपि समीचीना, शास्त्रसङ्गता, पुष्टा च दृश्यते।

अत्रेदमपि स्मरणीयं यद् -वल्लभदेवेन यदर्थचिन्तनं विशिष्टं विधीयते, तस्यैव विस्तरो मल्लिनाथेन विशिष्टविवेचनपरिपाटीमाश्रित्य क्रियते। अन्यच्च प्राचीनत्वाद् यदर्थचिन्तनं भवति तस्य बीजन्तु वल्लभदेवस्यैव व्याख्यायामुप्तं तदेव मल्लिनाथस्य टीकायां फलितम्।

**सज्जितानि सुरभीण्यथ यूनामुल्लसन्नयनवारिरुहाणि।**
**आययुः सुघटितानि सुरायाः पात्रतां प्रियतमावदनानि॥(१०-१)**

महाकविना माघेन दशमसर्गस्यारम्भो मद्यपानप्रसङ्गेन कृतः। अत्र पद्ये कविना प्रियतमा मुखान्येव मद्यपानपात्रतां गतानीति वर्णयता लिख्यते।

---

[1] विशिष्टप्रयोगार्थं १९ पद्यं पश्यतु।
शिशुपालवधम् (१०-१९); निर्णयसागरप्रेस; पृ. २४३

[2] एतदर्थं ४९ पद्यं विलोकयताम्।
शिशुपालवधम् (१०-५९); चौखम्बा; पृ ३६१

यथा - अथ प्रसाधनादिभिः सज्जानि, प्रकृतिसंस्कारादिभिः सुवासितानि तेजोयुक्त -नयनयुतानि, स्वोष्ठलग्नप्रियतमावदनानि युवकानां कृते सुरापात्रस्थानं प्राप्तानि।

अत्र वल्लभदेवस्य सामान्यार्थसूचनं वर्तते, परं मल्लिनाथेनात्रार्थविवेचने श्लिष्टोपमां स्वीकृत्य यद्यपि परिणामालङ्कारो वर्तते,[३] तथाप्यत्र 'नयनवारिरुहाणि' एतस्य पदस्य नयनानि इव वारिरुहाणि तथा विग्रहं कृत्वा पानविशेषणं कृतं तथा च वारिरुहाणि इव नयनानि तथा वदनविशेषणं कृत्वा केवलं पदपरिवर्तनं कृत्वाऽर्थे कर्मधारयसमासमाश्रित्य चमत्कृतिर्दर्शिता। वल्लभदेवेनात्र सुरापानपात्रे पूर्वस्मिन् काले कमलानि स्थापयितव्यानीति नियम आसीदिति स्पष्टं कृत्वा मदिरापानपरिपाटी दर्शिता।

प्राय: समस्तेऽपि सर्गे समानमेव वृत्तं भवति। तस्मात्सर्गादौ वृत्तोल्लेख: करणीयो भवति स चोल्लेखो मल्लिनाथेन कृत: तल्लक्षणमपि दत्तम्। अस्मिन्सर्गे स्वागतावृत्तमिति।[४]

**सोपचारमुपशान्तविचारं सानुतर्षमनुतर्षपदेन।**
**ते मुहूर्तमथ मूर्तमपीप्यन् प्रेम मानमवधूय वधूस्ता:।।(१०-२)**

शिशुपालवधस्य दशमे सर्गे मद्यपानप्रसङ्गस्य वर्णनं महाकविना माघेन कृतम्। अथार्थविचार: क्रियते। ततस्ते युवका: स्वां प्रियतमां मानं त्यक्त्वा सादरवचनैः निशङ्कं निरन्तरमभिलाषया सह यथा स्यात् तथा मदिरापानव्याजेन स्वल्पकालपर्यन्तं मूर्तं प्रणयमेव पाययन्ति स्म।

अस्य पद्यस्य वल्लभदेवमल्लिनाथयोर्विवेचनविचारो विधीयते। सोपचारमिति पदस्य 'उपचारसहितम्' तथा लिखितमनेन, अत्र उपचारशब्दस्यार्थो न जात: परं मल्लिनाथेन सोपचारं नाम सप्रार्थनमिति प्रणये प्रियामनुकूलां

---

[३] विषयात्मतयारोप्ये प्रकृतार्थोपयोगिनि।
परिणामो भवेत्तुल्यातुल्याधिकरणो द्विधा।।
साहित्यदर्पण: (१०-३४); पृ. ७२६.
उदाहरणम् - वने चराणां वनितासखानां दरीगृहोत्सङ्गनिषक्तभास:।
भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपः।।

[४] स्वागतेति नभा गुरुयुग्मम्॥ - इति मल्लिनाथः॥
शिशुपालवधम् (१०-१); निर्णयसागरप्रेस; पृ. २३८.

कर्तुमुपचारस्तु प्रार्थना भवेत्, तस्मादत्रोपचारस्य प्रार्थनेत्यर्थो दर्शित:। अन्यच्च 'उपशान्त- विचारम्' पदस्यार्थकथने विचारस्यार्थो वल्लभदेवेन विवेक इति कृत:, मल्लिनाथेन उपशान्तविचारं नाम निवृत्तशङ्कं विलिख्य विचारस्यार्थ: "शङ्का" कृतः। अत्र यदि सूक्ष्मविचारः क्रियते तदा वल्लभदेवस्यार्थे चारित्र्याभावो दृश्यते। कामिनो विवेकशून्या निर्भया भवन्ति, तस्मादत्रोभयमप्यर्थघटनं योग्यमेव।

मल्लिनाथेन 'वधूस्ता:' इत्यत्र 'वधूः' स्वाः पाठः स्वीकृतः[५] 'ते' इति युवकानां विशेषणं तस्माद् 'वधू:' पदस्य 'ता:' विशेषणं योग्यमन्यच्च विवेकभ्रष्टानां मधुपानां का स्वीया का परकीया वा। तस्मादत्र वल्लभदेवपाठ उचितो दृश्यते।

**छादितः कथमपि त्रपयाऽन्तर्यः प्रियं प्रति चिराय रमण्या:।**
**वारुणीमदविशङ्कमथाऽऽविश्चक्षुषोऽभवदसाविव रागः॥(१०–१९)**

दशमसर्गेऽस्मिन् महाकविना माघेन मद्यपानवर्णनं कृतम्। पद्येऽस्मिन् मद्यपानमत्तानां प्रमदानां प्रणयः प्रकटीभूत इति वर्णनं वर्तते।

यथा - नायिकाया नायकं प्रति योऽनुरागो लज्जया चिरं महता कष्टेन संवृत्त: स मद्यपानेन निर्भयं नेत्रद्वारा प्रकटीभूतः।

अत्र 'आविस्' अव्ययस्य प्रयोगः कविना कृत:। सामान्यरूपेण काव्याभ्यासेनावगतं यद् 'आविस्' अव्ययस्य प्रयोग: 'अस्–भू–कृ' धातुष्वादौ व्यवधानं विना भवति एतदव्ययं प्राकट्यार्थं सूचयति। एतस्याव्ययस्यादावेव व्यवधानं विना भवतीति कानिचिदुदाहरणानि विलोक्यन्ते। मातङ्गलीलायाम्, आचार्यकं विजयि मान्मथमाविरासीत्,[६] एवं विलिख्य 'आविस्' अव्ययम् 'अस्' धातुना सह प्रयोग: कृत:, ततश्च अभिज्ञानशाकुन्तले 'आविष्कृतारुणपुरस्सर

---

[५] वधूः स्वा:।। इति मल्लिनाथस्य टीकायां पाठभेद:॥
शिशुपालवधम् (१०-२); निर्णयसागरप्रेस; पृ. २३८.

[६] आचार्यकं विजयि मान्मथमाविरासीत्।
**संस्कृत-हिन्दी-कोश** (मातंगलीला), पृ. १६

एकतोऽर्क:'[७] अत्र 'कृ' धातुना सहास्याव्ययस्य प्रयोग: कृत:। ततश्च कुमारसम्भवे महाकविना कालिदासेन 'तेषामाविरभूद् ब्रह्मा' तथा लिखितम्।[८]

एभिः पूर्वलिखितोदाहरणैः 'आविस्' इति अव्ययस्य प्रयोग: 'भू-कृ- अस्' आदिभि: विगतव्यवधानो भवतीति ज्ञातुं शक्यते।

अत्र पद्ये महाकविना माघेन 'आविश्चक्षुषोऽभवदिति' लिखितं यत्र आविरभवदित्य- पेक्षितमासीत्।

पाठकानामेतादृशानां पदानां प्रयोगा: कथं कर्तव्या एतज्ज्ञापयितुं विवेचनमपेक्षितं भवति। वल्लभदेवेनैतादृशानां प्रयोगानां विषये न किमपि विवचनं विधीयते, परं मल्लिनाथेनात्र लिखितं यत् प्राय एतादृशा: प्रयोगा: न दृश्यन्ते तथापि कविना लिखितं कारणं वृत्तरचनायां कवेस्वातन्त्र्यमेव। एवं यत्र स्वल्पमप्यसामान्यं विलोक्यते तत्र मल्लिनाथेन निर्देशस्तु क्रियत एव परं तस्य कारणमपि दीयते। मल्लिनाथस्येयं स्पष्टता तस्य कर्म प्रति विशिष्टं जागृतिं विशिष्टां ज्ञानं विशिष्टां दृष्टिं च दर्शयति।

**अर्पितं रसितवत्यपि नामग्राहमन्ययुवतेर्दयितेन।**
**उज्झति स्म मदमप्यपिबन्ती वीक्ष्य मद्यमितराऽथ ममाद।।(१०–२७)**

दशमसर्गे महाकविना माघेन मद्यपानसुरतव्यापारादिवर्णनं कृतम्। पद्येऽस्मिन् मद्यपानप्रसङ्गं वर्णयता लिखितम्।

यथा - प्रियतमेनान्यस्त्रीनाम्नाऽऽहूता ततश्चार्पितमद्या काचिन्नायिका मदमत्ता न जाता। अन्या च नायिका मद्यं न पीतवती तथापि मद्यं विलोक्यैव मत्ता बभूव।

अत्र पद्यस्य पूर्वार्धे यस्या नायिकाया वर्णनं वर्तते तया मद्यं पीतं तथापि मदोन्मत्ता न जाता नाम तत्र मदस्य कारणं मद्यं वर्तते तथाऽपि मदाभावो दृश्यते नाम कारणे सत्यपि कार्योत्पत्तिर्न दृश्यते।

---

७ यात्येकतोऽस्तशिखरं पतिरोधीनामाविष्कृतोऽरुणपुर:सर एकतोऽर्क:।
तेजो द्वयस्य युगपद् व्यसनोदयाभ्यां लोको नियम्यत इवात्मदशान्तरेषु।।
कालिदासग्रन्थावली (अ. शाकुन्तलम् -४-२) पृ. ४८०

८ तेषामाविरभूद ब्रह्मा परिम्लानमुखश्रियाम्।
सरसां सुप्तपद्मानां प्रातर्दीधितिमानिव।।
कालिदासग्रन्थावली (कुमारसंभवम् २-२), पृ.१२.

उत्तरार्धे सपत्न्या मद्यपानं न कृतं तथापि मत्ता जाता। अत्र मदस्य कारणं मद्यं नास्ति तथापि मदोत्पत्तिरूपं कार्यं दृश्यते। कारणभावेऽपि कार्योत्पत्तिर्विलोक्यते।

पूर्वार्धोत्तरार्धयोर्मध्ये कार्यकारणभावसाम्यं वर्तते। परमेकत्र कारणे सत्यपि कार्याभावोऽन्यत्र कारणेऽविद्यमाने सत्यपि कार्योत्पत्तिर्दृश्यते तादृशो विरोधोऽपि विद्यमानो वर्तते।

अलङ्कारशास्त्रे यत्र कारणे सत्यपि कार्योत्पत्तिर्न भवति तत्र विशेषोक्त्यलङ्कारो भवति। तथा च यत्र कारणं विना कार्योत्पत्तिर्भवति तत्र विभावनाऽलङ्कारो भवति। द्वावप्येतावलङ्कारौ कार्यकारणभावसंलग्नौ स्तः। एकस्यालङ्कारस्य कृते पद्यमेकं लेख्यं भवति परमत्रैकेन पद्येन कार्यद्वयं भवितुमर्हति। अनेन प्रकारेणेदं काव्यं विशेषं स्थानं प्राप्नोति। साधर्म्यवैधर्म्यकारणादपि पद्यस्यास्यालङ्कारादिदं काव्यमुत्तमम्।

तादृशं महत्त्वपूर्णमिदं पद्यं तस्मादेतदलङ्कारविवेचनमपेक्षते। परमत्र वल्लभदेवेनालङ्कारविषये न किमप्युक्तं यद्यपि तेन कतिपयमहत्त्वपूर्णपद्येष्वप्यलङ्कारचर्चा कृता। मल्लिनाथेनात्र लक्षणं विलिख्य 'रसितवत्यपि न ममादेति' कारणे सत्यपि कार्याभाव:, ततश्च 'अपिवत्यपि ममादेति' कारणाभावेऽपि कार्यमिति क्रमश: विशेषोक्तविभावनयो: सङ्कर इति स्पष्टं विहितम्।[१]

**चारुता वपुरभूषयदासां तामनूननवयौवनयोगः।**
**तं पुनर्मकरकेतनलक्ष्मीस्तां मदो दयितसङ्गमभूषः।।(१०-३३)**

---

[१] कारणेन विना कार्यस्योत्पत्ति: स्याद्विभावना।
तत्सामग्रयामनुत्पत्तिर्विशेषोक्तिर्निगद्यते। इति मल्लिनाथ:।
शिशुपालवधम् (१०-२७); निर्णयसागरप्रेस; पृ. २४५.
प्रसिद्धकारणकलापसामानाधिकरण्येन वर्ण्यमाना कार्यानुत्पत्तिर्विशेषोक्तिः।
इति जगन्नाथः॥ रसगङ्गाधरः पृ. ८०६.
सति हेतौ फलाभावो विशेषोक्तिस्तथा॥ - इति विश्वनाथः।। साहित्यदर्पण: (१०-३५); पृ. ८१५.
विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते ।।
उक्तानुक्तनिमित्तत्वाद् द्विधा सा परिकीर्तिता। - इति विश्वनाथः।।
साहित्यदर्पण: (१०-६६): पृ. ८१४.
कारणव्यतिरेकसामानाधिकरण्येन प्रतिपद्यमानकार्योत्पत्तिर्विभावना।
पं.जगन्नाथः। रसगङ्गाधरः पृ. ७८९.

दशमसर्गेऽस्मिन् महाकविना माघेन मद्यपानवर्णनं कृतम्। तत्र तत्प्रसङ्गमाश्रित्य शृङ्गारवर्णनं विहितम्।

अत्र स्त्रीणां सौन्दर्यवर्णनं तत्र च मदप्रभावः कवेर्वर्णनविषयो वर्तते। यथा आसां स्त्रीणां देहान् सौन्दर्यमभूषयत्, तत्सौन्दर्यञ्चोत्कृष्टयौवनमभूषयत्, तद्यौवनञ्च कामसंपदभूषयत्, ताञ्च कामलक्ष्मीं प्रियसङ्गभूषणभूषितो मदोऽभूषयत्।

सामान्यरूपेणास्य पद्यस्य विवेचने न किमपि वैमत्यमुभयोरपि विवेचकयोस्तथापि वल्लभदेवस्य विवेचनान्मल्लिनाथस्य विवेचने स्वल्पं वैशिष्ट्यं दृश्यते, तच्चैतद् यत् - संस्कृतपरम्परया महाकविर्माघो भारवेः प्रतिस्पर्धिरूपेण स्वीकृतः, अतो यत्र तत्र तयोः काव्यलेखने किञ्चित्साम्यं भवेदेव।

अस्मिन्पद्ये 'एकावल्यलङ्कारः' वर्तते, यस्य विवेचनं कुर्वता मल्लिनाथेन भारवेः पद्यमपि स्मृतम्।[१०] मल्लिनाथेन यथावसरं भारविपद्यानि स्मर्यन्ते तस्मादेतदपि स्पष्टं यत् तस्य मानसे विवेचनावसरे किरातार्जुनीयमपि वर्तते।

**स्नेहनिर्भरमधत्त वधूनामार्द्रतां वपुरसंशयमन्तः।**
**यूनि गाढपरिरम्भिणि वस्त्रक्नोपमम्बु ववृषे यदनेन॥(१०-४९)**

कविना माघेनात्र शिशुपालवधस्य दशमसर्गे मद्यपानप्रसङ्गस्य वर्णनं कृतम्।

अत्र कविना वर्णितम्। यथा - मुग्धाङ्गनानां स्नेहपूर्णास्तनवोऽन्तःस्निग्धा आसन्, तत्र न कश्चित् शङ्कावकाशः, यतो हि युवकैर्यदा गाढालिङ्गनं कृतं तदा वस्त्रं यथा सजलं भवेत् तथा स्वेदजलमवहत्।

अत्र वल्लभदेवस्य विवेचने 'वस्त्रक्नोपम्' ज्ञापयितुं तेन 'वस्त्रं क्नोप्य' इति लिखितम्। 'क्नोप्य' इत्यत्र 'क्नूयीधातोः' सम्बन्धकभूतकृदन्तस्य प्रयोगं कृत्वा

---

[१०] यत्रोत्तररोत्तरेषां स्यात्पूर्वं प्रति क्रमात्।
विशेषणत्वकथनमसावेकावली मता॥ - इति मल्लिनाथः॥
शिशुपालवधम् (१०-३३) निर्णयसागरप्रेस: पृ.२४७
शुचिं भूषयति श्रुतं वपु: प्रशमस्तस्य भवत्यलंक्रिया।
प्रसमाभरणं पराक्रम: स नयापादितसिद्धिभूषण:॥ किरातार्जुनीयम् (२-३२) पृ. ४२

'ल्यब्भावो' दर्शितः। नियमानुसारेण सोपसर्गाणामेव धातूनां प्रयोगे ल्यब् भावो भवति।[११]

**ह्रीभरादवनतं परिरम्भे रागवानवटुजेष्ववकृष्य।**
**अर्पितोष्टदलमाननपद्मं योषितो मुकुलिताऽक्षमधासीत्।।(१०-५२)**

महाकविमाधविरचितशिशुपालवधमहाकाव्ये दशमसर्गे मद्यपानवर्णनं विलासवर्णनञ्च वर्तते। पद्येऽस्मिन् युवकस्याधरपानवर्णनं वर्तते।

यथा - केनचिद् युवकेन ययाऽधरपल्लवदानं कृतं तस्या नायिकाया मुखारविन्दं केशेष्वाकृष्य निमीलिताक्षं पीतम्।

अत्राधरपानवर्णनं वर्तते। वल्लभदेवेनात्र पद्यार्थ एव लिखित:, परं मल्लिनाथेनात्र नायकस्य मधुपत्वमपि दर्शितम्।[१२] मधुपत्वस्यार्थद्वयं कर्तुं शक्यते। यथा यदि वयं मद्यपानप्रसङ्गमाश्रित्यार्थं कुर्मस्तदा मद्यपानमपि निमीलिताक्षमेव भवति तस्मान्नायको मधुपतुल्य:। मधुपत्वं नाम भ्रमरवृत्तित्वं भवितुमर्हति। शृङ्गाररसवर्णनत्वादत्र सोऽप्यर्थो भवितुं गच्छति। एतस्यार्थो नायकोऽनेकासु नायिकासु स्निह्यति, एकस्या अधरपानं कृत्वाऽन्स्या अधरपानं करोति। यथा शाकुन्तले हंसपदिकागीतेन दुष्यन्तस्य मधुपत्वं गम्यते, तथैवात्र नायकस्य मधुपत्वं गम्यते।[१३]

मल्लिनाथेन यदा श्लोकस्यार्थविवेचनं क्रियते तदा नायकनायिकानां वर्णनेन तेषां व्यवहारज्ञानं कृत्वा ततस्तेषां स्वभावचिन्तनं कृत्वा सामाजिकव्यवहारदर्शनं कृत्वार्थघटनं क्रियते।

---

[११] समासेऽनपूर्वेक्त्वो ल्यप्। ७।१।३७ । अव्ययपूर्वपदेऽनञ्समासे क्त्वो ल्यबादेशः स्यात्। तुक् प्रकृत्यः।
अनञ् किम्-अकृत्वा। **लघुसिद्धान्तकौमुदी** पृ. ७९८.
कु-गति-प्रादयः। २।१।१८ । एते समर्थेन नित्यं समस्यन्ते। **लघुसिद्धान्तकौमुदी** पृ. ८४८.
उपसर्गाः क्रियायोगे । २।४।५९ । प्रादयः क्रियायोगे उपसर्ग संज्ञा: स्यु।
प्र-परा-अप-सम्-अनु-अव-निस्-निर-दुस्-दुर्-वि-आङ्-नि-अधि- अपि-अति-सु-उद्-अभि-प्रति-परि-उप-एते प्रादय:। **लघुसिद्धान्तकौमुदी** पृ. ४७.

[१२] अत्राननोष्ठस्य पद्मदलत्वरूपणात्तत्रानुरागिणो मधुपत्वं च गम्यत इत्येकदेशविवर्ति रूपकम्॥ - इति मल्लिनाथः ।। शिशुपालवधम् (१०-५२); निर्णयसागरप्रेस; पृ. २५२

[१३] अभिनवमधुलोभभावितस्तथा परिचुम्ब्य चूतमञ्जरीम्।
कमलवसतिमात्रनिर्वृतो मधुकर ! विस्मृतोऽस्येनां कथम्॥
**कालिदासग्रन्थावली** (शाकुन्तलम् ५-१); पृ. ४९६.

**अम्बरं विनयतः प्रियपाणेर्योषितश्च करयोः कलहस्य।**
**वारणामिव विधातुमभीक्ष्णं कक्षया च वलयैश्च शिशिञ्जे।।(१०-६२)**

माघकाव्यस्य दशमसर्गेऽत्र युवकयुवतिमदनास्वादवर्णनं वर्तते।

यथाऽत्र - अम्बरमपसारयतः प्रियतमस्य करस्य नायिकायाश्च रोधकयो: करयोर्मध्ये कलहं दूरीकर्तुमिव कक्षया कङ्कणैश्च शब्दः कृतः।

वल्लभदेवेनान पद्यानुसारमेवार्थनिर्देशः कृतः, तस्मादधिकं मल्लिनाथेनात्र समाजेऽस्य पद्यास्यार्थधटनमपि कृतम्। श्लोकेऽस्मिन् नायकनायिकयोर्मध्ये वस्त्रार्थमेव कलहो भवति, तत्रालङ्काराणां शब्दो भवति, स शब्दो निवारयतीव दृश्यते।[१४] अत्र तेन मल्लिनाथेन लिखितं समाजेऽपि यदा द्वयोर्मध्ये कलहो भवति तदा तत्रान्ये शब्दं कृत्वा निवारयन्ति। अनेनात्र कलहस्य चित्रमेव प्रदत्तम्। काव्यस्य कतिपयप्रयोजनेष्वेकं व्यवहारदर्शनमपि वर्तते, अत एव काव्यं समाजस्य दर्पण: कथ्यते।

अन्यत्र वल्लभदेवेनापि समाजे यथा भवति तथार्थघटनं विधीयते, परमत्रैव तस्यौदासीन्यं दृश्यते। मल्लिनाथेन प्रायः ध्वन्यर्थ एव रुचिर्विधीयते, परमत्र तद्विरुद्धं समाजानुरूपमर्थघटनं कृतमिति वैशिष्ट्यम्।

**पाणिरोधमविरोधितवाञ्छं भर्त्सनाश्च मधुरस्मितगर्भाः।**
**कामिनः स्म कुरुते करभोरूर्हारि शुष्करुदितं च सुखेऽपि।।(१०=६९)**

दशमसर्गे मद्यपानप्रसङ्गस्य तथा च तज्जन्यमदस्य वर्णने, युवकयुवतीनाञ्च प्रणयवर्णनं वर्तते। पद्येऽस्मिन्नपि नायिकाया: प्रणयलीला दर्शिता।

यथा करभोरू: सकामं नायकं प्रत्यभिलाषाविरोधो न भवेत् तथा हस्तव्यापारेण निषेधभावो दर्शितवती, मधुरस्मितमिश्रितोपालम्भं दत्तवती तथा चाश्रुरहितं रोदनं कृतवती।

पूर्वलिखितपद्ये स्त्रीस्वभावो दर्शितः। तासां कीदृशं चातुर्यं भवतीति दर्शितम्। विशेषतस्तु शृङ्गाररसे तासां चातुरी नितान्तं श्लाघ्या भवति।

---

[१४] द्वयोः कलहायमानयोः पार्श्वस्था: साक्रोशं निवारयन्तीति भाव:।।-इति मल्लिनाथ:॥ शिशुपालवधम् (१०–६२): निर्णयसागरप्रेस, पृ. २५४

एतस्मादेव महाकविना कालिदासेनापि 'अभिज्ञानशाकुन्तले' स्त्रीचरितं दर्शितम्, तेन परभृतोदाहरणेनेदं स्पष्टं विहितम्।[१५]

केनचित् कविना त्विदं लिखितं यत् स्त्रीचरितं देवेनापि ज्ञातुं न शक्यते तर्हिमानवानान्तु का कथा[१६] ? तस्मादेव स्त्रीचरितस्य तद्भावनाञ्चाभ्यासोऽनिवार्यो जातः। माधेनास्मिन् पद्ये स्त्रीभाववर्णनं कृतम्। वल्लभदेवेनात्रार्थलेखनातिरिक्तं न किमपि विशेषमुक्तम्, परं मल्लिनाथेनात्रानुभावचिन्तनं कृतम्। एतदर्थमलङ्कारग्रन्थेषु भावचिन्तनं वर्तते। मल्लिनाथेन लिख्यते यत् स्त्रीणामयं स्वभावो यथा ताः सुखमपि दुःखानुभवपूर्वकमनुभवन्ति विशेषतस्तु रतिप्रसङ्गे स्त्रीणामेतादृशं वर्तनं दृश्यते। सुखस्यानुभवेऽपि दुःखानुभव इव निवारणं ततश्चोपभोगो भवति तदा स कुट्टमिताख्योऽनुभावः कथ्यते। मल्लिनाथेनात्र लक्षणपूर्वकं विवेचनं कृतम्।[१७]

अस्मिन् पद्ये शृङ्गाररसो मुख्यो वर्तते। तञ्च रसं स्त्रीणामिमे भावाः पुष्टिं नयन्ति। एतद्विवेचनं मल्लिनाथस्य प्रसङ्गानुरूपं रसभावचिन्तनं तथा च साहित्यशास्त्रज्ञानं प्रौढं तथा सिद्धं विदधाति।

**प्रेक्षणीयकमिव क्षणमासन् ह्रीतभङ्गुरविलोचनपाताः।**
**सम्भ्रमद्रुतगृहीतदुकूलच्छाद्यमानवपुषः सुरताऽन्ताः॥(१०-८२)**

दशमसर्गेऽस्मिन् युवकयुवतीनां शृङ्गाररतिवर्णनं कविना माघेन कृतम्, पद्येऽस्मिन्नपि संयोगशृङ्गारवर्णनं वर्तते।

यथा - येषु लज्जासम्पन्नवक्रा दृष्टिपाताः सन्ति तादृशाः, पुनः कीदृशास्तर्हि व्याकुलतयाऽचिरादेव शरीराण्याच्छादयितुं क्षोमं गृहीतं तादृशाः सुरतान्ताः प्रेक्षणीयतुल्या आसन्।

---

[१५] स्त्रीणामशिक्षितपटुत्वममानुषीणां संदृश्यते किमुत याः परिबोधवत्यः।
प्रागन्तरीक्षगमनात् स्वमपत्यजातमन्यद्विजैः परभृताः किल पोषयन्ति ॥
**कालिदासग्रन्थावलि** (शाकुन्तलम् ५-२२); पृ. ५०६.

[१६] भूपस्य चित्तं कृपणस्य वित्तम् मनोरथं मानुषदुर्जनस्य।
स्त्रियश्चरित्रं पुरुषस्य भाग्यं देवो न जानाति कुतः मनुष्यः॥ ( कस्यचित्)

[१७] अत्र सुखेऽपि दुःखवदुपचारात्कुट्टमिताख्योऽनुभावो द्रष्टव्यः।
केशाधरादिग्रहणे मोदमानेऽपि मानसे।
दुःखितेव बहिः कुप्येद्यत्र कुट्टमितं हि तत्॥ इति लक्षणात् ॥-इति मल्लिनाथः॥
**शिशुपालवधम्** (१०-६९); निर्णयसागरप्रेसः पृ. २५६.

अत्र सुरतावसानतुलना प्रेक्षणीयेन सह कृता तस्मादत्रोपमालङ्कार:।[१८] वल्लभदेवमल्लिनाथयो: विवेचनेऽर्थघटनं स्वल्पं परिवर्तनपूरितमास्ते। वल्लभदेवेनात्र प्रेक्षणीयस्यार्थो 'नाटकमिति' कृत:, परं मल्लिनाथेन प्रेक्षणीयस्यार्थो 'दृश्यमिति' कृतः। अनेन वल्लभदेवस्यार्थचिन्तनं क्रियते तदेत्थं प्रतिभाति यथा नाटकस्यान्तोऽकल्पनीयो भवति तथैवास्मिन्नपि सुरतकर्मणि तादृश एवान्तः स्यात्, अन्यच्च नाटके यथाऽन्ते जवनिकापातो भवति तथैवात्रापि वस्त्रै: शरीराच्छादनं भवति। अत्र 'उपमाया' अर्थघटनं कथं करणीयमिति चिन्त्यं वर्तते। नाटके सर्वमपि काल्पनिकं कृत्रिमञ्च भवति, तस्मादत्रापि स्त्रीणां व्यवहारा: केवलं दर्शनायैव स्युरित्यपि भवितुर्महति।

यथा कश्चिन्मिथ्या किञ्चित् करोति तदा वयं व्यवहारेऽपि 'अयं' नाटकं करोतीति' ब्रूमः। अतोऽत्रानेकानामर्थानां सम्भावना दृश्यते। यत्र तादृशं वस्तु भवति तत्र स्पष्टता करणीया भवति, अन्यथा पाठकानां कृतेऽर्थग्रहणे काठिन्यं जायते।

मल्लिनाथेनात्र प्रेक्षणीयस्यार्थः 'दृश्यम्' इति कृत:।[१९] यत्र वल्लभदेवेन 'नाटकम्' इत्यर्थो गृहीतस्तत्रानेनेत्थं विलिख्यार्थग्रहणे सारल्यं दर्शितम् अन्यच्चात्र यथा दृश्ये कश्चिदायाति कश्चिद् गच्छति तथा दृश्यते तथैवात्रापि सुरतव्यापारे कदाचित् स्त्रीणामङ्गानि दृश्यन्ते कदाचिच्च वस्त्राच्छादनत्वान्न दृश्यन्ते। एवमनेनाविर्भावतिरोभावसाम्याद् दृश्यतुलना कृता।

वल्लभदेवस्यार्थे विषयस्याल्पत्वं दशरूपकेभ्य एकस्य नाटकस्यैव ग्रहणात्, अर्थेऽनल्पत्वं यतो हि समस्तमपि नाटकं गृहीतम्। मल्लिनाथस्य विषये बहुत्वं कारणं तेन समेषामपि रूपकाणां ग्रहणं कृतम्।[२०] अर्थेऽल्पत्वं कारणं केवल दृश्यमेव गृहीतम्।

---

[१८] साधर्म्यमुपमा भेदे। **काव्यप्रकाशः** (१०-१); पृ. ३३५.

[१९] नाटकादिरूपकेष्वाहार्यं वस्तु तद् दृश्यं प्रेक्षणीयमिति चोच्यते। इहाविर्भावतिरोधानादिना तत्तुल्यत्वम् ।।-इति मल्लिनाथः।। **शिशुपालवधम्** (१०-८२); निर्णयसागरप्रेस, पृ. २६०.

[२०] रूपकभेदाः – नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः।
ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश।।
**साहित्यदर्पण:** (६-३); निर्णयसागरप्रेस; पृ. ३६१.

अनेन प्रकारेणात्र सामान्यरूपेणार्थपठनं क्रियते तदा न कश्चिन्महाभेदो विवेचने, परं यदि सूक्ष्मेक्षिकयाऽर्थावलोकनं विधीयते तदा मल्लिनाथस्यार्थो वल्लभदेवस्यार्थात् स्पष्टः प्रसङ्गानुरूपश्च दृश्यते।

अनेनेदमपि विलोक्यते यदलङ्कारानुरूपमर्थं विचिन्त्यार्थप्रतिपादनं मल्लिनाथस्य विशेषमस्ति।

☀☀☀

# सर्गः-११
# प्रभातवर्णनम्

महाकविना माघेन शिशुपालवधमहाकाव्यस्यैकादशसर्गे 'प्रभातवर्णनं' वितन्यते। कवेरस्य वर्णनशक्तेरिदमेवोत्तममुदाहरणं यत् प्रभातवर्णन एव समस्तोऽपि सर्ग: पूर्णतां नीतः। सप्तसप्तिसप्तितुल्यानां सप्तीनां गतिप्रावीण्यं प्राङ्गणे दर्शयितुमशक्यं तथैवास्यापि महाकवे- र्वर्णनपाण्डित्यं स्वल्पश्लोकैरेव न शक्यं तस्मादनेन वर्णन एव सर्गः पूर्णतां प्रापितः।

अस्य सर्गस्य यदि वल्लभदेवमल्लिनाथयोः टीकाविवेचनं विहङ्गावलोकनन्यायेन क्रियते[1] तर्हि तत्रोभावपि संगीतज्ञाननिपुणौ स्तः, तथापि वल्लभदेवेन प्रथमसर्गवदत्र विस्तारो न कृतः। वृत्तपरिचयोऽपि वल्लभदेवेनादौ न दत्तः। अस्य सर्गस्य तृतीयपद्यादवगम्यते यदनयोः टीकाकारयोर्मध्ये क्वचिदर्थभेदोऽपि दृश्यते। मल्लिनाथेन पुराणकथाभ्यासं कृत्वा विवेचनं क्रियते तदपि तस्मिन्नेव पद्ये स्पष्टम्। मल्लिनाथेन रसानुभूतिपूर्वकं विवेचनं क्रियते तदपि कतिपयपद्यै: सिद्धम्।

श्लिष्टार्थमुभावपि स्पष्टं कुरुतः, तत्रापि मल्लिनाथस्य विशेषचर्चा भवति, परं तस्यार्थस्य पूर्वचिन्तकत्वाद् वल्लभदेव एव यशोभाग् भवति। अलङ्कारचर्चा वल्लभदेवेन क्वचिदेव क्रियते, परं मल्लिनाथस्तु लक्षणोल्लेखं कृत्वाऽलङ्कारचर्चां मुक्तमनाः सन् विदधाति। यत्र वल्लभदेवन द्वितीयार्थस्य प्रयत्नं कृत्वाऽर्धमार्ग एव त्यक्तः, स एव श्लोको मल्लिनाथेन स्पष्टीकृतः।[2] अन्तिमपद्ये च वल्लभदेवस्यान्यार्थग्रहणचातुरी विलोक्यते, परं यत्र नानुकूलोऽर्थस्तत्र मल्लिनाथेनान्धानुकरणं न क्रियते तदपि स्पष्टमेव।

पूर्वकथितो विवेचनसारो वर्तते। इदानीं तदेवोदाहरणमुखेन विशदीक्रियते।

---

[1] विहङ्गावलोकनन्याय:- यदा कस्यचिदपि विषयस्योपरिभागादेव सामान्याभ्यासः क्रियते तदा विहङ्गावलोकनन्यायेन तस्याभ्यास: कृत इति कथ्यते कारणं पक्षिणोऽपि आकाश एव वर्तमानाः सन्तो भूमिनिरीक्षणं कुर्वन्ति ।।

[2] एतदर्थं ६२ पद्यं पश्यतु।

**शिशुपालवधम्** (१०-६२): चौखम्बा; पृ. ४०३

**श्रुतिसमधिकमुच्चैः पञ्चमं पीडयन्तः**
**सततमृषभहीनं भिन्नकीकृत्य षड्जम्।**
**प्रणिजगदुरकाकिश्रावकस्निग्धकण्ठा:**
**परिणतिमिति रात्रेर्मागधा माधवाय॥(११-१)**

महाकविना माघेन शिशुपालवधमहाकाव्ये एकादशे सर्गे प्रभातवर्णनं कृतं तत्तु पूर्वमेव कथितम्।

अत्र पद्ये स्तुतिपाठकैः रात्रिसमाप्तिसूचनस्तुतिः कृतेति भावः। अथार्थविचारो विधीयते। यथा-स्तुतिपाठकै: माधवं लक्ष्यीकृत्य स्तुतिरारब्धा। कीदृशीत्यपेक्षायामाह - श्रुतिसंख्यायामधिकं पञ्चमं स्वरं त्यजद्भि: स ततं वाद्यसहितर्षभस्वररहितं षड्जं भिन्नस्वरेणोच्चार्य दूरं गमयितुं सक्षमध्वनियुक्तं स्वरविकाररहितं मधुरं कण्ठं धारयद्भि: स्तुतिपाठकै: भगवन्तं श्रीकृष्णं लक्ष्यीकृत्य निशासमाप्तिसूचनाया उच्चै: स्तुति: प्रारब्धा।

अत्र प्रथमसर्ग: स्मर्यते, कारणं प्रथमसर्गस्य दशमे पद्ये नारदस्य वीणावादनप्रसङ्गे महाकविना सङ्गीतशास्त्रस्य विषयो वर्णने धृत:,[३] तथैवात्रापि प्रभातगानमाश्रित्य पुनरपि तस्यैव शास्त्रस्य चर्चा विधीयते।

तत्पद्यं स्पष्टं कर्तुं वल्लभदेवेनैकादशपद्यानि बहि:स्थानि विलिखितानि। परमत्र तादृश एव प्रसङ्गस्तथापि नैकमपि बहि:स्थं तच्छास्त्रसङ्गतं पद्यं विलिख्यार्थं स्पष्टं कर्तुं यत्नो विहितः।

मल्लिनाथेनापि प्रथमसर्गे दशमं पद्यं स्पष्टं कर्तुं सङ्गीतशास्त्रस्य चर्चां कुर्वता दशपद्यानि लिखितानि।[४] तेनात्रापि श्रुत्यादीनां चत्वारि पद्यानि विलिख्य स्पष्टता कृता।[५]

---

[३] रणद्भिराघट्टनया नभस्वत: पृथग्विभिन्नश्रुतिमण्डलैः स्वरैः।
स्फुटीभवद्ग्रामविशेषमूर्च्छनामवेक्षमाणं महतीं मुहुर्मुहुः॥
अस्य पद्यस्य वल्लभदेवकृता टीका विलोकनीया। **शिशुपालवधम्** (१-१०); पृ. ८.

[४] प्रथमसर्गस्य दशमपद्ये मल्लिनाथस्य टीका पठनीया।
**शिशुपालवधम्** (१-१०); निर्णयसागरप्रेस, पृ. ५

[५] प्रथमश्रवणाच्छब्दः श्रूयते ह्रस्वमात्रिकः।
सा श्रुति: संपरिज्ञेया स्वरावयवलक्षणा॥
चतुश्चतुश्चतुश्चैव षड्जमध्यमपञ्चमाः।
द्वे द्वे निषादगान्धारौ त्रीस्त्रीनृषभधैवतौ॥
प्रभाते सुतरां निन्द्य ऋषभः पञ्चमोऽपि च।

अनेनात्र मल्लिनाथस्योत्साहस्तथैव सुरक्षितो दृश्यते।

अन्यच्च सर्गे महाकाव्यलक्षणानुसारमेकमेव वृत्तं भवति, सर्गान्ते च भिन्नानि वृत्तानि भवन्ति। अत: सर्गस्यारम्भे प्रथमपद्यस्य वृत्तं लिख्यते, तदाऽन्यत्रापि वृत्तज्ञानं भवत्येतदर्थं टीकाकारा आदावेव वृत्तलक्षणं लिखन्ति।

वल्लभदेवेनात्र वृत्तपरिचयस्तु न दत्तः, परं नाम निर्देशोऽपि न कृत:। मल्लिनाथेनात्र वृत्तनाम विलिख्य लक्षणमपि लिखितम्। अस्मिन् सर्गे मालिनीवृत्तम् इति तस्य स्पष्टता पद्यगाने साहाय्यं करोति।[६]

**स्फुटतरमुपरिष्टादल्पमूर्तेर्ध्रुवस्य**
**स्फुरति सुरमुनीनां मण्डलं व्यस्तमेतत्।**
**शकटमिव महीयः शैशवे शार्ङ्गपाणे-**
**श्चपलचरणकाब्जप्रेरणोत्तुङ्गिताग्रम्॥(११-३)**

एकादशसर्गारम्भे चन्द्रमसोऽस्तगमनवर्णनं क्रियते। तद्वर्णनं कुर्वता कविना माघेनात्र पद्ये नभोमण्डलवर्णनं कृतम्।

यथा - व्यस्तं सप्तर्षीणामेतन्मण्डलमल्पमूर्तेः ध्रुवस्योपरि भागे विशेषं स्फुटं सद् राजते। कथमिति भगवता कृष्णेन बाल्यावस्थायां स्वल्पचरणेन धृत्वा दूरीकृतं बृहत्शकटमिव तत्तारामण्डलमासीत्।

पद्यस्यास्य वल्लभदेवमल्लिनाथयोर्विवेचनं पठ्यते तदा ज्ञायते यत् – वल्लभदेवेनाल्यमूर्तेरित्यस्यार्थ: 'दुर्लक्ष्यस्य ध्रुवस्य' तथा च 'सूक्ष्मतनो: श्रीकृष्णस्य' इति कृतः, तथा च व्यस्तमित्यत्र तारामण्डलस्यार्थे 'विस्तृतम्' शकटस्यार्थे परिवृत्तमित्यर्थग्रहणं कृत्वा विशेषणस्योभयपक्षेऽर्थघटनं कृत्वा समीचीनं विवेचनं कृतम्।[७] मल्लिनाथेन च 'चरणकाब्जस्य' इत्यत्र 'अल्प' इत्यल्पार्थे कन्प्रत्ययो

---

जनयेत्प्रधनं ह्युक्षा पञ्चत्वं पञ्चमोऽपि च।।
पञ्चमस्य विशेषोऽयं कथितः पूर्वसूरिभिः।
प्रगे प्रगीतो जनयेद् दशनस्य विपर्ययम्॥ - इति मल्लिनाथः।।
**शिशुपालवधम्** (११-१); निर्णयसागरप्रेस; पृ. २६३

६ न न मयययुतेयं मालिनी भोगिलोकैः
**वृत्तरत्नाकरः** (३-८७); पृ. १००.

७ देवर्षिमण्डलस्य शकटमुपमानं ध्रुवस्य हरिः। चरतीति चरण: ल्युट्, अल्पश्चरण: चरणकः॥ - इति वल्लभदेवः ॥ **शिशुपालवधम्** (११-३); श्रीनगरस्यावृत्ति: पृ. ३.

दर्शितः।[८] यथावसरं दर्शितस्तस्मादेतस्य सार्थकता भवति कारणमन्यथा कवयोऽक्षरपूर्त्यर्थमपि तथा कुर्वन्ति, परं बाल्यकाले भगवतः चरणकमलमपि स्वल्पमेव स्यात्।

अन्यच्चात्र वल्लभदेवेन शकटस्यार्थ: शकटमेव कृत:, तेन बाल्यावस्थायां भगवता श्रीकृष्णेनैकं बृहच्छकटमुद्धृत्य दूरीकृतमित्यर्थो नयनपथमायाति। मल्लिनाथेनात्र श्रीमद्भागवतपुराणस्य दशमस्कन्धस्य कथास्मरणं कृत्वा 'शकटासुर' इति शकटस्यार्थ: कृत:।[९]

अनेन भगवता कृष्णेन न केवलं काष्ठनिर्मितं शकटमेव दूरीकृत्य नाशपथं नीतम् तथैवार्थग्रहणं भवति, परं बाल्यकाले भगवता शकटासुरस्य नाशः कृतः तादृशं तस्य वीरकर्मापि ज्ञातुं शक्यते। अपरञ्च पुराणसन्दर्भेणात्र भगवतः बाल्यस्य कथाया अपि ज्ञानं भवति।[१०]

वल्लभदेवेनेयं कथा नितान्तं ख्यातिं गता तस्मादेतस्याः आवश्यकता न ज्ञाता स्यात्, परं मल्लिनाथेन प्रसिद्धस्यापि वृत्तान्तस्य लेखनं कृत्वाऽर्थस्य दृढीकरणं क्रियते। अनेनार्थेनात्र वल्लभदेवमते निर्जीवशकटस्य तथा च मल्लिनाथस्य मते सजीवस्य राक्षसस्यार्थः ज्ञायते। एवं स्वल्पविवेचनाभावे बृहदर्थपरिवर्तनं भवितुं शक्नोति।

**चिरतररतखेदप्राप्तनिद्रासुखानां चरममपि शयित्वा पूर्वमेव प्रबुद्धा।**
**अपरिचलितगात्राः कुर्वते न प्रियाणामशिथिलभुजचक्राश्लेषभेदं तरुण्यः।।(११-१३)**

एकादशसर्गस्यास्मिन्पद्ये महाकविना माघेन रतिसुखश्रान्तनायिकाया वर्णनं विधीयते।

---

[८] 'अल्पे' इत्यल्पार्थे कन्प्रत्ययः ।।- इति मल्लिनाथ: ।।
**शिशुपालवधम्** (११-३); निर्णयसागरप्रेस; पृ. २६४.

[९] पुरा किल बाल्ये कृष्ण: शकटरूपधारिणं शकटासुरं पादघातेन पातयामासेति पौराणिकी कथात्राऽनुसन्धेया ॥ - इति मल्लिनाथ: ।।
**शिशुपालवधम्** (११-३); निर्णयसागरप्रेस, पृ. २६४

[१०] अधःशयानस्य शिशोरनोऽल्पकप्रवालमृद्वंघ्रिहतं व्यवर्तत।
विध्वस्तनानारसकुप्यभाजनं व्यत्यस्तचक्राक्षविभिन्नकूबरम्।। **श्रीमद्भागवतम्** (१०-७); पृ. ४१०.

यथा - अत्यधिकं पश्चात् शयनं कृत्वाऽपि पूर्वमेव त्यक्तनिद्रा: (नायिका:), (तथापि) गात्राणि स्थिरीकृत्य तरुण्योऽतिशयरतिक्रीडाया: श्रमेण निद्रासुखमधिगतवतां प्रियाणां भुजवलयानां गाढमाश्लेषभेदं न कुर्वन्ति।

अत्र वल्लभदेवमल्लिनाथयो: टीकापठनं क्रियते तदा ज्ञायते यद् यद्यपि रसप्रधानोऽयं श्लोकस्तथापि श्लोकस्यार्थं विहाय न किमपि वैशिष्ट्यं दृश्यते। वल्लभदेवस्य टीकायां यद्यप्यर्थस्तु पूर्णतया स्पष्टो भवति, तथापि शुष्क एवानुभूयते। तदपेक्षया यदि मल्लिनाथस्य टीकाया अभ्यासः क्रियते तर्हि ‘चरममपि शयित्वा पूर्वमेव प्रबुद्धा’ इत्यस्यार्थस्तेन स्पष्टीकृत:, तदर्थं तेन सन्दर्भपद्यमपि लिखितम्। तेन सा नायिका पतिव्रतेति दर्शितम्।[११] अनेन रतावपि पतिव्रताधर्मस्य ज्ञानं पाठकानां जायते।

अन्यच्चात्र वैशिष्ट्यं यत् सत्काव्ये रसस्य प्राधान्यं भवति तस्य चिन्तनमेव केन्द्र - स्थानमर्हति तस्मादनेन तत् क्रियते।

यथा जलस्यैव तरङ्गबुद्बुदादयो विकारा वर्तन्ते तथैव पद्ये रसमाश्रित्य स्थायिभाव - सञ्चारिभावानुभावादयः स्थिता:।[१२] अत आलङ्कारिकाः पद्ये रसं चिन्तयन्ति ततश्च विभावादीनां निरूपणं कुर्वन्ति। मल्लिनाथेनापि तथा विधीयते।

पद्येऽस्मिन् मल्लिनाथेन सञ्चारिभावरूपेणात्र रतिश्रमो दर्शितस्तथा चानुभावरूपेण निद्रा दर्शिता। सञ्चारिभावश्चानुभावस्तयोर्मध्ये कार्यकारणभावस्य प्राधान्यं भवति, लोके यत्कारणं तदेव काव्ये सञ्चारिभाव:, लोके यच्च कार्यं तदनुभाव: कथ्यते। अत्र रतिश्रमो निद्रायाः कारणं श्रान्ता जना निद्रां कुर्वन्ति, निद्रा च तत्कार्यमत: रतिश्रमनिद्रयोर्मध्ये कार्यकारणभावो वर्तते।

एवं मल्लिनाथस्य विवेचनमलङ्कारशास्त्रं लक्ष्यीकृत्यापि भवति तस्मादेतद्विशिष्टतरं प्रतिभाति।

**विगततिमिरपङ्कं पश्यति व्योम यावद्धुवति विरहखिन्नः पक्षती यावदेव।**
**रथचरणसमाह्वस्तावदौत्सुक्यनुन्ना सरिदपरतटान्तादागता चक्रवाकी।।(११-२६)**

---

[११] सुप्ते पश्चाच्च या शेते पूर्वमेव प्रबुध्यते।
नान्यं कामयते चित्ते सा स्त्री ज्ञेया पतिव्रता॥
इति स्मरणादिति भावः ॥ - इति मल्लिनाथः।। **शिशुपालवधम्** (१-१३); निर्णयसागरप्रेस; पृ. २६८.

[१२] विभावेनानुभावेन व्यक्तः संचारिणा तथा।
रसतामेति रत्यादिः स्थायी भावः सचेतसाम्॥ **साहित्यदर्पण**: (३-१); पृ. ९९.

शिशुपालवधस्यैकादशसर्गे सूर्योदयवर्णनं वर्तते। सूर्योदयस्य चक्रवाकमिथुनोपरि कीदृशः प्रभावस्तदस्मिन् पद्ये कविना वर्णितम्।

यथा - विगतोऽन्धकारो यस्मात्तादृशं पङ्कं विलोक्योत्पतितुकामश्चक्रवाक: पक्षमूले धुनोति, यावदयमित्थं व्यवहारं करोति तावदेव सरोवरान्यतटादुत्कण्ठा-प्रेरिता सती चक्रवाक्यागतवती।

अत्र पद्ये चक्रवाकचक्रवाकीवर्णनं वर्तते। एतद्वर्णनं साहित्यसमाजेऽतीव ख्यातिं गतं तस्मादत्र टीकाकारयो: न कश्चिद् विशेषलेखनावसरः। तथापि मल्लिनाथस्यालङ्कारशास्त्रचर्चा ध्यानाकर्षणहेतुभूता। यतो हि तेन न केवलमर्थचिन्तनमेव क्रियते, परं पद्यतलस्पर्शं कृत्वा रसानुभूतिरपि क्रियते। यावद् रसानुभूतिर्न जायते तावदध्ययनमपूर्णं गण्यते तत्र च सहृदयहृदयमेव प्रमाणम्।

यदा शब्दज्ञानं परिपक्वं भवति तदैव टीकाकर्तुर्मानसं शब्दालङ्कारचर्चां कर्तुं लषति, यथाऽर्थज्ञानं प्रौढं भवति तदाऽर्थालङ्कारविवेचनाय कविर्यतते, यदोभयं साधु भवति तदोभयालङ्कारलेखने कवेर्यत्न: फलवान् भवति, परं कविर्यदा मर्मज्ञो भवति तदा रसवदलङ्कारचर्चाऽऽरम्भं वाञ्छति।[१३] तथैवात्रापि मल्लिनाथेन विवेचनं कृतम्।

यथानुकूलं तेन शब्दार्थरसवदलङ्काराणां चर्चा विहिता। तेन तस्यालङ्कारशास्त्रप्रौढत्वं तु गम्यत एव, परं तस्य परिणतरसमार्मिकत्वमपि सिद्धं भवति।

अलङ्कारशास्त्रे यदा नायकनायिकयोः प्रणयवर्णनं भवति तदा तदनुभूति: रस: कथ्यते, परं तादृशमेव प्रणयवर्णनं तिर्यग्गतियुतानां भवति तदा रसाभासः कथ्यते। यत्र तादृशी रसानुभूतिर्भवति तत्र रसवदलङ्कारो भवन्ति।

मल्लिनाथेनात्र चक्रवाकचक्रवाकीप्रणयस्य वर्णनत्वाद् रसवदुर्जस्वी नामालङ्कार: कथित:।[१४]

---

[१३] रसभावौ तदाभासौ भावस्य प्रशमस्तथा।
गुणीभूतत्वमायान्ति यदाऽलङ्कृतयस्तदा।।
रसवत्प्रेयऊर्जस्विसमाहितमिति क्रमात्। **साहित्यदर्पण**: (१०-९५); पृ. ८७३.

[१४] अत्र रागौत्सुक्ययो रसभावयोस्तिर्यग्गतत्वेनाभासयोर्निबन्धनादूर्जस्वी नामाऽलङ्कारः। रसभावतदाभासप्रशमानां निबन्धेन रसवत्प्रेयऊर्जस्विसमाहितानि इति लक्षणात्।। - इति मल्लिनाथः ।। **शिशुपालवधम्** (११-२६); निर्णयसागरप्रेस, पृ. २७३.

**सरसिजवनकान्तं विभ्रदभ्रान्तवृत्तिः करनयनसहस्रं हेतुमालोकशक्तेः।**
**अखिलमतिमहिम्ना लोकमाक्रान्तवन्तं हरिरिव हरिदश्वः ध्वान्तवृत्रं हिनस्ति।।**

**(११-५६)**

एकादशे सर्गेऽत्र महाकविना माघेन प्रभातवर्णनं कृतम्।

अथ पद्यार्थविचारः क्रियते। कमलवनानां प्रियः दर्शनशक्तिकारणभूत-किरणसहस्रनेत्रवान् गगनमध्ये भ्रमणशीलः सूर्यदेवोऽतिसामर्थ्यात् समस्तं विश्वं व्याप्य स्थितमन्धकारं यथा देवेन्द्रो वृत्रासुरं तथैव हन्ति।

पद्येऽस्मिन् विशेषणानि श्लिष्टानि तस्मात् तान्येकमेवेन्द्रार्थं दर्शयन्ति तथा चान्यत्र सूर्यार्थं दर्शयन्ति। अत्र सरसिजवनकान्तम्, अभ्रान्तवृत्तिः, आलोकशक्तेर्हेतुम्, करनयनसहस्रम्, इमानि सर्वाण्यपि विशेषणानि श्लिष्टानि सन्ति।

वल्लभदेवेन सरसिजवनकान्तस्यार्थः सूर्यपक्षे कमलकाननेषु रुच्यं विकासकारित्वात् कृतः, अभ्रान्तवृत्तेः नभः प्रान्ते वर्तनं यस्येति कृतः, आलोकशक्तेः हेतोः करनयनसहस्रपदस्य चार्थः उद्द्योतस्य हेतुभूतं नयनसहस्रं विभ्रत्सूर्यः पूर्वोक्तप्रकारेण वल्लभदेवेनार्थः कृतः।

इन्द्रपक्षे सरसिजनयनकान्तस्थार्थः पद्मखण्डवत् मनोज्ञः, अभ्रान्तवृत्तेरर्थः अभ्रान्ता अपरिभ्रष्टा धर्मवती वृत्तिर्विचारो यस्य सः तथाऽर्थः कृतः, आलोकशक्तेः कारणं नयनसहस्रं बिभ्रदिन्द्र एवमर्थः कृतः।

अस्मिन्नर्थे करनयनसमेतस्यार्थो यदि श्लिष्टस्तदा न स्पष्टः अभ्रान्तवृत्तेरप्यर्थो न तथा स्पष्टो जायते।

अन्यत्र यदि मल्लिनाथस्य टीकायामस्यैव पद्यस्यार्थोऽवलोक्यते तर्हि सरसिजवनकान्त- स्यार्थः सूर्यपक्षे सरसिजवनानां कान्तः प्रियः, अभ्रान्तवृत्तेरित्यस्य नभोमध्ये वृत्तिर्यस्येत्यर्थः कृतः, लोकलोचनानाम् आलोकशक्तेः हेतुभूतं नाम विषयग्रहणशक्तेः हेतुभूतं नयनानि इव कराः तान् धारयन् सूर्यः तथा गृहीतः।

शक्रपक्षे तु सरसिजवनकान्तस्यार्थः सरसिजवनवद्रम्यः तादृशोऽर्थः कृतः अभ्रान्तवृत्तेरर्थः मेघवाहन इत्यर्थो गृहीतः,[१५] आलोकशक्तेः हेतोरर्थस्तु आलोकशक्तेः

---

[१५] मेघवाहनः इत्यर्थः। 'अभ्रं नभः स्वर्गबलाहकेषु' इति विश्वः।। - इति मल्लिनाथः ।।

**शिशुपालवधम्** (११-५६); निर्णयसागरप्रेस; पृ. २८४,

दर्शनव्यापारस्य दर्शनसाधन - मित्यर्थ: कृत:, करनयनसहस्रस्यार्थ: करा इव नयनानि तेषां सहस्रमित्यर्थः कृतः।

पूर्वलिखितार्थयोर्वल्लभदेवस्यार्थे सारल्यं दृश्यते, परं करनयनसहस्रस्यार्थो न तथा स्पष्टो यथा मल्लिनाथेन स्पष्टीकृत:। अन्यच्च मल्लिनाथेन कोशप्रमाणं साहित्यशास्त्रप्रमाणञ्च विलिख्या- र्थस्यास्य दृढीकरणं कृतम्। अन्यत्र स्वमतं विलिख्य ततोऽन्येषां मतान्यपि मल्लिनाथेन लिख्यन्ते, परमत्र 'उपमा श्लेषो वा मतभेदादिति' लेखनं दर्शयति यदस्यापि कदाचिदेतत् सन्दिग्धमेव। लोकमाक्रान्तवन्तमित्यत्र तेन मन्त्रप्रमाणं विलिख्य शक्रपक्षेऽर्थो विशेषतस्स्पष्टीकृतः।

एवमत्र मल्लिनाथस्यार्थविवेचनं तर्कबद्धं प्रमाणयुक्तं च दृश्यते।

**अदयमिव कराग्रैरेष निष्पीड्य सद्यः शशधरमहरादौ रागवानुष्णरश्मि:।**
**अवकिरति नितान्तं कान्तिनिर्यासमब्दस्त्रुतनवजलपाण्डुं पुण्डरीकोदरेषु।।(११-६२)**

पूर्ववदत्रापि प्रभातवर्णनं प्रवर्तते।

यथा -रक्तवर्ण: सूर्य: दिवसारम्भे निर्दयं चन्द्रमसं किरणहस्ताग्रै: निश्चोत्य नवाम्बुदजनितजलमिव श्वेतकान्तिसारं मुक्तमनसा श्वेतकमलेष्ववकिरति।

पद्येऽस्मिन् 'रागवान्' इत्यस्यार्थद्वयं यथैकार्थो रक्तवर्णयुतोऽन्यश्चार्थः प्रणयसमेत: करस्यार्थ: रश्मिरपि भवति तथैव हस्तोऽपि भवति। एतस्मात् कारणात् वल्लभदेवेन व्यावहारिकोऽर्थ: कल्पितोऽस्ति। यथा विश्वस्मिन्नपि कश्चिदपि प्रणयी सक्रोधो भवति तदान्यं पीडयति। परं तत्र पीडनस्य न किमपि कारणं क्रोधं विहाय, यद्यपि काम: क्रोधस्य मूलं तथा श्रीमद्भगवद्गीतायां स्वयं भगवतोक्तम्।[१६] परं क्रोधशान्तय एव परपीडनं तत्र स्वार्थदृष्टिर्दृश्यते।[१७]

---

लोकमाक्रान्तवन्तं व्याप्तवन्तम् एकत्र प्रत्यक्षादन्यत्र 'स इषुमात्रमिषुमात्रं विष्वग्वर्धत स इमाँल्लोकानावृणोत्' इत्यागमादिति भावः ।। - इति मल्लिनाथः ।।

**शिशुपालवधम्** (११–५६); निर्णयसागरप्रेस, पृ. २८४.

१६ सङ्गात्संजायते कामः कामात्क्रोधोऽभिजायते। **श्रीमद्भगवद्गीता** (२-६२), पृ. ६०.

१७ यथा अन्योऽपि रागवान्सक्रोधः परं निर्दयमिव निष्पीडयति।। - इति वल्लभदेवः ।।

**शिशुपालवधम्** (११-६२), चौखम्बा, पृ. ४०३.

तस्मादिदमर्थघटनं मनोहरं न दृश्यते, तथा चात्र निरर्थकं परपीडनं वर्तते, तस्मादत्र हेत्वभावः।

मल्लिनाथेन सूर्यश्चन्द्रमसं पीडयति ततश्च कमलेषु कान्तिरसमवकिरति। समाजेऽपि शत्रूणां पीडनं कृत्वा तद्धनमाहृत्य मित्रेभ्यो दीयते तथा स्नेहिव्यवहारो दृश्यते।[१८]

तस्मादेतस्यार्थघटनं पूर्णं व्यावहारिकं सङ्गतञ्च दृश्यते।

**कृतसकलजगद्विबोधो विधूताऽन्धकारादय:**
**क्षपितकुमुदतारकश्रीर्वियोगं नयन् कामिनः।**
**गुरुतरगुणदर्शनादभ्युपेताऽल्पदोषः कृती**
**तव वरद ! करोतु सुप्रातमह्नामयं नायकः॥(११-६७)**

एकादशसर्गस्यान्तिमेऽस्मिन्पद्ये भगवतः श्रीकृष्णस्य कृते 'सुप्रभातं भवत्विति' शुभाशंसा प्रकटीक्रियते। यथा - यः समस्तं जगत् प्रबोधयति, योऽन्धकारवृद्धिं, दूरीकरोति, यः कुमुदतारागणशोभां नाशयति, सकामानां वियोगजनक:, यस्य गुणाधिक्यात् स्वल्पदोषाः जनैः स्वीकृताः तादृशः कृतकृत्यः दिवसकर: सूर्य: हे वरद ! भवतः सुदिवसं करोतु।

अत्र विवेचनद्वयमपि वल्लभदेवमल्लिनाथयोः पठित्वा यद्दृष्टिपथमायाति तदित्थं वर्तते। यथा - मल्लिनाथेनात्र सामान्यार्थ एव सूचितः, परं वल्लभदेवेनात्र सूर्यः सुदिवसं करोतु, तथैव षडाननोऽपि सुदिवसं करोत्विति विशेषणगतं श्लिष्टपदार्थं गृहीत्वा प्रदर्शितः। वल्लभदेवेन 'क्षपिततारकश्री: नाम निर्जिततारकप्रभाव:' 'कामिनां वियोगजनक: यतो हि स: कुमार:' एवं विलिख्य तेन षडाननस्यार्थः सूचितः। तस्यार्थस्य बीजं कदाचित् 'गुरुतरगुणदर्शनादभ्युपेताऽल्पदोष:' सूर्यस्यास्मिन् विशेषणे स्यात् कारणं कुमारसम्भवेऽपि प्रारम्भे हिमालयवर्णने तादृशमेव पद्यं महाकविना कालिदासेन

---

[१८] यथा द्विषन्तं प्रपीड्य तदीयं सुहृदे प्रयच्छति तद्वदितिभावः।। - इति मल्लिनाथः ।।
**शिशुपालवधम्** (११-६२), निर्णयसागरप्रेस, पृ. २८६.

लिखितम्।[१९] तां पङ्क्तिं पठित्वा कुमारसम्भवस्य स्मृतिर्जाता स्यात्, ततश्च कुमारस्मृत्याऽयमर्थो मनसि कदाचिदागतः स्यात्।

मल्लिनाथोऽस्य वल्लभदेवस्योत्तरकालवर्ती तथापि तेन द्वितीयार्थो न लिखितो यद्यपि तेनान्यपद्येषु द्वितीयार्थो लिख्यते तथा च वल्लभदेवविवेचनं तेन पूर्वं पठितमस्ति। परमत्र सर्वाण्यपि विशेषणानि कुमारार्थं न सूचयन्ति, तथा च प्रसङ्गसङ्गतोऽप्ययमर्थो न भवेदिति मत्वा तेनायमर्थो न दर्शितः।

अन्यच्च महाकाव्यलक्षणेष्वेकमिदं यथा सर्गान्तेऽन्यद्वृत्तं भवति मल्लिनाथेनात्र महामालिनीति वृत्तभेदो लिखितः।[२०] वल्लभदेवेन वृत्तस्य नामोल्लेखोऽपि न कृतः। अत्रान्यदपि स्मरणार्हं यथा मल्लिनाथेनान्यत्र पूर्वपद्येषु लक्षणं विलिख्य वृत्तपरिचयोऽदीयत, तथैवात्रापि तेन लक्षणमलिखत।

❋❋❋

---

[१९] एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः।।

**कालिदासग्रन्थावली** (कुमारसंभवम् १-३); पृ. ४७.

[२०] महामालिनीवृत्तम् - यदिह नयुगलं ततो वेदरेफैर्महामालिनी।। - इति मल्लिनाथः ।।

**शिशुपालवधम्** (१२-६७); पृ. ४०६.

# प्रकरणम् – ९ - यज्ञदर्शनम्

## सर्गः-१२
## सैन्यप्रस्थानवर्णनम्

माघकविविरचितशिशुपालवधमहाकाव्यस्य द्वादशसर्गे यज्ञाय युधिष्ठिरनगरं प्रति प्रस्थितस्य भगवत: श्रीकृष्णस्य सेनाया उत्तरोत्तरमग्रे गतिर्वर्णिता। तत्र च वृषभगजाश्वरथानां वर्णनम्, सेनायाः कृतपरिश्रमाया अपि प्रतिक्षणं नवोत्साहो विलोक्यते, अन्ते च यमुनां तीर्त्वा सेनाऽग्रे जगाम।

सर्गमेनं लक्ष्यीकृत्य वल्लभदेवमल्लिनाथयोः टीकाविचारो विधीयते। वल्लभदेवस्य पद्यानामर्थविस्तारो मल्लिनाथस्यार्थविवेचनाद् विशेषः स्पष्टः सरलश्च दृश्यते। ध्वन्यर्थकथने मल्लिनाथस्य लेखने वैशिष्ट्यं दृश्यते। व्याकरणविवेचने तु द्वावप्येतौ प्राय: समानौ स्त:। अलङ्कारस्य विवेचने मल्लिनाथेन प्रायः सर्वत्र यथाशक्यं विवरणं दत्त्वा सलक्षणं चर्चा क्रियते वल्लभदेवेनापि क्वचिदलङ्कारचर्या क्रियते, परं तत्र तयोरपि नितान्तं मतभेदो दृश्यते।

तथा चेदमप्यनुभूयते यद् - यथा यथा भगवत: श्रीकृष्णस्य सेनाऽग्रे याति, माघकवेः वर्णनमग्रे याति तथा तथा द्वयोरपि विवेचकयोर्विचारधाराया भेदप्रवाहो न्यूनतां याति। अपरञ्च यथा प्रथमसर्गे लेखनोत्साहोऽवर्तत सोऽपि शनैः शनै न्यूनतामेतीत्यनुमीयते।

**प्रह्यानतीव क्वाचिदुद्धतिश्रित: क्वचित्प्रकाशानथ गह्वरानपि।**
**साम्यादपेतानपि वाहिनी हरेस्तदाऽतिचक्राम गिरीन्गुरूनपि।।(१२-५६)**

द्वादशसर्गस्यास्मिन् पद्ये युधिष्ठिरनगरं प्रस्थिताया: भगवत्सेनाया वर्णनं वर्तते।

यथा - भगवत: श्रीकृष्णस्य सेना महतोऽपि पर्वतानतिक्रान्तवती। ते पर्वताः कीदृशाः आसन्, तर्हि क्वचित् ते पर्वताः उन्नताः आसन्, क्वचिद् वृक्षविरहत्वात् स्पष्टाः आसन्, क्वचित् वृक्षाधिक्याद् गहनाः आसन्, क्वचिच्च समधरारहिता आसन्। तेषां पर्वतानां सेनयोलङ्घनं कृतम्।

पद्येऽस्मिन् पूर्ववत् पर्वतानां वर्णनं वर्तते। वल्लभदेवेन मल्लिनाथेन च तथैवास्य पद्यस्यार्थो दर्शितः। ततो मल्लिनाथेन विशेषं चिन्तनं कृत्वा 'गुरूनपि' (गुरून् + अपि) तत्पदमधिकृत्यान्योऽप्यर्थश्चिन्तितः। वल्लभदेवेन 'गरून्' पदं पर्वतानां विशेषणरूपेण स्वीकृतम्, परन्तु मल्लिनाथेन तत्पदं स्वतन्त्रं विचार्य सर्वेषामपि पर्वतविशेषणानां विशेषचिन्तनेनार्थद्वयं कृत्वाऽर्थश्चिन्तित:।

अथ तदर्थस्य विचारो विधीयते। मल्लिनाथकृतो द्वितीयोऽर्थो यथा पूज्याः क्वचिदनुकूला भवन्ति तथा च क्वचिदुद्धता भवन्ति, क्वचित् प्रकटा भवन्ति, क्वचिद् गूढा भवन्ति। एवं विषमवृत्तयो गुरवो वर्तन्ते,ताननतीत्य सेना गता, अर्थात् तेषामनादरं कृत्वा सेनाऽग्रे गतवती।

वल्लभदेवेन 'अपि' अव्ययस्यार्थोऽत्र विरोधः एव कृतः, परं मल्लिनाथेन पर्वतपक्षे 'अपि' अव्ययस्यार्थो विरोध: कृत:, पूज्यपक्षे 'अपि' अव्ययस्यार्थ: 'अपिश्चार्थे' इति विलख्य दर्शितः।

अत्र स्मरणीयं यत्र मल्लिनाथेन तृतीयसर्गेऽपि 'गुरून् कवीन्द्रानुल्लङ्घ्य तुरगा गन्तुमीषु:"(शिशु. ३-२९) तस्यार्थ: तथैव कृत:।[१]

तदर्थञ्च दृढीकर्तुं मल्लिनाथेनान्यदपि सुभाषितं लिखितं यत्र विवेकहीना गुरवोऽप्युल्लङ्घनीया एवेति दर्शितम्।[२]

प्रायः सर्वेऽपि "गुरूणामादरः कर्तव्य" इति विचारं प्रस्तुवन्ति। परं मल्लिनाथेन दृढमिदमुच्यते यदि गुरवोऽपि प्रगतिमार्गेऽवरोधं कुर्वन्ति तथा विवेकरहिता भवन्ति, तर्हि तेषामप्याज्ञाया उलङ्घनं कर्तव्यम्।

"आज्ञागुरूणां ह्यविचारणीया" तत् सर्वत्रादरणीयं नास्ति। एवमनेन समाजपरिवर्तनं विचार्यते।

तस्मादेवैकस्मिन् सुभाषिते गुरवो मध्यमभावेन सेव्या इति प्रस्तुतम्।[३]

---

१ निरुध्यमाना यदुभि: कथञ्चिन मुहुर्यदुच्चिक्षिपुरग्रपादान्।
ध्रुवं गुरून्मार्गरुध: कवीन्द्रानुल्लङ्घ्य गन्तुं तुरगास्तदीषु:॥
**शिशुपालवधम्** (३-२९) निर्णयसागरप्रेस; पृ. ७३.

२ गुरोरप्यवलिप्तस्य कार्याकार्यमजानत:।
उत्पथप्रतिपन्नस्य परित्यागो विधीयते॥ - इति मल्लिनाथ:॥
**शिशुपालवधम्** (१२-५६); निर्णयसागरप्रेस; पृ. ३०५

अनेनेदं फलति यद् वल्लभदेवान्मल्लिनाथस्य विचारधारा परिवर्तनशीला वर्तते।

**विदलितमहाकूलामुक्ष्णां विषाणविघट्टनै-**
**रलघुचरणाकृष्टग्राहां विषाणिभिरुन्मदैः।**
**सदसि सरितं सा श्रीभर्तुर्बृहद्रथमण्डल-**
**स्खलितसलिलामुल्लङ्घ्यैनां जगाम वरूथिनी॥(१२–७७)**

द्वादशसर्गस्य पद्येऽस्मिन् सरितमुल्लङ्घ्य भगवत्सेना गतवतीति वर्णनं वर्तते।

अस्य पद्यस्य भावार्थविचारो विधीयते। लक्ष्मीपतेर्भगवतः सा सेना यमुनानदीं तीर्त्वा गता। सा नदी कीदृशी तर्हि यया महाकूलानि वृषभविषाणविघट्टनैर्विदलितानि, अपरञ्च यस्या जलचरा मदोन्मत्तैर्गजैबृहच्चरणैर्बलादाकृष्य धरां प्रापिताः, अपरञ्च बृहद्रथचक्रैर्यस्या जलं व्याकुलीकृतं तादृशी यमुना, तां पूर्वविशेषणविशिष्टां शैवलिनीं तीर्त्वा भगवत्सेना जगाम।

अत्र वल्लभदेवमल्लिनाथयोर्विवेचनविचारो विहितस्तदेव दृष्टिपथमागतम्। यथा – वल्लभदेवस्यार्थविषयकं विवेचनं मल्लिनाथविवेचनाद् विस्तरान्वितं तस्मात्सरलञ्च वर्तते। अत्रालङ्कारविषये द्वावप्येतौ भिन्नमतौ स्तः। वल्लभदेवेनात्र व्यतिरेकोऽलङ्कार उक्तः। यत्रोपमेयमुपमानादुत्कृष्टं भवति तत्र व्यतिरेकोऽलङ्कारो भवतीति लक्षणम्।[४]

अत्रोपमानादुपमेयमुत्कृष्टमिति स्पष्टं नास्ति परमनुमानेन गम्यं वर्तते। यतो हि सेनाऽपि गतिशीला, नद्यपि गतिशीला, सेनायामपि वृषभगजादयः सन्ति, नद्यामपि तरङ्गचक्राणि गतियुतानि भवन्ति, अनेन द्वयोरपि समानता दृश्यते, परं सेनया तस्याः कूलानि नाशं प्रापितानि तथा च जलचरा अपि धरातलं प्रापितास्तस्माद् बलाधिक्यात् सेनोत्तमेति ज्ञानं भवति। परमत्रोपमानादुपमेयमुत्कृष्टमिति प्रयत्नसाध्यं वर्तते।

---

[३] अत्यासन्ना विनाशाय दूरस्था न फलप्रदाः।
सेव्या मध्यमभावेन राजावह्निगुरुस्त्रियः॥ **(कस्यचित्)**

[४] उपमानाद्यदन्यस्य व्यतिरेकः स एव सः। **काव्यप्रकाशः** (१०-१५९); पृ. ३८३
उपमानादुपमेयस्य गुणविशेषवत्त्वेनोत्कर्षो व्यतिरेकः। **रसगङ्गाधरः;** पृ.५३९.

तस्मान्नात्र स्पष्टो व्यतिरेकोऽलङ्कारः। स्वयं वल्लभदेवोऽपि अथ वोल्लङ्घ्य तिरस्कृत्य जित्वेति वक्रोक्तिः' तथा लिखितवान्।

मल्लिनाथेनात्र काव्यलिङ्गालङ्कारः स्वीकृतो यत्र लिङ्गं नाम हेतुरुक्तो भवति।[5] तत्रायमलङ्कारो भवति। अत्रापि सेनाया विजयस्य विशेषणैः कुलदलनादि हेतुकत्वात्काव्यलिङ्गालङ्कारः स्पष्ट एव। माघेऽलङ्कारविमर्शकारेणापि पद्येऽस्मिन् स एवालङ्कारो दर्शितस्तस्मात् स्पष्टमेतत् सुस्पष्टं जायते।[6]

अनेनेदं वक्तुं शक्यते यद् वल्लभदेवान्मल्लिनाथस्यालङ्कारदृष्टिः स्पष्टा।

❋❋❋

---

[5] काव्यलिङ्गं हेतोर्वाक्यपदार्थता।

**काव्यप्रकाशः** (१०-६२); पृ.४०४, **साहित्यदर्पणः** (१०-६२); पृ. ८०२

[6] विदलितमहाकूला.......अत्र जयस्य विशेषणगत्या कूलदलनादिहेतुकत्वात्काव्यलिङ्गम्।
**माघेऽलङ्कारविमर्शः** पृ. २६२

# सर्गः–१३

# सभावर्णनम्

शिशुपालवधमहाकाव्यस्य त्रयोदशे सर्गे कविना माघेन भगवतः श्रीकृष्णस्य आगमनं वर्णितम्। भगवान् कृष्णो युधिष्ठिरातिथिर्भवति, तत्रागत्य पूज्यानग्रजाननुजान् च मिलति। भगवन्तं विलोक्य पाण्डवानां नगरजनानाञ्च मनोभावा वर्णिताः। भगवानपि नम्रस्सन् तान् भावान् स्वीकृत्य तदनुरूपं भावं दर्शयति।

अस्य सर्गस्य वल्लभदेवमल्लिनाथयोर्विवेचनं विलोक्यते। द्वयोरपि विवेचनयोर्न तथा विशेषो भेदो दृश्यते तथापि वल्लभदेवस्य विवेचने पद्यस्यार्थविस्तर: समीचीनो वर्तते, तदपेक्षया मल्लिनाथेनार्थविस्तरोऽधिको न विधीयते। वृत्तपरिचये मल्लिनाथो विशेषस्पष्टः। प्रसङ्गानुरूपं सन्दर्भकथनं मल्लिनाथस्य समीचीनं वर्तते, यद्यपि वल्लभदेवेनापि सन्दर्भकथनं क्रियत एव। एकस्माच्छब्दाद् यथा सम्भवितार्था वल्लभदेवेन लिख्यन्ते तदपि तस्य वैशिष्ट्यम्। वल्लभदेवमल्लिनाथयोर्विवेचने यत्र वल्लभदेवेन श्लेषालङ्कारः स्वीकृतः, तत्र मल्लिनाथेन ध्वनि: कथ्यते। अनेनात्रालङ्कारध्वनिसम्प्रदायभेद: स्पष्टो भवति। अर्थस्य पात्रानुरूपमौचित्त्यमनौचित्यं वल्लभदेवेन तत्त्वतो विचार्यते, तथा च तत् स्पष्टं कर्तुं ग्रन्थप्रमाणमपि दीयते।

एवमत्र द्वयोरपि विवेचकयोर्मध्ये क्वचिन्मतभेदो दृश्यते।

**यमुनामतीतमथ शुश्रुकानमुं तपसस्तनूज इति नाधुनोच्यते।**
**स यदाऽऽचलन्निजपुरादहर्निशं नृपतेस्तदादि समचारि वार्तया॥(१३-१)**

अस्मिन्सर्गे भगवतः श्रीकृष्णस्यागमनम्, युधिष्ठिरेण सह तस्य स्नेहेन मेलनं भवति। तद्वर्णनं कुर्वन् कविरादौ लिखति। यथा - अस्य पद्यस्यार्थो विचार्यते तदा भगवान् श्रीकृष्णो यमुनामतीत इति वृत्तं युधिष्ठिरेण ज्ञातमिति वक्तुं न युज्यते, यतो हि भगवान् यस्मात् कालात् स्वनगरात् प्रस्थितस्तस्मात् कालादेवाहर्निशं तद्वार्ता युधिष्ठिरेण प्राप्यत एव।

अत्र युधिष्ठिरस्य भगवद्दर्शनाभिलाषो नितरां स्फुटो भवति। अस्य पद्यस्य विवेचनं यदा वयं वल्लभदेवदृष्ट्या मल्लिनाथदृष्ट्या पठामस्तदा वल्लभदेवस्य विवेचनेऽर्थविस्तरः समीचीनो दृश्यते, यथा स स्वपाठकानां कृते पद्यार्थं विशेषं

स्पष्टं कर्तुं प्रयतते। यथा कवेर्भावस्तु प्रस्थानादधुनापर्यन्तं तदागमनं तस्य युधिष्ठिरस्य विदितमासीदित्येव, परं वल्लभदेवो लिखति अतः प्रत्यहमसौ आगमवार्तां जानाति, अथ द्वारवत्याश्चलित: अथ तामुत्तीर्ण:, अद्य ग्रामं प्राप्तः अद्य वनम्, अद्य गिरिम्, अद्य नदीमित्यादिकां, तदा यमुनामतीतमेव अशृणोत् इति' एवं विलिख्य सर्वमपि शब्दचित्रं प्रस्तूय लिखति तदपेक्षया मल्लिनाथ: 'सुज्ञेषु किं बहुना' इति नियममाश्रित्य समस्तं समस्तं लिखति।

सामान्यरूपेण महाकाव्येषु कस्मिन्नपि सर्ग एकमेव वृत्तं भवति तदन्ते च वृत्तेषु भिन्नत्वं दृश्यते।

अतः टीकाकर्तार आदावेव वृत्तपरिचयं लिखन्ति, पाठकानां वृत्तज्ञानं स्यात् तथा च पद्यगानं कथं करणीयमेतस्यापि ज्ञानं भवेत्।

वल्लभदेवेनात्र सर्गादौ वृत्तपरिचयो न दत्त:। मल्लिनाथेनात्र 'मञ्जुभाषिणी' वृत्तमिति विलिख्य तस्य 'सजसा जगौ भवति मञ्जुभाषिणी' तथा लक्षणमपि लिखितम्।

एवमत्र पद्यस्य विवेचने वल्लभदेवस्यार्थविवेचने वैशिष्ट्यं दृश्यते, कारणं तेन कवेर्भाव: सरलतया यथा स्पष्ट: स्यात् तथा यत्न: क्रियते। एवमत्र मल्लिनाथेन वृत्तादीनां चर्चा विशेषतः क्रियते। एवं मल्लिनाथः शास्त्रीयचर्चायां विशेषं विवेचनं विदधाति।

**शिरसि स्म जिघ्रति सुरारिबन्धनच्छलवामनं विनयवामनं तदा।**
**यशसेव वीर्यविजिताऽमरद्रुमप्रसवेन वासितशिरोरुहे नृपः।।(१३-१२)**

त्रयोदशसर्गस्य पद्येऽस्मिन् कविप्रवरेण माघेन भगवतः श्रीकृष्णस्य युधिष्ठिरेण सह स्नेहमेलनं वर्ण्यते।

यथा असुरबन्धनप्रसङ्गे कपटेन वामनीभूतम् तथा चास्मिन् प्रसङ्गे विनयेन वामनीभूतं (नम्रम्) भगवन्तं श्रीकृष्णं राजा युधिष्ठिरो यथा तेन कृष्णेन पूर्वस्मिन् काले पराक्रमेण यो दिव्यवृक्षो (पारिजातः) जितस्तस्माज्जातेन यशसा सुवासितकेशसमन्विते मस्तकेऽजिघ्रत्।

यदाऽग्रजानुजा मिलन्ति तदाऽनुजा विनयेन नम्रा भवन्ति तथा चाग्रजास्तान् शिरःसु जिघ्रन्ति, तादृशी प्राचीना परिपाटी वर्तते। अत्र युधिष्ठिरोऽग्रजः श्रीकृष्णाश्चानुजस्तस्माद् युधिष्ठिरः श्रीकृष्णं मस्तकेऽजिघ्रत्। अत्र भगवान् कृष्ण:

केन प्रकारेण नम्रो जातो यथा वामनावतारे जातः, तथा पारिजातापहरणेन यद्यशः प्राप्तं तेन यशसा सुवासितकेशान्वितमस्तके कृष्णं युधिष्ठिरोऽजिघ्रत्।

अत्र पुराणकथासन्दर्भो येन न ज्ञायते तस्य पद्यार्थः स्पष्टो न भवेत्। तस्मादत्र विवेचने सन्दर्भकथनमनिवार्य जायत एव। एतस्मिन् सन्दर्भे वल्लभदेवमल्लिनाथटीकागतं विवेचनं विलोक्यते तदाऽधोऽङ्कितं दर्शनं जायते।

वल्लभदेवेन सुरारिबन्धनच्छलवामनम्' तत् स्पष्टं कर्तुं सुरारेः देवशत्रोः बलेः बन्धनच्छलेन यो वामनो या वामना मूर्तिः वामनो ह्रस्वः स विष्णुरेवोच्यते' तथा विलिख्य वामनावतारस्य स्वल्पः सन्दर्भो दत्तः, पर्याप्तो वर्तते, यतो हि कथेयं भगवदवतारत्वात्प्रसिद्धा विद्यते। परं 'पारिजातवृक्षस्य प्रसङ्गं स्पष्टं कर्तुं तेन न किमपि विशिष्टं लिखितं यद्यपि सा कथा वामनावतारकथावन्नातिप्रसिद्धा।

मल्लिनाथेन टीकायां वामनावतारस्य प्रसिद्धत्वात् स्वल्पो नामोलेख एव कृतः, तथा च पारिजातवृक्षस्य प्रसङ्गः समीचीनतया लिखितः, यतो हि स तथा प्रसिद्धः प्रसङ्गो न वर्तते।

अत्र सन्दर्भे मल्लिनाथेन सत्यभामायाः परितोषाय भगवता श्रीकृष्णेन बलात् पाकशासनलोकादानीतः इति लिखित्वा विशेषस्पष्टता विहिता।[१]

अत्रान्योऽपि प्रश्नो भवति यथात्र 'यशसेव वासितशिरोरुहे' इति लिखितं परं सुरभिवासितं भवति तथा कथं न लिखितमिति। यशःसुरभिमध्ये कस्मादेतत् साम्यमित्यपेक्षायां वल्लभदेवेन लिख्यते यत् सुरभिवर्णोऽपि श्वेतो भवति यशसो वर्णोऽपि धवल एव भवति[२], यद्यपि द्वयमप्येतत् कल्पितमेव न चक्षुर्ग्राह्यम्, यथा हास्यस्य वर्णः शुभ्रः कल्पितस्तथैवायं कविसमयो निर्दिष्टः। अनेनोत्प्रेक्षाऽलङ्कारो विशेषरूपेण स्पष्टो जायते।

एवमत्रालङ्कारदृष्ट्या वल्लभदेवस्य विवेचनं वैशिष्ट्यं दधाति, तथा च पौराणिकसन्दर्भोल्लेखे मल्लिनाथस्य लेखनयत्नो नितरां राजते।

---

१ पुरा किल भगवान् सत्यभामाप्रीतये बलादिन्द्रलोकादपहृत्य पारिजातं निजगृहेष्वारोपितवानिति कथाऽत्रानुसन्धेया॥ - इति मल्लिनाथः॥

**शिशुपालवधम्** (१३-१२); निर्णयसागरप्रेस; पृ. ३१५.

२ सुरभिश्श्वेतश्च यशः इति महाकविसमाचारः॥ - इति वल्लभदेवः॥

**शिशुपालवधम्** (१३-१२); श्रीनगरस्यावृत्ति; पृ. ७६

**अधिरुह्यतामिति महीभृतोदितः कपिकेतनाऽर्पितकरो रथं हरिः।**
**अवलम्बितैलविलपाणिपल्लवः श्रयति स्म मेघमिव मेघवाहनः।।(१३-१८)**

पद्येऽस्मिन् यदा युधिष्ठिर: श्रीकृष्णं मिलति तदा रथारोहणाय कथयति, तत: स कृष्ण: कथं रथमारूढ इति वर्णयन् कविवरो माघो लिखति। यथा कुबेरस्य हस्तं गृहीत्वा यथा देवराजो वारिवाहं श्रयति तथैव यदा युधिष्ठिरेण 'रथमारोहतु' इत्युक्तं तदा भगवान् कृष्ण आञ्जनेयध्वजस्य करं गृहीत्वा रथमारूढवान्।

पद्येऽस्मिन् मल्लिनाथेन मेघवाहनशब्दस्यार्थ: 'इन्द्र' इति कृतः। इन्द्रस्य मेघवाहन:" नामातीव प्रसिद्धं विद्यते। वल्लभदेवनात्र मेघवाहनस्यार्थः इन्द्रस्तु दर्शित एव वर्तते, अन्य: रुद्र: इत्यप्यर्थौ दर्शित:। मलिनाथस्यार्थ: प्रसिद्धित्वाद् योग्यो वर्तत एव। परन्तु रुद्रकुबेरयो: सख्यं प्रसिद्धम्।[३]

अपरश्चात्र कृष्णार्जुनयोरयि मैत्री प्रसिद्धैव वर्तते, तस्मात् मेघवाहनशब्दस्यार्थ: पाकशासन इति प्रसिद्ध: परन्तु रुद्र इत्यर्थो युक्तियुक्तो दृश्यते।

**हिममुक्तचन्द्ररुचिरः सपद्मको**
**मदयन्द्विजान् जनितमीनकेतनः।**
**अभवत्प्रसादितसुरो महोत्सवः**
**प्रमदाजनस्य स चिराय माधव:॥(१३-३८)**

पद्येऽस्मिन् कवीनां माघेन भगवतः श्रीकृष्णस्य विविधविशेषणैर्वर्णनं कृतम्।

यथा - हिममुक्तचन्द्र इव शोभान्वित:, लक्ष्मीसम्पन्नस्तथा च पद्मपाणि: ब्राह्मणान् मदयन्, प्रद्युम्नरूपेण कामस्य जनकोऽथवा कामभावं जनयन्, देवान् तोषयन्, स माधवश्चिरकालाय प्रमदानां कृते महोत्सवो जात:।

अस्य पद्यस्य द्वितीयोऽप्यर्थो वल्लभदेवेन मल्लिनाथेन च लिखितः। यथा हिमयुक्तचन्द्रेण शोभासम्पन्नः पद्मयुक्तजलान्वित:, ( कम् = जल) द्विजान् खगान्

---

[३] शरच्चन्द्रगात्रं गुणानन्दपात्रं।
त्रिनेत्रं पवित्रं **धनेशस्य मित्रम्।**
अपर्णाकलत्रं चरित्रं विचित्रम्।
शिवं शङ्करं शम्भुमीशानमीडे॥
**बृहत्स्तोत्ररत्नाकर:** (शिवाष्टकम-७); सं श्री शिवदत्तमिश्र शास्त्री; प्रका० श्रीठाकुरप्रसाद पु. भंडार; वाराणसी-१; पृ. १७६

तोषयन्, कामोद्दीपक: निर्मलीकृतमदिरः स वसन्तर्तुः प्रमदानां चिराय महोत्सवोऽभवत्।

अत्र पद्ममेव पद्मकम्, अन्यच्च कम्-जलम् तथा द्विजा: ब्राह्मणा: पक्षिणश्च मीनकेतनो मदन: प्रद्युम्नश्च, प्रसादितसुर:-प्रसादिता: सुरा येन स: (कृष्ण:) प्रसादिता निर्मलीकृता सुरा मदिरा यस्मिन् स: वसन्त: एवमर्थद्वयं कृत्वा पद्यस्यार्थे भगवत: श्रीकृष्णस्यैव वर्णनं कारणं भगवानेव वसन्तो वर्तते तथा भगवता श्रीमद्भगवद्गीतायां प्रोक्तम्।[४]

यत्रैकस्य पदस्यैकाधिकार्था भवन्ति तत्र श्लेषालङ्कारो भवति। परं यत्र द्वितीयार्थस्य नियन्त्रणं भवति तत्रान्योऽर्थो ध्वन्यर्थ: कथ्यते ध्वनिसम्प्रदायानुयायिभिः। अस्मिन्पद्ये वल्लभदेवेनापि कृष्णवर्णनं वसन्तवर्णनं च दर्शितम्, मल्लिनाथेनापि तथैवार्थद्वयं दर्शितम्। परं द्वयोरपि दृष्टिभेदो वर्तते। वल्लभदेवेन श्लेषेणान्योऽर्थ: 'स्वीकृतः, मलिनाथेनात्र श्लेषो न स्वीकृत: परं शब्दशक्तिमलो ध्वनि: स्वीकृतः।[५] यतो हि श्लेषध्वनिमध्ये न तथा भेद:। अत्र प्रकरणाद् वसन्तवर्णनं नियन्त्रितं भवत्यतः कृष्णवर्णनमेव कवेरभिमतम्। एवमत्र वल्लभदेवमल्लिनाथयोरेकमते सत्यपि दृष्टिभेदान्मतभेदो दृश्यते।

वल्लभदेवेनात्र तृतीयमपि पद्यार्थं दर्शयितुं फलवान् प्रयत्न: कृत:। यथा- माधवस्यैकोऽर्थ: कृष्ण: द्वितीयोऽर्थो वसन्तः, तृतीयोऽर्थस्तु 'आसवविशेष:' भवति। तस्य पानेनापि मदनोत्पत्ति- र्जायते, प्रसादितसुर: कारणं प्रकर्षेण सादिता न गौरवीकृता मदिरा येन सः, एवमत्र आसवविशेषस्यार्थो वल्लभदेवेन दर्शितः, परं तत्र सर्वाण्यपि विशेषणानि न सार्थानि तथापि प्रशस्य एव यत्न:।

पद्यस्यास्य विवचने वल्लभदेवस्यार्थस्पष्टीकरणमपि वैशिष्ट्यं दधाति। द्वयोरपि भावस्त्वेक एव परं कथनस्य भिन्न: पन्था दृश्यते।

**अकृतस्वसद्मगमनादरः क्षणं लिपिकर्मनिर्मित इव व्यतिष्ठत।**
**गतमच्युतेन सह शून्यतां गतः प्रतिपालयन्मन इवाङ्गनाजनः॥(१३-४७)**

---

[४] बृहत्साम तथा साम्नां गायत्री छन्दसामहम्।
मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकर:॥
**श्रीमद्भगवद्गीता** (१०-३५); प्रका० गीताप्रेस; गोरखपुर; सं २०५३; पृ२१८

[५] श्लेषस्तु हरिवसन्तयोरिह नास्त्येव प्रकृताप्रकृतश्लेषे विशेष्यश्लेषायोगात्। किन्तु शब्दशक्तिमूलो ध्वनिरेव॥
- इति मल्लिनाथ:॥ **शिशुपालवधम्** (१३-३४); निर्णयसागरप्रेस; पृ ३२१.

त्रयोदशसर्गस्यास्मिन्पद्ये युधिष्ठिरातिथिभूतं कृष्णं विलोक्य नरनारीणां कीदृशी स्थितिर्जातेति कविना वर्णितम्।

यथा- भगवता कृष्णेन सह गतस्य मनसः प्रतीक्षामिव कुर्वन्, शून्यतां प्राप्तः, स्वस्वगृहागमनेच्छारहितो नारीसमूहः चित्रालिखित इव क्षणं यावद् व्यतिष्ठत।

पद्यस्यास्य वल्लभदेवमल्लिनाथयोर्विवेचने न कश्चित् भूयान्भेदस्तथापि वल्लभदेवस्य विशेषं दर्शनं दृश्यते।

वल्लभदेवेनात्र लिखितं यत् कविनात्र भगवन्तं कृष्णं विलोक्य तन्नगरनारीणां मनोभावा वर्णिताः। तद्युगस्याङ्गनानां मनोविकृतिवर्णनं न युक्तमिति पाठकानां मनसि स्यात्, तादृशः प्रश्नो भवति, परं वल्लभदेवेन लिख्यते यद् भगवता व्यासेनापि प्रद्युम्नं विलोक्य कौरवपत्नीनां मनोभावा वर्णिताः। अतस्तत्प्रमाणं मत्वाऽलङ्कारविद्भिरेतादृशं वर्णनं न निषिद्धम्।[६] अत्रेदमपि स्मरणीयं यदेतदेवौचित्यनौचित्यचिन्तनं प्रथमसर्गे नारदमुनिना शृङ्गारवर्णनं क्रियते तत्रापि तद् - वल्लभदेवेन प्रस्तुतम्।

✹✹✹

---

[६] ननु कुलस्त्रीणामेतदनुचितं यत् परं प्रत्यनुरागः तत्कथं कविना उहे। सत्यमेतत् किन्त्वेवंविधोऽयं कथानायकधर्मो न चालङ्कारविद्भिर्निषिद्धः। प्रधानभूतैरप्यनुष्ठितत्वात्।तद्यथा - भगवतो व्यासस्य वचः - तासां कौरवपत्नीनां प्रद्युम्नगतचेतसाम्।
नवानामिव धेनूनां जघनानि प्रसुस्त्रुवुः॥ - इति वल्लभदेवः॥ **शुशुपालवधम्** (१३-४७); श्रीनगरस्यवृत्ति' पृ.९१

# सर्गः १४
## श्रीकृष्णार्घदानम्

अस्य चतुर्दशसर्गस्य प्रारम्भे युधिष्ठिर: भगवत्कृष्णसमक्षं स एव यजमानपदं स्वीकरोत्विति प्रार्थनां करोति। परं भगवान् कृष्णस्तमेव यजमानपदे स्थापयति। भगवत्कृपया यज्ञविधे: प्रारम्भः, ततश्च यज्ञविधिवर्णनम्, दक्षिणाप्रदानं दानमहत्त्ववर्णनञ्च वर्तते। अन्ते चार्घाहरणकार्यस्य दायित्वं भीष्माय दीयते। भगवतः कृष्णस्य तदर्थं वरणं तथा च तद्गुणसंकीर्तनमन्तेऽर्घप्रदानमिति सर्गसारः।

अत्र वल्लभदेवमल्लिनाथयोर्व्याख्याविचारः क्रियते। वल्लभदेवेन सन्दर्भपद्यानि लिख्यन्ते येनार्थविचार: स्पष्टो जायते। वल्लभदेवेन कतिपयस्थलेषु (श्लोक १९-२९) द्वितीयसर्गस्यापि चिन्तनं क्रियते, अनेन तस्य समस्तमपि माघकाव्यं विचारस्थितमेव स्यादिति वक्तुं पार्यते। वल्लभदेवस्य सुभाषितलेखनमपि पाठकस्य कृतेऽर्थग्रहणे सारल्यं तनोति।

मल्लिनाथस्य वृत्तपरिचय: समीचीनो दृश्यते। तस्यालङ्कारचिन्तनं तद्विषयकं गहनं ज्ञानं दर्शयति। क्वचिच्च तेन (श्लोक-३७) शास्त्रार्थोऽपि विधीयते तस्य ध्वनेरध्वनि निर्बाधा गतिरिति (श्लोक-३०-४१, ४२, ४५) 'पदे पदेऽनुभूयते।

**शुद्धमश्रुतिविरोधि बिभ्रतं शास्त्रमुज्ज्वलमवर्णसङ्करैः।**
**पुस्तकैः सममसौ गणं मुहुर्वाच्यमानमश्रृणोद् द्विजन्मनाम्।।(१४-३७)**

चतुर्दशसर्गस्यास्मिन् पद्ये यज्ञकर्मणि रतानां द्विजानां वर्णनं वर्तते।

यथा पवित्रं, वेदानुकूलं शास्त्रं धारयन्तं वर्णसङ्कराभावादुज्ज्वलं पुनः पुन: वर्णितगुणं द्विजगणं पुस्तकैः सममसौ नृपोऽश्रृणोत्।

पद्येऽस्मिन् द्विजगणस्य यानि विशेषणानि तानि विभक्तिविपरिणामेन पुस्तकानामपि भवितुमर्हन्ति। अतः द्विजाः कीदृशाः तर्हि-पवित्राः, वेदानुकूलं शास्त्रं धारयन्तः सुकुलोत्पन्नाः अर्थाद् वर्णसङ्कराभावादुज्ज्वला: वारं वारं वर्णितगुणाः आसन्, ग्रन्था अपि तादृशा एव कारणं तेऽपि पवित्राः वेदाविरोधिनः, समीचीनसुवाच्यवर्णाः तस्मादवर्णसङ्कराः अन्वयगुणादिक्रमेण प्रस्तूयमाना भवन्ति। अतोऽत्र ग्रन्थैः सह द्विजानां तुलना कृता।

उभयोरपि वल्लभदेवमल्लिनाथयोरर्थस्तु समानो वर्तते। परं मल्लिनाथेनात्र विभक्तिविपरिणामेन कथमर्थो ग्राह्य इति स्पष्टं सूचितम्। अन्यच्च युधिष्ठिरस्यास्मिन् यज्ञे तादृशा विद्वांसो द्विजाः किं पुस्तकानि धृत्वा वेदमन्त्रानपठनिति प्रश्नो भवति।

परं मल्लिनाथेनात्र **'मुखस्थविद्यानामपि पुस्तकधारणं विलक्षणत्वेनोक्तमित्यदोष:'** इति विलिख्य प्रश्नस्योत्तरं दत्तम्। अन्यच्चात्र सहोक्त्यलङ्कारस्यापि शास्त्रानुकूला चर्चा कृता। एतस्मान्मल्लिनाथस्य विवेचने वैशिष्टयं दृश्यते सहोक्तौ विशेषणानि श्लिष्टानि भवन्ति।[१]

***

[१] सहार्थस्य बलादेक यत्र स्याद्वाचकं द्वयोः।
सा सहोक्तिर्मूलभूतातिशयोक्तिर्यदा भवेत्॥
अतिशयोक्तिरप्यत्राभेदाध्वसायमूला कार्यकारणपौर्वापर्यविपर्ययरूपा च।
अभेदाध्यवसायमूलापि श्लेषभित्तिकान्यथा च॥-इति विश्वनाथ:॥ **साहित्यदर्पण:** (१०-५४); पृ. ७७३.

# सर्गः- १५

## अपशकुनाविर्भावः

महाकविमाघविरचितशिशुपालवधस्य पञ्चदशसर्गे युधिष्ठिरस्य यज्ञे भगवतः श्रीकृष्णस्य पूजनं कर्तव्यमिति भीष्माभिप्रायं श्रुत्वा शिशुपाल: पूर्ववैरत्वात् क्रुद्धः सन् स भगवतः श्रीकृष्णस्य निन्दां करोति, ततश्च भीष्मः क्रोधं कृत्वा युद्धाय कथयति। तदनन्तरं सभां त्यक्त्वा शिशुपालस्तत्पक्षस्थाश्च राजानो गता:। तत्पश्चात् युद्धस्य पूर्वप्रयत्ना: शुभाशुभचिह्नानि च कविना वर्णितानि।

अत्र वल्लभदेवेन मल्लिनाथेन च स्वस्वविवेचने यथाशक्यं सफलो यत्नः कृतः। अत्र वल्लभदेवस्य पूर्ववदेवार्थविस्तरविवेचनं सरलं प्रशस्यञ्च वर्तते। मल्लिनाथस्यापि तथैव वर्तते, परं स्वल्पं काठिन्यं शास्त्रसन्दर्भप्राचुर्यं च दृश्यते। अत्र क्वचित् वल्लभदेवस्यार्थचिन्तने वैशिष्ट्यं दृश्यते, तर्हि क्वचिन्मल्लिनाथस्य ध्वन्यर्थप्रकटीकरणं दृश्यते।

अत्रेदं स्मरणीयं यत् कतिपयपद्यानि प्रक्षिप्तानि वर्तन्त इति मत्वा मल्लिनाथेन तानि त्यक्तानि।[१] परं तेषामपि पद्यानामुपरि वल्लभदेवस्य टीका प्राप्यते। क्वचित् टीकाद्वयमप्युपलभ्यते तच्चित्रम्।

**जयति श्रिया विरहितोऽपि यदुदधिसुतामुपायथाः।**
**ज्ञातिजनजनितनामपदां त्वमतः श्रियः पतिरिति प्रथामगाः।।(१५-२७)**

महाकविमाघविरचितशिशुपालवधमहाकाव्यस्य पञ्चदशसर्गस्य पुराऽस्मिन् यदा यज्ञे यृधिष्ठिरेण भगवते श्रीकृष्णायार्घं दत्तं तच्चेदिपतिर्नासहत तदा स शिशुपाल: परमात्मन: श्रीकृष्णस्य निन्दां करोति। भगवतो निन्दाया: कतिपयपद्यानि कविना लिखितानि तेष्विदमेकतमम्।

अस्य पद्यस्य भावार्थस्त्वेवं वर्तते। यथा-विश्वस्मिन् लक्ष्म्या (राजलक्ष्म्या) विरहितोऽपि कस्यचिदुदधिपुरुषस्य तनयाया यस्याः कुलजनैर्लक्ष्मीः नाम कृतम्, तस्या: पतिस्त्वं तस्मात्कारणादेव त्वं श्रीपतिरसि न तु यथार्थरूपेण राजलक्ष्म्या युक्तो वर्तसे इति भाव:।

---

१ (पद्य-३९) इति आरभ्य चतुस्त्रिंशच्छलोकान् मल्लिनाथ; प्रक्षिप्तान् मत्वा न व्याख्यातवान्। मोहमाय्यां मुद्रितपुस्तके तु वल्लभदेवव्याख्यया सहैते सङ्ग्रहीता:। परं सा व्याख्या अस्मदादर्श-पुस्तकाद्भिन्नरूपेति द्विधापि सङ्गृहीताऽस्माभिरत्र। **शिशुपालवधम्** (१५-३९); चौखम्बा; पृ ५२७

अत्र वल्लभदेवमल्लिनाथयोर्व्याख्याविचारो विधीयते तर्हि मल्लिनाथेनात्र 'उदधिकन्या' पदस्यार्थोऽब्धिकन्येति कृतः। अनेन समुद्रस्य तनया लक्ष्मीः यया सह भगवतो विष्णोर्विवाहो जातः, स विष्णुरेव कृष्ण इति विमतिर्भवितुं मर्हति। परमत्र शिशुपालस्तु भगवन्तं निन्दति। स्वयंवरसमये सर्वान् देवान् परित्यज्य लक्ष्म्या विष्णुरेव पतिरूपेण स्वीकृत इति तस्य विजयो यदि शिशुपालस्तां लक्ष्मीं लक्ष्यीकृत्य वदति तर्हि श्रीकृष्णस्य सा स्तुतिर्भविष्यति। अतो मल्लिनाथस्यार्थविचारे पूर्वकथिता समस्या भवितुमर्हति।

वल्लभदेवेनास्य श्लोकस्यार्थविवेचने 'उदधिर्नाम गोलिकः आभीरः' इत्यर्थः कृतः। वल्लभवल्लभस्तु बहुवल्लभस्तस्मात् तस्य भार्यासु काचित् लक्ष्मीनामधेया भवेत् तस्या एव नाम गृहीत्वा शिशुपालेन लक्ष्मीपतिपदस्य निन्दा क्रियते।

अनेनेदं ज्ञायते यत् मल्लिनाथापेक्षया वल्लभदेवस्यार्थचिन्तनं विशेषं स्पष्टं वर्तते इति पद्यविवेचनादस्मात् ज्ञायते।

**शकटं व्युदास तरुभङ्गधरणिधरधारणादिकम्।**
**कर्म यदयमकरोत्तरलः स्थिरचेतसां क इव तेन विस्मयः।।(१५-३७)**

अत्रापि पूर्वश्लोकवत् क्रुद्धेन शिशुपालेन भगवतः श्रीकृष्णस्य पराक्रमनिन्दा विधीयते।

यथा - अनेन तरलेन (चञ्चलेन) कृष्णेन शकटनाशः कृतः (शकटासुरनाशः कृतः), वृक्षनाशः कृतः (यमलार्जुनवृक्षनाशः कृतः), एतानि सर्वाण्यपि कर्माणि स्थिरचित्तवतां नाश्चर्याय।

अत्र मल्लिनाथेन पूर्वकथितः सामान्यार्थ एव दर्शितः। परं वल्लभदेवेनात्र विचारितं स्याद् ये भगवतः परमभक्तास्तत्समर्पितचेतसो वर्तन्ते तेषां मनसि कदाचिद्दुःखं स्यात्, तस्मात् निन्दायुक्तमर्थ दर्शयित्वा स्तुतियुक्तोऽप्यर्थस्तेन कृतः। वल्लभदेवेनात्र "तरलः तरन्ति संसारसागरमिति तराः योगिनः, तान् लाति स्वीकरोति इति तरलः"। तथा विलिख्य तरलपदस्य परमात्मेत्यर्थः कृतः। यदि सामान्यजन एतादृशानि विशेषाद्भुतकार्याणि करोति तदा जनानां विस्मयो भवति, परं परमात्मा यद्येवं कर्म करोति तत्र स्थिरचेतसां विस्मयो नैव स्यादिति भावः।

अत्रापि मल्लिनाथद् वल्लभदेवस्यार्थचिन्तनवैशिष्ट्यं दृश्यते।

**चलितं ततोऽनभिहितेच्छमवनिपतियज्ञभूमितः।**
**तूर्णमथ ययुमिवाऽनुययुर्दमघोषसूनुमवनीशसूनवः॥(१५-६९)**

पञ्चदशसर्गस्य पद्येऽस्मिन् भगवतः श्रीकृष्णस्य यज्ञे पूजनं भवतीति कृद्धः शिशुपालो गच्छति, तथाऽन्ये नृपाः अपि तमनुगच्छन्ति तद्वर्णनं महाकविना माघेनेत्थं कृतम्।

यथा - यदा राज्ञो युधिष्ठिरस्य यज्ञभूमितोऽप्रतिहतमनोरथं प्रयाते शिशुपाले राजपुत्राः तत्क्षणमेवाश्वमेधयज्ञाश्वमिवान्वगच्छन्।

अश्वमेधाश्वतुल्यः शिशुपाल इत्यस्य विवरणं कुर्वन् वल्लभदेवः कथयति यत् अश्वमेघयज्ञेऽ श्वोऽग्रे गच्छति तत्पश्चाच्च राजपुरुषाः गच्छन्ति। अतः शिशुपालस्य तुलनाऽश्वेमेधाश्वेन सह कृता कारणं शिशुपालोऽग्रे गतस्ततश्च राजपुत्रा जग्मुः। वल्लभदेवेन तत् साम्यं तथा दर्शितम्। न तत्र किमपि विशेषमुक्तम्।

मल्लिनाथेनापि शिशुपालस्याश्वमेधाश्वसाम्यं तथैव दर्शितम्, परं तत्र यज्ञेऽश्वमेधाश्ववधो भवति, तथैवात्रापि शिशुपालवधो भविष्यति। तादृशोऽस्य 'पद्यस्य शिशुपालाश्वसाम्येनार्थो ज्ञातव्यः। अत्र शिशुपालस्याश्वमेधाश्वेन सह साम्यमित्युपमालङ्कारः। तेनालङ्कारेणान्यो गर्भितार्थो व्यंग्यार्थो ज्ञायते तस्मादत्रालङ्कारेण वस्तुध्वनिरिति मल्लिनाथस्य विशेषं चिन्तनं प्रशंसार्हम्।[२]

✸✸✸

[२] अश्वमेधीयाश्वोपमया चैद्यस्य वध्यत्वं व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः॥ - इति मल्लिनाथः॥
**शिशुपालवधम्** (१५-६९); निर्णयसागरप्रेसः पृ. ३९२

# प्रकरणम्-१०  - युद्धवर्णनम्

## सर्गः-१६

## दूतसंवादः

महाकविमाघविरचितशिशुपालवधमहाकाव्यस्य षोडशे सर्गे सक्रोधं प्रयातस्य शिशुपालस्य दूतेनागत्यारम्भे कतिपयपद्यैर्भगवतः श्रीकृष्णस्य श्लेषान्वितवाक्यैः स्तुतिः क्रियते। अन्यच्च तस्य कथनस्य तात्पर्यं शिशुपालशरणमथवा युद्धमेव परिणामः। ततो भगवता कृष्णेन प्रेरितः सात्यकिः प्रत्युत्तरं यच्छति, अत्र क्षमाशौर्यमुभयमपि दृश्यते। ततश्चातुर्यसमन्वितवाक्यैर्दूतेन संवादः पूर्णतां प्रापितः।

अत्र वल्लभदेवेमल्लिनाथयोः टीकयोः दृष्टिः क्रियते, तर्हि वल्लभदेवस्यार्थ विवेचनं सरलं तस्मात् समीचीनञ्च वर्तते। दूतवाक्येषु श्लेषत्वात् क्वचिदर्थभेदोऽपि दृश्यते। क्वचिदलङ्कारविषये मतभेदो दृश्यते।

मल्लिनाथस्य विवेचनं सारभूतं रसादिचर्चासमन्वितं ध्वन्यर्थयुक्तं वृत्तपरिचय पूर्णमलङ्कारलक्षणयुक्तञ्च वर्तते।

उभयोरपि विवेचकयोः श्लेषध्वनिमध्ये मतभेदः प्रवर्तते।

**शिरसा प्रणतः करिष्यते सकलैरेत्यसमं नराधिपैः।**

**तव शासनमाशु भूपतिः परवानद्य यतस्त्वयैव सः।। (१६-४)**

षोडशे सर्गारम्भे शिशुपालप्रेषितः स दूतोऽर्थद्वयान्वितानि वचनानि भगवन्तमुपगम्य भाषते।

पद्येऽस्मिन् दूतवाक्येषु विद्यतेऽर्थद्वयम्। यथा- अनुकूलार्थः- स राजा शिशुपालो मस्तकेन नतः सन् सर्वैर्नृपैः सहागत्याचिरादेव तवाज्ञापालनं विधास्यति। तत्र कारणमिदं सः चैद्यः भवतैवनाथवान्। अर्थात् त्वमेव तस्य स्वासी वर्तसे। प्रतिकूलार्थः- अन्यैः राजभिर्मस्तकैर्नतः सः शिशुपालः सर्वैर्नृपैः सहागत्य तव निग्रहं करिष्यति। यः शिशुपालः शिरसाऽप्रणतो वर्तते। कस्मान्निग्रहं करिष्यति यतस्त्वया कृष्णेनैव स शत्रुवान् वर्तते।

अत्र पाठभेदो वर्तते यथा-"शिरसा प्रणतः......" अपरः "प्रणतः शिरसा....." वल्लभदेवेनाद्यः पाठः स्वीकृतः, येन कारणेनात्र शिरसा + अप्रणतः = शिरसाप्रणतः, तथा च शिरसा प्रणतः तथा वयमर्थद्वयं कर्तुं शक्नुमः। 'शिरसा अप्रणतः' तद्विशेषणं शिशुपालस्यौद्धत्यं दर्शयति, तथा च शिरसाप्रणतः (अन्यनृपैः) तद्विशेषणं तस्य सामर्थ्यं सूचयति। एवमत्र वल्लभदेवेनात्रार्थद्वयं लिख्यते।

मल्लिनाथेनात्र "प्रणतः शिरसा...." इति पाठः स्वीकृतस्तस्मादत्रैकेनैवार्थेन भूयते। यथा सः चैद्यः "शिरसा प्रणतः" अर्थात् सर्वेऽपि राजानस्तं नमन्ति स्म।

शिशुपाल उद्धतो बलवाँश्चासीत् तस्माद् वल्लभदेवस्वीकृतः "शिरसाप्रणतः...." पाठोऽधिकप्रशंसनीय इति भावः।

**समरेषु रिपून् विनिघ्नता शिशुपालेन समेत्य सम्प्रति।**
**सुचिरं सह सर्वसात्वतैर्भव विश्वस्तविलासिनीजनः।। (१६-१४)**

शिशुपालवधस्य षोडशसर्गस्यास्मिन्पद्ये शिशुपालस्य विचक्षणो दूतोऽर्थद्वयसमन्वितानि वाक्यानि निवेदयति। येषां वाक्यानामेकोऽनुकूलोऽर्थो द्वितीयः प्रतिकूलोऽर्थो भवति।

यथा प्रियार्थः- हे कृष्ण! सङ्ग्रामेषु शत्रुनाशं कुर्वता शिशुपालेन सह सन्धिं कृत्वा सर्वैः र्यादवैः सह सुचिरं विश्रब्धनारीलोको भव।

अप्रियार्थ- शत्रुनाशं कुर्वता शिशुपालेन सह सङ्गत्य सम्प्रत्येव सर्वयादवैः सह त्वं विधवयुवतिको भव।

पद्येऽस्मिन् शिशुपालनाम सार्थकं वर्तते तादृशं वल्लभदेवस्य मल्लिनाथस्य च मतम्। किन्तु वल्लभदेवेन लिख्यते यद् यदा यादवानां युष्माकं मरणं भविष्यति तदा युष्माकं शिशूनयं पालयिष्यति तस्मात् सत्यं शिशुपालनाम चरितार्थमिति। मल्लिनाथेनात्र शिशुपालनाम साभिप्रयमेव स्वीकृतम्। परं तेन शिशव एव निर्दोषा अनुद्धता भवन्ति तस्मादयं तेषामेव पालयिता नोद्धततानामयं पालकः, यादवास्तूद्धता वर्तन्ते तस्मात् तेषां तु नाशमेव करिष्यतीति भावः।

अत्र शिशून् पालयतीति शिशुपालस्तथा वल्लभदेवस्य विवेचनं समीचीनं परं न सङ्गतं न चार्थानुकूलम्। तदपेक्षया मल्लिनाथस्यार्थो नाभिधया प्राप्यते तथापि यादवानां नाशमिच्छतः शिशुपालस्यार्थो यदनुद्धतानां पालयितेति समीचीनः पद्यस्यार्थानुरूपश्च वर्तते।

**नरकच्छिदमिच्छतीक्षितुं विधिना येन स चेदिभूपतिः।**
**व्रतमेतु न हापयिष्यते सदृशं तस्य विधातुमुत्तरम्।। (१६-३३)**

षोडशसर्गस्यास्मिन् पद्ये यदा शिशुपालदूत आगत्य भगवतो निन्दायुक्तां स्तुतिं विदधाति तदा भगवता कृष्णेन प्ररितः सात्यकिरित्थं भणति।

यथा- सः शिशुपालो नरकान्तकं कृष्णं येन प्रकारेणावलोकयितुमिच्छति तेन प्रकारेणावलोकयितुं त्वरितमेवागच्छतु; तदागमनानुकूलमुत्तरं विधातुं न हापयिष्ये। अर्थात् मैत्रीभावं शत्रुभावं यथेच्छं स्वीकृत्यागच्छतु तदनुकूलः प्रतिभावस्तेनावश्यं प्राप्स्यते।

अत्र यथोत्तररामचरिते भवभूतिकृतनाटके प्रथमाङ्के भगवतो रामस्य लोकाराधनाय सीतामपि निःशङ्कं त्यक्ष्यामीति वाक्येन सीतात्यागप्रसङ्गस्य पूर्वसूचनं प्राप्यते[१], तथैवात्रापि वल्लभदेवेन भगवतः श्रीकृष्णस्य नरकच्छिद् विशेषणेन सूचितम्[२]।

अत्र स्मरणीयं यन्मल्लिनाथेन पञ्चदशसर्गे 'चलितम्....(१५-६१)' पद्येऽश्वमेधीयाश्वोपमयेदं शिशुपालवधाख्यं कर्म दर्शितम्।

उभयोरपि विवोचकयोर्विचारः प्रशस्यो वर्तते। परं मल्लिनाथेनोक्तं सूचनं व्यङ्ग्यार्थसिद्धं वर्तते, तथा च वल्लभदेवस्य यत्कथनं तत्कवेरपि विशेषणेनेदमेव कथनीयं वर्तते। अतो मल्लिनाथस्य भविष्यत्सूचने सौन्दर्याधिक्यं दृश्यते।

---

१ स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा।। उत्तररामचरितम्(१-१२) पृ. २२.

२ वैरायमाणो नूनमसौ मरिष्यतीति नरकच्छिद्ग्रहणेन सूच्यते।।- इति वल्लभदेवः।शिशुपालवधम् (16-33) पृ.178.

**लोकालोकव्याहतं घर्मरश्मेः शालीनं वा धाम नाऽलं प्रसर्तुम् ।**
**लोकस्याग्रे पश्यतो धृष्टमाशु क्रामत्युच्चैर्भूभृतो यस्य तेजः।।(१६-८३)**

षोडशसर्गे सात्यकिवचनश्रवणानन्तरं शिशुपालदूतेन पुनरपि कथ्यते। पद्येऽस्मिन् शिशुपालप्रतापवर्णनं तत्प्ररितदूतेनोच्यते। यथा- लोकालोकपर्वतवारितं सप्तसप्तेस्तेजः सलज्जमिव सर्वत्र प्रसर्तुं न शक्नोति। परं विलोकयतो जनस्य यस्य राज्ञस्तेजो धृष्टमिव सम्मुखस्थितानुन्नतानपि नृपान् पर्वतान् च क्रामति।

अत्र पराजितः सलज्जमिव सर्वत्र सव्रीडत्वाद् भ्रमणं कर्तुं न शक्नोति, तथा च धृष्टस्तु सर्वत्र भ्रमति तादृशो व्यावहारिकोऽर्थो वल्लभदेवेनात्र विशेषरूपेण स्पष्टीकृतः। तदपेक्षया मल्लिनाथेन पद्यस्यार्थविस्तरो न क्रियते।

अत्रान्यदपि चिन्तनीयं यद् वल्लभदेवनात्र पद्यस्यास्य वृत्तविवेचने 'मालिनीवृत्तम्' लिखितम्। यद्यपि मालिनीवृत्तस्य लक्षणं वृत्तोल्लेखं यो विदधाति स एव मल्लिनाथोऽत्र सन्दिग्धस्थले लक्षणं न लिखतीति चित्रम्। यतो हि स्थानेऽस्मिन् वृत्तलक्षणस्य विशेषावश्यक्ता वर्तते, कारणं यः कश्चिन्मालिनीशालिनीवृत्तलक्षणं नो वेत्ति तस्यात्र सन्देहनिवृर्त्तिर्भवेत्[३]। मल्लिनाथेन ज्ञायते यत् तेन वल्लभदेवात् किञ्चिदपि भिन्नं भवति तत् सन्दिग्धं मास्त्वति।

***

[३] मालिनीवृत्तम्- ननमययुतेयं मालिनी भोगिलोकैः।।
वृत्तरत्नाकरः (३-८७) पृ. १००.

# सर्गः १७
# उभयसैन्यसमागमः

शिशुपालवधस्य सप्तदशे सर्गे महाकविना यो दूतवाक्य मरुता महाप्रलयकालसदृशो यादवाब्धिश्चञ्चलीकृतस्य तस्य युद्धोत्साहवर्णनञ्च सैन्यवर्णनञ्च कृतम्।

वल्लभदेवेनात्रार्थविवेचनातिरिक्तं न किमपि विशेषं विवेचनं कृतम्। अत्र कतिपय- शब्दानां विवेचनं तस्य श्लाघ्यं यथा- निर्जलोऽपि घनो जलधर उच्यते (१७-५६)। क्वचित् सानुप्रासं विवेचनं विलोक्यते। यथा-"कोकिलावलीमलीमसाः = परभृतमालामलिनाः (१७-५७)।" क्वचित् पाठभेदोऽपि दृश्यते।

मल्लिनाथेनापि पूर्ववदेवात्रार्थविवेचनं सामान्यरूपेण विहितम्। रसालङ्कारादीनां चर्चा यथावसरं कृता। वृत्तपरियोऽपि सलक्षणं लिखितः (१७-१)। क्वचित् 'स्थूरीपृष्ठः = नवारूढोऽश्व' इति शब्दपरिचयोऽपि लिख्यते।

मल्लिनाथेन सैन्यस्य चित्रमपि दातुं यत्नः क्रियते। एवं मल्लिनाथस्य विवेचनं शास्त्रचर्चासमन्वितं वर्तते।

एवमुभयोरपि विवेचकयोर्विवेचनवैशिष्ट्यं वर्तते। अन्तिमपद्ये च द्वयोरपि अलङ्कारचर्चायामपि मतभेदो दृश्यते। (१७-६९)

**इतीरिते वचसि तरस्विनाऽमुना युगक्षयक्षुभितमरुद्गरीयसि।**
**प्रचुक्षुभे सपदि तदम्बुराशिना समं सहाप्रलयसमुद्यतं सदः।। (१७-१)**

सप्तदशसर्गस्य प्रथमोऽयं श्लोको विद्यते। अथ पद्यस्यास्यार्थो विचार्यते। यदा शिशुपालदूतेन पूर्वलिखितमुक्तं तत् प्रलयकालमरुत्तुल्यमासीत्, तस्मात् तद्वाक्यपवनेन महाप्रलयार्थं कृतसङ्कल्पः सागरतुल्यं सदः क्षुभितमासीत्।

महाकाव्येषु प्रायः यस्मिन् कस्मिन्नपि सर्गे किमप्येकं प्रसङ्गानुरूपं वृत्तं भवति, यतो हि दुःखावसरे प्रायो मन्दाक्रान्तावृत्तं वा वियोगिनीवृत्तं भवति। सर्गान्ते भिन्नवृत्तानि भवन्ति, परं क्वचित् केचन कवयो वृत्तज्ञानं दर्शयन्तोऽपवादरूपाः सन्तो भिन्नभिन्नवृत्तान्वितानि पद्यानि रचयन्ति, यथा माघेन चतुर्थसर्गे नानावृत्तानां परिचयो दत्तः। परं यत्रैकं वृत्तं भवति तत्रादावेवोल्लेखः क्रियते तर्हि परिभाषावत्समस्तं सर्गं ज्ञापयति। तस्मान्मल्लिनाथेनात्र 'रुचिरावृत्तं'

तल्लक्षणञ्च लिखितम्[१]। वल्लभदेवेनापि वृत्तपरिचयस्तु दत्तः किन्तु सर्गान्ते (१७-६८) दत्तः। तस्मादेकस्यैव वृत्तस्य परिचयो ज्ञायते, अन्यद्वा समस्तं सर्गं पठित्वा पाठकस्य वृत्तज्ञानं भवेत्। वल्लभदेवापेक्षया मल्लिनाथस्य वृत्तपरिचयविन्यास उचितस्थानसमयत्वाद् विशेषोपकारको जायते। लेखनेऽपि कालौचित्यं स्थानौचित्यं विशेषं महत्त्वं धारयति[२]। तस्मान्मल्लिनाथस्यादौ वृत्तनामलक्षणोल्लेख एव समीचीनो भाति।

**यथा यथा पटहरवः समीपतामुपागमत् स हरिवराऽग्रतः सरः।**
**तथा तथा हृषितवपुर्मुदाकुला द्विषां चमूरजनि जनीव चेतसा।। (१७-४३)**

सप्तदशसर्गे द्वयोरपि सैन्ययोर्योद्धारो युद्धाय सज्जीभूता वर्तन्ते। पद्येऽस्मिन्नपि तदेवं वर्णनं वर्तते।

यथा- यथा भगवद्वरपुरःसरःपटहध्वनिः सामीप्यमधारयत् तथा तथा रोमाञ्चिता शत्रुसेना वधूरिव चेतसा वरमेलनाय हर्षान्विता जाता।

अत्र वल्लभदेवविवेचने सामान्यार्थप्रतीतिरेव भवति। परं मल्लिनाथस्य विवेचनेन विशेषार्थोऽप्यवगम्यते। यथा तेनात्र प्रतिद्वन्द्विसमागमो वरवधूसमागमवद् वीराणामानन्ददायको भवति। अत्रान्योऽप्येको व्यंग्यार्थस्तेन दर्शितः।

ध्वनिश्रवणेन कविनेदं कथ्यते यत् सेनाद्वयं परस्परशब्दश्रवणसमर्थं वा तथा समीपमवर्तत।[३]

यदा पाठकाः काव्यविवेचनं पठन्ति तदा काव्यनिहितविचारानुरूपां कल्पनामपि कुर्वन्ति तत्र मल्लिनाथस्य विवेचनं वर्णनानुरूपं चित्रमपि दातुं सफलं यत्नं करोतीति तस्य विवेचनस्य विशेषता। अन्यच्च स ध्वन्यर्थदर्शने सशक्तो विवेचक इत्यनेन सिध्यति।

✵✵✵

---

१ रुचिरावृत्तलक्षणम् – चतुर्ग्रहैरिह रुचिरा जम्भस्जगाः इति।। - मल्लिनाथः।। शिशुपालवधम् (१७-१) निर्णयसागरप्रेस पृ. ४२६.

२ काले दत्तं वरं स्तोकमकाले बहुनाऽपि किम्। (कस्यचित्)

३ तेन सैन्ययोरन्योन्यशब्दश्रवणकारिणी प्रत्यासत्तिरासीदिति व्यज्यते।। इति मल्लिनाथः।। शिशुपालवधम् (१७-४३) निर्णयसागरप्रेसः पृ. ४३७

# सर्गः-१८

## सङ्कुलयुद्धवर्णनम्

शिशुपालवधमहाकाव्यस्याष्टादशसर्गे महाकविना युद्धवर्णनमेव कृतम्।

अथ वल्लभदेवमल्लिनाथयोर्विवेचनविचारः क्रियते। यथा – वल्लभदेवेनार्थप्रतिपादनं समीचीनं विधीयते। मल्लिनाथेन सारभूतं विवेचनं क्रियते। मल्लिनाथेनालङ्कारविचारः प्रतिश्लोकं कृतः, परं वल्लभदेवेन क्वचिदेवालङ्कारविचारः प्रस्तूयते। मल्लिनाथेन क्वचिद् वल्लभदेवस्य विवेचने प्रमादोऽपि दर्शितः।(१८-२७)

**क्रुध्यन् गन्धादन्यनागाय दूरादारोढोरं धूतमूर्धाऽवमत्य।**
**घोरारावध्वानिताशेषदिक्के दिक्के नागः पर्यणंसीत् स्व एव।। (१८-२७)**

अष्टादशसर्गे युद्धवर्णनं वर्तते। शिशुपालवधस्य कवेर्माघस्य हर्षचरितरचयितुर्बाणभट्टस्येव गजवर्णनप्रीतिर्विशिष्टा प्रतिभाति। पद्येऽस्मिन्नपि कस्यचिद् गजस्य वर्णनमस्ति।

यथा- कश्चिद्गजः प्रतिगजाय मदगन्धाद् दूरादेव रुष्यन् यन्तारमवधूय प्रकम्पितशिराः रौद्रशब्दैः सर्वा अपि दिशा येन मुखरीकृतास्तादृशे स्वकीये पुत्र एव तिर्यक्प्रहारं कृतवान्।

अत्र वल्लभदेवमल्लिनाथयोर्विवेचने दृष्टिर्विधीयते। पद्येऽस्मिन् द्वौ गजौ स्तः, एकस्य गजस्य कृते 'नागः' पदमन्यस्य कृते 'दिक्कः' इति पदं वर्तते। दिक्कपदस्य वल्लभदेवेनाष्टादशवर्षीयः करीति कृतः[१], अपरगजस्य मल्लिनाथेन "पर्यणंसीदिति तिर्यक्प्रहारमकरोदिति" क्रियापदेन हलायुधप्रमाणं दत्त्वा परिणतो गज इत्यर्थः कृतः[२]। एवं द्वावपि टीकाकारावेकमेकं गजं वर्णयतः।

---

[१] अष्टादशवर्षः करी दिक्क उच्यते।। - इति वल्लभदेवः।।
शिशुपालवधम् (१८-२७); सैव श्रीनगरस्यावृत्तिः, पृ. २२५.

[२] तिर्यग्दन्तप्रहारस्तु गजः परिणतो मतः इति हलायुधः।। इति मल्लिनाथः।।
शिशुपालवधम् (१८-२७) निर्णयसागरप्रेस; पृ. ४५२.

एवमनयोर्द्वयोरपि टीकापठनं क्रियते तदा सम्पूर्णं ज्ञानं भवितुमर्हति। अतोऽनेन ज्ञायते यद् व्याख्याद्वयमपि परस्परसंलग्नं वर्तते।

अत्रान्यदपि चिन्तनीयं यत्- महाकविना माघेनात्र ‘स्व एव दिक्के’ इति लिखितम्। सामान्यरूपेण ‘सर्वनामत्वादत्र’ “स्वस्मिन्नेव दिक्क” इति लेखनीयं भवति। परं माघस्तु तथाविधानप्रचलितप्रयोगान् कर्तुं विशेषं यतते। एतस्य समाधानं वल्लभदेवेन “ज्ञातित्वादत्र सर्वनामाभाव” इति लिखितम्। तेन ‘स्वे’ इत्यस्य ‘स्वपुत्रे’ तथार्थः कृतः, तथा च पुत्रः कथं न जातिरर्थज्ज्ञातिरेव। अतस्तत्र सर्वनामावश्यकता न वर्तते[३]।

मल्लिनाथेनात्र वल्लभदेवस्येत्थं विवेचनं विलोक्य लिखितं यदेतद्विवेचनं प्रमादजनितं वर्तते[४]। कारणं “पूर्वादिभ्यो नवभ्यो वा” इति सूत्रेण विकल्पात् स्मिन्नादेशो न भवति तस्मादेतस्यावश्यकता नास्ति। अनेन विवेचनेन वल्लभदेवान्मल्लिनाथस्य लेखनजागृतिस्त्वगम्यत एव परमनेन माघकवेर्व्याकरणज्ञानमपि प्रौढमिति ज्ञातुं शक्यते।

अत्रेदमुल्लेखनीयं यद्वल्लभदेवेन स्वज्ञातिधनाख्यायाम् –(१/१/३५) सूत्रमाश्रित्य विवेचनं क्रियते, परं मल्लिनाथमतेन पूर्वादिभ्यो नवभ्यो वा- (७/१/१६) अत्रेदं सूत्रं प्रवर्तते। अतः सूत्रभेदादत्र चिन्तनभेदो दृश्यते।

मल्लिनाथेनात्र ‘दिक्क’ इति स्थाने ‘विष्क’ इति पाठभेदः स्वीकृतः तस्माच्चात्र गजयोर्वयसी भेदो भवितुमर्हति[५] ।

**प्रत्यासन्ने दन्तिनि प्रातिपक्षे यन्त्रा नागः प्रास्तवक्त्रच्छदोऽपि।**
**क्रोधाक्रान्तक्रूरनिर्दारिताक्षः प्रेक्षाञ्चक्रे नैव किञ्चिन्मदाऽन्धः।।**(१८-२८)

अष्टादशसर्गस्यास्मिन्पद्येऽपि महाकविना माघेन गजस्यैव वर्णनं कृतम्।

---

३ स्वे इति ज्ञातित्वात् सर्वनामसंज्ञाऽभावः।। इति वल्लभदेवः।।
शिशुपालवधम् (१८-२७) सैव श्रेनगरस्यावृत्तिः, पृ. २२५.

४ पूर्वादिभ्यो नवभ्यो वा इति विकल्पान्न स्मिन्नादेशः। अत एव स्वे स्व पुत्रे विष्क इति श्लिष्टगत्या व्याख्याय पुत्रस्यापि ज्ञातित्वान्न सर्वनामसंज्ञेति वल्लभोक्तिः प्रमादिकी।। इति मल्लिनाथः।।
शिशुपालवधम् (१८-२७) निर्णयसागरप्रेसः पृ. ४५२.

५ (मल्लिनाथेन दिक्कस्य स्थाने विष्कशब्दः स्वीकृतः इति पाठभेदः तेन विष्कशब्दस्य विंशतिवर्षक इत्यर्थः कृतः। पाठभेदेनात्र गजे भेदो भवितुमर्हति।)

यथा- शत्रोर्गजे प्रत्यासन्ने सत्यप्यारोहेण यस्य मुखावरणं दूरीकृतं तादृशः कश्चिद्गजराजः कोपनिर्भरभीषणविवृत्तनयनोऽपि मदान्धो न किमपि विलोकयितुं शक्तोऽभवत्।

अत्र मल्लिनाथेन गजवर्णनमेव दर्शितम्। परं वल्लभदेवेन गजस्य वर्णनेन सामाजिकमपि दर्शनं कर्तुं यत्नो विहितः। यथा भर्तृहरिणा नीतिशतके स्वात्मानं लक्ष्यीकृत्य लिखितं यद् यदाऽहमल्पज्ञ आसम् तदा गज इव मदान्ध आसम्[६]। ततः शनैः शनैर्विदुषां सम्पर्काज्ज्वर इव मदो व्यपगतः। अनेनापि वल्लभदेवेन तथैवोक्तं यथाऽत्र मदान्धा अभिमानिनो जना भवन्ति तेऽपि निरर्थकाभिमानादन्यं जनं विलोकयितुं न प्रभवन्ति। अर्थान्मदान्धा जना अन्यैः सह सम्यग्विनयान्वितं व्यवहारं न कुर्वन्ति।

अत्रास्माभिर्वल्लभदेवस्य सामाजिकी दृष्टिर्विलोक्यते।

**स्वर्गेवासं कारयन्त्या चिराय प्रत्यग्रत्वं प्रत्यहं धारयन्त्या।**

**कश्चिद् भेजे दिव्यनार्या परस्मिंल्लोके लोकं प्रीणयन्त्येह कीर्त्या॥(१८-६२)**

अष्टादशसर्गस्य पद्येऽस्मिन् कस्यचिन्मृत्युं प्राप्तस्य वीरस्य वर्णनं वर्तते।

यथा- कश्चिद् वीरश्चिरकालपर्यन्तं नाके वासं कारयन्त्याः, प्रतिदिवसं नवीनतां धारयन्त्या, लोकं प्रीणयन्त्याः, दिव्यनार्याः कृते परलोके वास्मिन् लोके कीर्त्याः कृते मृत्युं गतः।

पद्यऽस्मिन् नास्ति निष्फलता रणे इति भगवद्वचनानुसारं युद्धे मरणेनापि स्वर्गे देवाङ्गनाप्राप्तिर्भवति मर्त्यलोके च कीर्तिप्राप्तिर्भवतीतिभावः[७]।

अत्र वल्लभदेवेन श्लेषालङ्कारो दर्शितः। परं यत्रैकस्यैव पदस्य बहवोऽर्था भवन्ति तत्र श्लेषालङ्कारो भवति। अत्र तु दिव्याङ्गनायाः कीर्तेश्च विशेषणानि

---

६ यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्धः सम्भवम्
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः।
यदा किञ्चित् किञ्चिद् बुधजलसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः॥ नीतिशतकम् (८) पृ. ७

७ हतो वा प्राप्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्।
तस्मादुत्तिष्ठ कौन्तेय! युद्धाय कृतनिश्चयः॥ **श्रीमद्भगवद्गीता (२-३७) पृ. ४८.**

समानानि वर्तन्ते, अर्थात् दिव्याङ्गनायाः कीर्तेश्च समानो धर्मो वर्तते, कारणं देवाङ्गनामभिलष्य जनः स्वर्गं याति तथैव कीर्तिमप्यभिलष्य जनः स्वर्गं याति[८]। सामान्यनारी दिने दिने जीर्णतां याति, परं देवाङ्ना प्रतिदिनं नूतनत्वं प्राप्नोति तथैव कीर्तिरपि प्रतिदिवसं नवीनायते। देवाङ्गनापि प्रसन्नतां तनोति तथैव कीर्तिरपि प्रसन्नतां ददाति।

पूर्वविवेचनानुसारं देवाङ्गनायाः कीर्तेश्चैको धर्मः स च विशेषणैरवगम्यते, किन्तु नात्रार्थबहुत्वं वर्तते। तस्मादत्र न श्लेषालङ्कारः[९]।

मल्लिनाथेन पद्यस्यास्य विवेचने देवाङ्गनायाः कीर्तेश्चैकधर्मत्वादत्र तुल्ययोगितालङ्कारः कथितः।

माघेऽलङ्कारविमर्शेऽपि पद्येऽस्मिन् तुल्ययोगिताऽलङ्कार एव दर्शितः[१०]। तस्मादत्र मल्लिनाथस्य मतं दृढमपि सुदृढं जायते। अनेनेदमपि विलोक्यते यद् वल्लभदेवान्मल्लिनाथस्यालङ्कारदर्शनं सूक्ष्मं साहित्यशास्त्रानुरूपञ्च वर्तते।

**निम्नेष्वोधीभूतमस्त्रक्षतानामस्त्रं भूमौ यच्चकासाञ्चकार।**
**रागार्थं तत्किं नु कौसुम्भमम्भः संख्यानानामन्तकाऽन्तःपुरस्य।। (१८-६१)**

अष्टादशसर्गे युद्धवर्णनं वर्तते। अस्मिन् श्लोकेऽपि युद्धेनैकत्रीभूतस्य रक्तौघस्य वर्णनं वर्तते।।

यथा- भूमेर्निम्नभागेष्वस्त्रक्षतानां मानवगजतुरङ्गानां यद्रुधिरं प्रकाशते स्म, तत् किं यमदेवस्यान्तःपुरस्याम्बराणां रागार्थं कौसुम्भं जलं भवेत्।

अत्र कौसुम्भेनाम्भसा सह रक्तस्योपमानसम्बन्धो दर्शितः। कौसुम्भमम्भ उपमानं रक्तञ्चोपमेयं रक्तरागो वा तद्गतरक्तिमा साधारणधर्मो विद्यते।

---

[८] रणाद्धिरोदसी यस्य यावत्कीर्तिरनश्वरी।
तावत्कीर्तिर्मनुष्यस्य स्वर्गे लोके च गीयते।
तावद्देही वसेत्स्वर्गे कुरुतेऽमृतभोजनम्।। इति वल्लभदेवः।। शिशु. (१८-६२) चौखम्बा पृ. ३०६.

[९] श्लेषः स वाक्ये एकस्मिन् यत्रानेकार्थता भवेत्। काव्यप्रकाशः (१०-९६) पृ. ३६६.
श्लिष्टमिष्टमनेकार्थमेकरूपान्तर्वि वचः। काव्यादर्शः (२-३१०) पृ. २९९.
श्लेषो नानार्थैर्वर्ण्यवस्तुनि।। इति अमिचन्द्रयतिः।। काव्यकल्पलतावृत्तिः
सं. श्री जगन्नाथ शास्त्री प्रका0 चौखम्बा संस्कृत सीरिज, बनारस ई.1988 पृ.48.

[१०] तुल्यधर्मसम्बन्धात् केवलप्रकृतास्पदा तुल्ययोगिता। माघेऽलङ्कारविमर्शः पृ. १८२.
औपम्यस्य गम्यतेवे पदार्थगतत्वेन प्रस्तुतानामप्रस्तुतानां वा समानधर्माभिसंबन्धे तुल्ययोगिता। अलङ्कारसर्वस्वम् (२३) पृ. ८५.
प्रकृतानामेव अप्रकृतानामेव वा गुणक्रियादिरूपैकधर्मान्वयः तुल्ययोगिता। औपम्यंचात्र गम्यम्। तत्प्रयोजकस्य समानधर्मस्योपादानात्। वाचकाभावाच्च। रसगंगाधरः पृ४५५

अत्र किमपि संशयवाचकं पदं वर्तते। तदेव स्वीकृत्य वल्लभतेवेनात्र पद्ये संशयालङ्कारो दर्शितः। परं यत्रोपमेयमेवोपमानं वर्तते तादृशः संशयो भवति तत्रानेनालङ्करेण भूयते[११]। अत्र तु रक्तस्योल्लेखः कृत एव। तथा च स्थाणुर्वा पुरुषः तत्र संशयालङ्कारो न भवति। संशयेन हृद्येन भवितव्यम्। अत्रापि पद्ये तद्-रक्तं किमम्भःकौसुम्भमिति संशयो वर्तते, परं नात्र काचित् चमत्कृतिः। तस्मान्नायं संशयः।

मल्लिनाथेनात्रोत्प्रेक्षाऽलङ्कार उक्तः, कारणं तत्रापि द्वयोर्मध्येऽर्थादुपमेयो-पमानयोर्मध्ये संशयेन सम्भावना क्रियते[१२], अत्रापि रक्तं विलोक्य कौसुम्भपयसः सम्भावना दर्शिता। तस्माददत्रोत्प्रेक्षालङ्कारः सरलतया दृश्यते।

***

[११] संदेहः प्रकृतेऽल्यस्य संशयः प्रतिभोत्थितः। साहित्यदर्पणः (१००-३५) पृ. ७२८.

[१२] मन्ये-शङ्के-ध्रुव-प्रायो-नूनमित्येवमादिभिः।
उत्प्रक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः।। काव्यादर्शः (२-३१०). पृ. २९९

# सर्गः-१९
# द्वन्द्वयुद्धम्

महाकविना माघेन शिशुपालवधमहाकाव्यस्यैकोनविंशे सर्गे युद्धवर्णनं कृतम्। पूर्वसर्गे प्रकीर्णयुद्धवर्णनं वर्तते। अत्र प्रायो द्वन्द्वयुद्धानां चित्रकाव्यानाञ्च बाहुल्यं दृश्यते। तस्मादयं सर्गो विदुषां परितोषाय वैदुष्यदर्शनाय च निर्मितः स्यात्।

अत्र वल्लभदेवमल्लिनाथयोर्विवेचनेषु वृत्तालङ्कारकाव्यादीनां नामोल्लेखो दृश्यते, परं मल्लिनाथेन लक्षणान्यपि लिख्यन्ते तत्तस्य वैशिष्ट्यम्। क्वचिदर्थभेदविषये वल्लभदेवेन श्लेषः स्वीक्रीयते; तर्हि मल्लिनाथेन ध्वनिः स्वीक्रियते। मल्लिनाथस्य चित्रकाव्यलक्षणानि श्लाघ्यानि, कथं तेषां चित्रं कृत्वा ज्ञानं करणीयमित्यपि तेन सम्यक् सूचितम्। अलङ्कारविवेचने मल्लिनाथस्य गहनं चिन्तनं प्रतिभाति। सन्दर्भपद्यलेखने वल्लभदेवस्य प्रशस्यो यमः। शब्दार्थचिन्तनं वल्लभदेवस्य विशेषं समीचीनम्[१] । अर्थविस्तरेऽपि वल्लभदेवस्य प्रावीण्यं नितान्तं प्रशंसनीयम्। तस्मात् पाठकानां तद्विशेषमुपकारकं भवति। एवमुभयोरपि विवेचकयो- र्लेखने किञ्चिन्नावीन्यमपि दृश्यते।

**उल्मुकेन द्रुमं प्राप्य सङ्कुचत्पत्रसम्पदम्।**
**तेजः प्रकिरता दिक्षु सप्रतापमदीप्यत।। (१९-८)**

अस्मिन् सर्गेऽपि युद्धवर्णनमेव वर्तते। पद्येऽस्मिन् बलदेवसुतस्य शौर्यवर्णनं वर्तते।

यथा- आशासु तेजो विक्षिपता "उल्मुकेन" (बलदेवतनयेन) राज्ञा सङ्कुचन्ती वाहनसम्पद् यस्य तं "द्रुमाख्यं" राजानं प्राप्यादीप्यत।

अस्य पद्यस्य वल्लभदेवेन मल्लिनाथेन चार्थद्वयं लिखितम्। एकस्तु पूर्वलिखित एवार्थो विद्यते। अन्यश्च "उल्केन" नामार्धदग्धकाष्ठेन सङ्कुचन्ती पत्रसम्पद् यस्य तादृशं "द्रुमं" नाम वृक्षं प्राप्याऽदीप्यत।

---

[१] निर्दन्तो हि दन्ती मत्कुण उच्यते।। इति वल्लभदेवः।।
शिशुपालवधम् (१९-७१); सैव श्रीनगरस्यावृत्तिः, पृ. २६२.

एकस्मात् पादाद् यत्रार्थबाहुत्वं प्राप्यते तत्र श्लेषालङ्कारो भवति, अत्रापि "उल्मुकपदस्य" बलदेवसुतः अर्धदग्धकाष्ठमित्यर्थद्वयं भवति, तस्माद् वल्लभदेवेनात्र श्लेषालङ्कारः स्वीकृतः।

परं यत्र प्रकरणादेः योऽर्थ आयाति तमेवार्थं प्रकाश्यान्योऽर्थोऽभिधया नियन्त्रितो भवति तत्रान्यार्थप्राप्तिर्ध्वनिरित्युच्यते। अत्रापि प्रकरणात् उल्मुकः नाम बलदेवसुतः द्रुमः नाम तन्नामा कश्चिद् राजा तथार्थोऽभिधया प्रकाश्यान्योऽर्थो नियन्त्रितः, एतस्मात् कारणादत्र ध्वनिरेव न श्लेष इति मल्लिनाथमतम्।

उभयोरपि विवेचकयोः कथनस्य तात्पर्यं तु तदेव परमेकोऽलङ्कारवादी तथा चान्यो ध्वनिवादी तस्माद् दृष्टिभेदादिदं विवेचने परिवर्तनं दृश्यते।

**अन्येन विदधेऽरीणामतिमात्रा विलासिना।**
**उद्गूर्णेन चमूस्तूर्णमतिमात्राविलाऽसिना।। (१९-५०)**

शिशुपालवधस्यैकोनविंशेऽस्मिन् सर्गेऽपि युद्धवर्णनं वर्तते। पद्येऽस्मिन् महाकविना माघेन कस्यचित् शूरस्य शौर्यवर्णनं विहितम्।

यथा- अन्येन केनचिद्वीरेणोद्यतेन खड्गेन शत्रूणां प्रमाणातीता सेना क्षणेनैकेनात्यन्तभयाकुला विहिता।

पद्येऽस्मिन् यमकालङ्कारो वर्तते[२]।

यमकालङ्कारे समानपदानामर्थभेदो भवति। अत्रापि "अतिमात्र" शब्दो द्विवारमागतः। एतस्य विवेचने वल्लभदेवेन "अतिमात्राविला" इत्यस्यार्थः अतिमात्रं नितराम् अविला कलुषा भयाकुला अकारि। पुनः "अतिमात्रा" नाम इतित्वम् अतिक्रान्ता अतिमात्रा सुविस्तीर्णा इत्यर्थः कृतः। मल्लिनाथेनापि तथैव अतिमात्रपदस्य अपरिमिता- अत्यन्तम् चेत्यर्थद्वयं कृतम्।

परं वल्लभदेवनात्र 'मतिमात्रा बुद्धेर्मात्रा जनन्या प्रज्ञेनेत्यर्थः कृतः एवमत्र तेनार्थत्रयं दात्तुं यत्नो विहितः। तस्यायं विशेषार्थचिन्तस्य प्रशस्यो यत्नः परम् 'अरीणाम्' 'तूर्णम्' इति पूर्वपदत्वादित्थं भवितुं नार्हति।

वल्लभदेवस्यास्य पद्यस्य विवेचनेनेत्थं वक्तुं शक्यते यत् तेन कस्यचिदपि पदस्य सम्भवितार्था दीयन्ते, परं तत्र प्रमादजन्या क्वचित् क्षतिरपि जायते।

---

२ यमकलक्षणम्-
सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते।। **साहित्यदर्पणः** (१०-८); पृ. ६७२.

**नामाऽक्षराणां मलना मा भूद्भर्तुरतः स्फुटम्।**
**अगृह्णत पराङ्गानामसूनस्त्रं न मार्गणाः।। (१९-११०)**

अस्मिन् सर्गे युद्धवर्णनं वर्तेते। पद्येऽस्मिन् युद्धप्रवृत्तस्य भगवतः शराणां वर्णनं वर्तते।

यथा- स्वामिनो नामाक्षरेषु मालिन्यं मा भवतु तस्मादिव बाणाः शत्रोः प्राणान् न तु रक्तमपाहरन्।

अत्र वल्लभदेवमल्लिनाथयोर्विवेचनविचारो विधीयते। तयोर्मतेनायं श्लोकोऽतालव्यो विद्यते। यस्मिन् श्लोके इचुयशानामभावो भवति स श्लोकोऽतालव्यः कथ्यते।

अत्र मल्लिनाथेन 'मलना' इत्यस्य स्थाने 'मलिता' इति पाठः स्वीकृतः, तस्मात्पद्येऽस्मिन् समस्येयं सम्भवति यथाऽयमतालव्यः श्लोकः 'मलिता' पदे 'इकार' आयाति तस्य स्थानन्तु तालुः वर्तते। तर्हि त्वयं सतालव्यः श्लोको भवेत्।

परं मल्लिनाथेनात्र लिख्यते यद् व्यञ्जनानामेव गणना करणीया, तस्मात् पद्यमिदमतालव्यमेव भवेत्[३]। परं पाठान्तरमिदं न प्राप्यते तस्मान्मल्लिनाथेन प्रमादवशादिदं लिखितं स्यादथवा केनचित् प्रक्षिप्तं स्यादिति।

✵✵✵

---

३ इचुयशानां तालिवति इवर्णस्यापि तालुत्वेऽपि व्यञ्जनापेक्ष एवायं नियत इति न दोषः।। इति मल्लिनाथः।।
शिशुपालवधम् (१९-११०); निर्णयसागरप्रेसः पृ. ४९५.

# सर्गः-२०
# शिशुपालवधः

महाकविना माघेन विंशे सर्गे युद्धवर्णनं कृतम्। भगवता कृष्णेन विविधान्यस्त्राणि मुक्तानि शिशुपालेनापि विविधान्यस्त्राणि मुक्तानि। एवं द्वयोर्युद्धवर्णनं ततश्चान्ते भगवच्चक्रेणवधः शिशुपालशरीरान्निर्गतस्य तेजसो भगवत्यन्तर्भावः इत्यस्य सर्गस्य वर्णनविषयो विद्यते। अस्मिन् सर्गे महाकाव्यमिदं पूर्णतामेति।

वल्लभदेवस्य मल्लिनाथस्य च टीकायां पूर्ववद् व्याकरणविवेचनमर्थविवेचनञ्च समीचीनं दृश्यते। मल्लिनाथस्य शब्दार्थलिङ्गनिर्णयः प्रशंसनीयः। तस्यालङ्कारे विशेषा दृष्टिस्तु नितान्तं श्लाघ्या वर्तत एव। क्वचिदत्र पाठभेदा दृश्यन्ते, परं मल्लिनाथस्य (२०-६५) पाठभेदेऽर्थानुकूल्यं
क्वचिन्न दृश्यते। एनं विषयमधिकृत्य विशेषचर्चाविहिताऽस्माभिरन्यत्र, सा तु तत्रैव विस्तरेण द्रष्टव्या।

**तडिदुज्ज्वलजातरूपपुङ्खैः खमयःश्याममुखैरभिध्वनद्भिः।**

**जलदैरिव रंहसा पतद्भिः पिदधेसंहतिशालिभिः शरोघैः।। (२०-१३)**

शिशुपालवधमहाकाव्यस्यास्मिन्नन्तिमे सर्गे युद्धवर्णनं वर्तते। पद्येऽस्मिन् शराणां जलदैः सह तुलना कृता।

यथा- बाणसमूहैरम्बरं जलधरैरिव पिहितम्। शराणां मेघैः सह कथं तुलना- तर्हि मेघेषु तडित्प्रकाशो भवति, शरःस्वपि प्रान्तभागाः सुवर्णस्य भवन्त्यतस्तेषां प्रकाशो भवति, मेघानामपि श्यामवर्णो भवति, शरा अपि लोहाग्रभागत्वात् श्याममुखा भवन्ति, मेघा अपि वेगेन यान्ति, शरा अपि वेगेन यान्ति, मेघानामपि समूहा भवन्ति, शरा अपि सङ्घे यान्ति, एवं पूर्वोक्तरूपेण मेघबाणसाम्यं कविना दर्शितम्।

अत्र वल्लभदेवेन श्लेषालङ्कारो दर्शितः। यत्रैकस्मिन् पदेऽर्थबाहुल्यं भवति तत्र श्लेषालङ्कारो भवति परमत्र केवलं विशेषणसाम्यमेव वर्तते, तस्मादत्र न श्लेषः किन्तु मल्लिनाथेनात्रोपमालङ्कारः कथितः स एव युक्ति- युक्तः समीचीनश्चेति।

अनेनेदं विलोक्यते यद् वल्लभदेवेनालङ्कारविषये क्वचिद् गहनो विचारो न क्रियते।

**स्वनतो नितरां रयेण गुर्व्यस्तडिदाकारचलद्गुणादसङ्ख्याः।**

**इषवो धनुषः सशब्दमाशु न्यपतन्नम्बुधरादिवाऽम्बुधाराः।। (२०-२१)**

अन्तिमसर्गस्यास्मिन्पद्ये महाकविना माघेन भगवतः कृष्णस्य शिशुपालेन सह युद्धस्य वर्णनं कृतम्। तत्र भगवतः श्रीकृष्णस्य बाणाः कथं पतन्ति स्मेति वर्णनं वर्तते।

यथा-अत्यन्तं गर्जन्तो विद्युच्चलसूत्रान्विता ये मेघास्तेभ्यो यथाऽसङ्ख्या जलधाराः सशब्दं सवेगं पतन्ति तथा शब्दं कुर्वतः तडिदाकारचञ्चलज्याऽन्वितात् धनुषः सशब्दं सवेगञ्चासङ्ख्या बाणा न्यपतन्।

अत्र वल्लभदेवेन 'इषु' शब्दस्य लिङ्गनिर्देशः कृतः यथा 'इषुशब्दः स्त्रीपुंसयोः स्मर्यते'। अनेन पाठकस्य मनसि शङ्कासमाधानं न भवेत् शङ्कोत्पत्तिर्भवति। यथाऽत्र पद्यार्थग्रहणे शब्दोऽयं कस्मिन् लिङ्गे ज्ञेयः कस्माच्चेति।

ततः यदि स मल्लिनाथस्य टीकाभ्यासं करोति तर्हि तस्य शङ्कानिवृत्तिर्भविष्यति, कारणं तेनायं शब्दोऽत्र स्त्रीलिङ्गे ग्राह्य इति निर्देशः कृतः। तत्र तेन 'इषवः'पदस्य 'गुर्व्यः' पदं विशेषणं दर्शितम्[१]। विशेषणेन ज्ञायते यदत्र विशेषणं स्त्रीलिङ्गे वर्तते, तस्मादत्र विशेष्यमपि स्त्रीलिङ्ग एव ग्राह्यमिति सङ्केतः[२]। अत्र मल्लिनाथेन कारणमपि लिखितं यथा- कविना स्त्रीलिङ्गग्रहणं कस्मात्कृतमिति तत्र लाभ उपमालङ्कारे उपमेयोपमानयोर्लिङ्गसाम्यमपेक्षितं भवति तस्मादत्रालङ्कारे दृष्टिः समीचीना। अनेन ज्ञायते यद् वल्लभदेवान्मल्लिनाथस्य विवेचनं विशेषमलङ्कारशास्त्रानुरूपं दृश्यते।

**श्रिया जुष्टं दिव्यैः सपटहरवैरन्वितं पुष्पवर्षै-**

**र्वपुष्टश्चैद्यस्य क्षणमृषिगणैः स्तूयमानं निरीय।**

**प्रकाशेनाऽऽकाशे दिनकरकरान्विक्षिपद्विस्मिताक्षै-**

**र्नरेन्द्रैरौपेन्द्रं वपुरथ विशद्धाम वीक्षाम्बभूवे।। (२०-७९)**

---

१ अत्रोपमानोपमेययोरेकलिङ्गताऽन्वयादिषु शब्दो द्विलिङ्गोऽपि स्त्रीलिङ्ग एव प्रयुक्तः इति ज्ञापनाय गुर्व्य इति विशेषणम्।। - इति मल्लिनाथः।।
**शिशुपालवधम् (२०-२१);** निर्णयसागरप्रेस; पृ. ५०५.

२ यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेष्यस्य।
तल्लिङ्गं तद्वचनं सा च विभक्तिर्विशेषणस्य।। **(कस्यचिद्)**

अस्य सर्गस्येदमन्तिमं पद्यं वर्तते। अस्य भावार्थो यथा- अथ शिशुपालस्य शिरच्छेदाऽनन्तरं श्रिया सेवितम्, पटहरवसहितदिव्यपुष्पवृष्टियुतम्, मुनिवृन्दैःस्तूयमानं तेजः चैद्यस्य देहान्निर्गत्य प्रकाशेनाम्बरे दिवसकरकरान् विक्षिपत् भगवद्वपुः प्राविशद् विस्मतनेत्रान्वितनृपैर्वीक्षाम्बभूवे अर्थादीक्षितम्।

अत्रोभयोरपि टीकाकारयोरर्थविषये समानमेव चिन्तनं वर्तते। वल्लभदेवेनात्र 'सुवृत्ता' नाम वृत्तिमिति लिखितं परं तस्य लक्षणमपूर्णं दत्तं न च शुद्धमपि यथा- 'सुवृत्तैः' गौडं खं सदनुलघंवः पञ्चस्वाङ्गषौ इति। प्रसिद्धछन्दोग्रन्थेषु सुवृत्तानाम वृत्तमेव नोपलभ्यते, मल्लिनाथेनात्र विस्फूर्जितावृत्तं' लिखितं तथा च तस्य लक्षणं यथा- रसर्त्वश्वैय्मौ न्सौ ररगुरुयुता मेघविस्फुर्जिता स्यात्' अत्र मल्लिनाथस्य वृत्तलक्षणं समीचीनं वर्तते।
(कारणं यमनसररगणाश्चान्ते गुरुः वर्तते।)

शिशुपालवधस्यान्त आगतः, शिशुपालस्यान्त आगतः, परं वल्लभदेव-मल्लिनाथयोरलङ्कारविषये मतभेदो नान्तं प्राप्तः। वल्लभदेवेनात्र श्लेषालङ्कारः कथितः परमत्रार्थवैविध्याभावादत्र न श्लेषः। मल्लिनाथेनात्र भाविकालङ्कारः कथितः कारणं कस्यचिदद्भूतस्य प्रत्यक्षदर्शनं भवति तदाऽयमलङ्कारो भवति[३] मल्लिनाथस्यात्रापि चिन्तनं युक्तमेव।

❋❋❋

[३] अद्भुतस्य पदार्थस्य भूतस्याथ भविष्यतः।
यत्प्रत्यक्षायमाशत्वं तद्भाविकासुदाहृतम्।।
**साहित्यदर्पणः (१०-९३); पृ.** ८६७

# उपसंहृतिः।

शिशुपालवधेन सह माघविरचितमहाकायमहाकाव्यमपि पूर्णतामेति। अस्माभि र्विलोकितं यद् वल्लभदेवमल्लिनाथयोर्द्वयोरपि व्याख्ये समीचीने स्तः। कतिपयमतभेदा अलङ्कारादिविषयेषु प्रारम्भादारभ्यान्तपर्यन्तं विलोक्यन्ते तथापि शिशुपालवधस्यास्वादो ग्राह्यस्तदा द्वयोरपि टीकयोरभ्यासोऽनिवार्य एव। द्वयोरपि विवेचनशैली स्वस्वस्थाने नितरां प्रशंसनीया।

'धन्यो माघकविर्वयं तु कृतिनस्तत्सूक्तिसंसेवनात्' पूर्वलिखितं मल्लिनाथ-वाक्यमन्ते चरितार्थं दृश्यते। यथा माघस्य वैदुष्यं निःशङ्कं प्रशस्यते तथैव द्वयोरपि वल्लभदेवमल्लिनाथयो- र्वैदुष्यं नितरां प्रशस्यमिति निश्चप्रचं निगदितुं पार्यते। व्याकरणदर्शनराजनीतिसंगीतालङ्कारकामशास्त्रेष्वप्रतिहतरूपेण स्वलेखनीं सञ्चालयते वल्लभदेवस्य सर्वतोमुखीप्रतिभासम्पन्नत्वे सत्यपि व्याकरणविषये वैशिष्ट्यं प्रतिभाति। मल्लिनाथस्यापि सर्वशास्त्रपाण्डित्ये सत्यप्यलङ्कारशास्त्रे विशेषाभिरुचिरित्यनुभूयते।

❋❋❋

# विभागः-३
# प्रकरणम्-११ – व्याकरणविवेचनम्

## विषयप्रवेशः

संस्कृतकाव्यानां व्याख्यातारः प्रायेण पदच्छेदादि[१] व्याख्यानसरणिमनुसरन्ति। तत्र पदार्थोक्तिमन्तरा वाक्यार्थावबोधो न सम्भवितुमर्हति। अत एव न्यायसिद्धान्तमुक्तावल्यां पदज्ञानन्तुकरणमिति[२] कारिकायां शाब्दबोधे पदज्ञानस्य करणताऽभिहिता। व्याख्याकाराः प्रायः पदार्थोक्तिकथनावसरे तत्तद् व्याख्यार्हपदानां व्याकरणदृष्ट्या व्युत्पत्तिं विग्रहं वा प्रदर्शयन्ति। इत्थं पदार्थोक्तिविग्रहनिरूपणेन व्याख्यायां व्याकरणस्योपयोगिता सिद्ध्यति। पदानान्तु सुबन्ततिङन्तरूपेण द्वैविध्यं पाणिनीयव्याकरणे सूत्रद्वारा पाणिनिना प्रकटितम् यथा 'सुप् तिङन्तं पदम्' इति। 'नामाख्यातोपसर्गनिपाताख्यानि चत्वारि पदानि'[३] निरुक्ते प्रतिपादितानि। तेषु नामोपसर्गनिपाता: सुबन्तरूपा गण्यन्ते 'स्वरादिनिपातमव्ययम्' इति सूत्रेण निपातानां स्वरादिगणस्य प्राद्युपसर्गाणाञ्च अव्ययसंज्ञायां कृतायाम् अव्ययादाप्सुप इति सुप् लोपे सुबन्तत्वमक्षरमेव। उपसर्गाणां क्रियायोगे तु तिङन्ताङ्त्वम्। एवं द्विविधं पदजातं सुबन्तं तिङन्तं च तेषां पदानामर्थाः पदार्था: पदार्थानामुक्ति: पदार्थोक्तिः पदार्थोक्तिनिरूपणं च व्याकरणमुपकरोति उक्तञ्च 'व्याकरणात्पदसिद्धिः' पदसिद्धेरर्थनिर्णयो भवति। व्याख्यातार: सुबन्ततिङन्तपदेषु व्याख्यां कुर्वन्तः तिङन्तपदेषु तु पर्यायार्थवाचकं पदं निरूप्यैव प्रायेण विरमन्ति। क्वचित् लुङ, णिजन्त, सनन्तादि क्रियापदानां विशिष्टस्वरूपाणाञ्च क्रियापदानां व्युत्पत्तिं कुर्वन्ति

---

१ पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना ।
आक्षेपश्च समाधानं व्याख्यानं षड्विधं स्मृतम् ।

२ पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः ।
शाब्दबोध: फलं तत्र शक्तिधीः सहकारिणी ॥ ८१ न्यायसिद्धान्तमुक्तावली; पृ. २३.

३ तद् यानि एतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च इमानि भवन्ति । निरुक्ते पृ. १९.

# वल्लभदेवमल्लिनाथयोः शिशुपालवधस्य टीकयोस्तद्धितविवेचनम्

सुबन्तपदेषु कृदन्तपदानि तद्धितान्तपदानि भवन्ति। व्याख्यायां सामान्यतः सम्भाषणभाषायां नित्यव्यवहारे सर्वसाधारणेनाबहुपरिचितानां पदानां व्याख्यां व्याख्याकर्तार: विशेषेण कुर्वन्तो दृश्यन्ते। वल्लभदेवमल्लिनाथौ तद्धितप्रत्ययान्तशब्दानां व्याख्यां कथंकारं कुरुत इतीदं तत्कर्तुकशिशुपालवधीय व्याख्यामालोकयन्त आलोचयामः।

तत्र तावत् इन्द्रप्रस्थगम.....२/६३ इति श्लोकस्य व्याख्यायाम् शब्दस्य व्युत्पत्तिविचारः, वल्लभदेव आस्माकशब्दविषये व्याख्यामित्थं करोति यथा 'आस्माकदन्तिसान्निध्यात् वामनीभूतभूरुहः सन्तु' अस्मदीया ये दन्तिनो गजास्तान् नैकदयेन वामनीभूताः ह्रस्वत्वं प्राप्ता भूरुहो वृक्षा येषु ते तथोक्ताः, एवं विग्रहं कृत्वा व्याख्यां प्रदर्श्य अस्माकमिमे आस्माकाः तस्मिन्नणि च युष्माकास्माकौ। एवम् अस्मद्शब्दस्य स्थाने अणि पटे अस्माकादेश इति दर्शयति।

मल्लिनाथस्तु अस्माकमिमे 'आस्माका: 'युष्मदस्मदोरन्यतरस्यां खञ्च' इति विकल्पात् अणप्रत्यय:' अस्मिन् अणि च युस्माकास्माकौ इत्यस्माकादेश:।

अपरञ्च सान्निध्यशब्दस्य व्याख्यायां वल्लभदेवः सान्निध्यशब्दस्य पर्यायमात्रं प्रदाय व्याख्यां कुरुते। मल्लिनाथस्तु सन्निधिरेव सान्निध्यं स्वार्थे ष्यञ् प्रत्यय:। मल्लिनाथ: अत्रापि सान्निध्यशब्दे प्रत्ययप्रदर्शनं करोति।

तथा च वाङ्मयशब्दस्य व्याख्यायां वल्लभदेवो वाचां विकारोऽवयवो वा एकस्वरान्नित्यमयट् इति मल्लिनाथः एकाचोऽपि नित्यमयटमिच्छन्ति इति स्वार्थे मयट्। उभावपि व्याख्याकारौ वाङ्मयशब्दे नित्यमयटं स्वीकुरुतः परं प्रत्ययार्थविषये विशेषो विद्यते। वल्लभदेवः विकारार्थमवयवार्थं वा स्वीकरोति। मल्लिनाथ: स्वार्थे मयट्प्रत्ययः इति वदति।

तृतीयसर्गस्य द्वितीये पद्ये (३/२) 'पार्वणचन्द्रचारु' इति पार्वणस्य व्युत्पत्यर्थं प्रकटयन् वल्लभदेव आह पर्वशब्देनात्र पौर्णमासी लक्ष्यते। पर्वणि भव इति। लक्षणवाक्येन अण् भवार्थे कालात्ठञ् यच्च तत्र सन्धिवेलादिषु पार्वणपाठः इति अत्र पार्वणशब्दे भवार्थकम् अणं स्वीकरोति पौर्णमास्यर्थकपर्वशब्दस्य कालवाचकत्वेऽपि सन्धिवेलादिगणान्तर्गतत्वेन अणप्रत्ययत्वप्रत्यय- विधानात् पारण: इति पाठ: सिध्यति।

मल्लिनाथस्तु पार्वणशब्दस्य पूर्णमर्थमभिधाय न किञ्चिद्विशेषमभिधत्ते।

तृतीयसर्गस्य चतुर्थे पद्ये (३/४) 'अनणीयसीभि:' इति अस्य पदस्य रूपसिद्धिर्वल्लभदेवो विषयति यथा अतिशयत्वविशिष्टात् अणुशब्दात् ईयसुनिटि लोपे ङीपि नञ् समासे च कृते अनणीयसीभिः इति रूपम्।

मल्लिनाथः न किञ्चिदाह रूपसिद्धिविषये महतीभिः इत्येवं पर्यायं ददाति।

सर्ग–३/५ पद्ये अवापबाल्योचित..... अत्र पद्ये बालशब्दाद् ब्राह्मणादित्वाद् ष्यञ् इति बालशब्दात् भावार्थकतद्धितप्रत्ययं दर्शयति। मल्लिनाथोऽपि एवमेव आह - ब्राह्मणादित्वात् ष्यञ्।

सर्ग-३/१० मुक्तामयं सारसनावलम्बि.... इति पद्ये आप्रयदीनम् पदान्तप्रापि इति वल्लभदेवः कथयति। तस्य विग्रहं दर्शयन् आह आप्रपदं प्राप्नोतीति। अत्र प्रत्ययदर्शनं सूत्रदर्शनं न कारितम्।

मल्लिनाथेन तु आसमन्तात् प्रपदं प्राप्नोतीति खस् प्रत्ययः इत्युक्त्वा प्रत्ययोऽपि दर्शितः।

वल्लभमल्लिनाथाभ्यामुभाभ्यां विहितां व्याख्यामवलोक्य तत्र च तद्धितप्रत्ययान्तशब्दानां व्याख्यामवलोक्योभयोः सादृश्यं भूरिशः दृष्टिपथमुपैति, उभावपि व्याख्याकारौ प्रायेणानतिप्रसिद्धानां तद्धितप्रत्ययान्तानां शब्दानां व्याख्यां कुरुतः। तत्र तु उभयोः शैली व्याख्याविषयिणी समाना सत्यपि वल्लभदेवापेक्षया क्वचित् मल्लिनाथः प्रत्ययार्थानां सूत्राणाञ्चाधिकं निर्देशं करोति। तत्र क्वचित् पार्वणादिशब्दविषये तु वल्लभदेवोऽपि विशेषतां दधाति। तच्च तद्व्याख्याः विलोक्य स्पष्टं भवति।

## वल्लभदेवमल्लिनाथयो: टीकयोः कारकविवेचनम्

संस्कृतभाषायाः वाक्यरचनाया क्रियापदेन सम्बद्धानां कारकाणामत्यधिकं महत्त्वं वर्तते। यतो हि कारकसंज्ञा समुपस्थापितसुविभक्तिप्रत्ययान्तपदानां भूरि प्रयोगदर्शनं भवति। प्रायेण श्लोके एकेन क्रियापदेन सम्बद्धानामनेकेषां कारकाणां समन्वयस्तत्तच्छलोकेषु दृश्यमानो भवत्येव। कारकाणां विषयेऽपि क्वचित् क्वचिद् व्याख्याविशेषो लभ्यमानतां बिभर्ति। यथा प्रथमसर्गस्य तृतीये पद्ये 'क्रमादमुं नारद इत्यबोधि स....' इति वाक्यस्य व्याख्यायां नारदशब्दात् प्रथमा विभक्तिः कथं समुचिता कथञ्चात्र द्वितीया न विहिता इति विषयं विषदतया व्याख्याकारेण वल्लभदेवेन इत्थमभिहितम्। इति शब्दः सर्वत्र प्रातिपदिकार्थमात्रव्यवस्थापनार्थः। यदि हि नारदमित्यबोधि इत्युच्यते तथा सति धर्मान्तरयोगे नारदस्य कर्मभावः प्रतीयेत। नारदत्वेनाबुध्यत तथार्थो न गम्येत।

अत एव प्रातिपादेकार्थत्वे सति नारदात् द्वितीया न भवति इति वल्लभः।

मल्लिनाथेनापि नारदशब्दस्य विभक्तिविषये चर्चा कृताऽस्ति। यथा नारदस्य कर्मत्वेऽपि निपातशब्देनाभिहितत्वात् न द्वितीया। तिङामुपसंख्यानस्य लक्षणत्वात् यथा वामनः निपातेनाभिहिते कर्मणि न कर्मविभक्तिः।

सर्ग २/७ षड्गुणाः..... इति पद्ये षड्गुणाः इत्यादि शब्दा: प्रथमान्ता: तत्र व्याकर्तुमित्यस्य कर्मत्वेन कुतो न द्वितीया न भवति इति चेदाह वल्लभदेवः षड्गुणादिभ्यो नारदवद् द्वितीया न भवति। मल्लिनाथेनात्र न काचिद्व्याख्या विहिता।

सर्ग ८/५६ कस्याञ्चित् मुखमनु..... इति श्लोके 'मुखमनु' इति वाक्यांशे मुखशब्दोत्तरवर्ति द्वितीयाविभक्तिः तृतीयार्थे इति सूत्रेण अनो: कर्मप्रवचनीयत्वात् द्वितीया इति मल्लिनाथेन विषयीकृतम्। वल्लभदेवस्तु नास्मिन्विषयेऽवोचत्।

सर्ग १/४ नवानधोऽधोबृहत:.... पद्येऽस्मिन् केचित् तु शम्भुना सह स्फुटोपममिति सहार्थे अन्ये तु करणे तृतीयामाहुः। मल्लिनाथस्तु न किञ्चिदाह।

'अधोध' इति उपर्यधोऽधीनां सामीप्ये द्विता तद्योगे च पयोधरानिति अभिसर्वतसोरित्यादिना षष्ठ्यपवादो द्वितीया इति वल्लभदेव आह।

मल्लिनाथोऽपि तथैवाह 'उपर्यध्यधसः सामीप्ये' सामीप्य इति द्विभवः तद्योगे द्वितीया। 'उभसर्वतसो:' कार्याधिगुपर्यादिषु त्रिषु इत्यादिवचनात्।

सर्ग ३/६७ 'निरन्तरालेऽपि... द्विपैरिति कर्तरि तृतीया द्विपैरिति करणे तृतीया' अत्र द्विपैरिति उपचारेण द्विपवन्तः पुरुषा बोद्धव्याः यथा यष्टीः प्रवेषय इति। कर्तरि एव तृतीयेति वयं न विद्मः। मल्लिनाथेनात्र न किञ्चिद् भणितम्।

कारकविषयकविमर्शदृष्ट्या उभयोर्व्याख्याकारयोर्व्याख्यां पश्यन्तो वयमिदमुत्पश्यामो यद् द्वयो र्व्याख्यात्रो: समानस्थले कारकविचारस्तु 'नारद इत्यबोधि सः' इत्यादि किञ्चिद् विरलं स्थानं विहाय न प्रायेण दृष्टिपथं समुपैति। यत्र तु व्याख्याकारस्य दृष्ट्या विभक्तिचर्चास्पदं पदं व्याख्याकारं प्रतिभाति तत्र व्याख्या कृता। समानविषयकपदचर्चा विरलीभावादुभयो: तौलनिको विचारस्त्वल्पसम्भावनो वर्तते। तथापि यत्र क्वचित् तुल्यविषये चर्चा कृता तत्रोभावपि सूत्रादि निर्देशपुरस्सरं व्याख्यानं प्रस्तुतः। मुखमनु....इत्यादिशब्दे कर्मप्रवचनीयसंज्ञा तत्प्रयुक्तविभक्तिचर्चा च वल्लभदेवेन न विहिता। मल्लिनाथेन तु तादृशस्थलेऽपि व्याकरणशास्त्रसिद्धान्तमनुसृत्य व्याख्यां कृत्वा शाब्दबोधस्य

वैशद्यमाविस्कृतम्। किञ्च परवर्तित्वान् मल्लिनाथस्य तट्टीकायां सूत्रादिनिर्देशाधिक्यं सहजसम्भाव्यमेव।

## वल्लभदेवमल्लिनाथयोः टीकयोः समासविवेचनम्

संस्कृतकाव्यानां व्याख्याकर्तारो वाक्यार्थनिरूपणे तदन्तर्गतानां समासिकपदानां विग्रहं दर्शयित्वा व्याख्यानं कुर्वन्ति इति दृश्यते। तत्रापि च स्वानुकूलं यथा स्यात् तथा स्वरसवाहिनी विग्रहविषयिणी प्रवृत्तिर्दृश्यते। सरलानां समस्तपदानां विग्रहं प्रायो न कुर्वन्ति। परं दुरवगाहपदानां विग्रहकरणप्रवृत्तिरुपलक्ष्यते। एतदर्थमत्र कानिचिदुदाहरणानि विलोकयामः।

सर्ग ६/४७ 'कनकभङ्गपिशङ्ग.. इति पद्ये' 'सरजसाऽरुण कसरचारुभिः' इति चरणे सरजसापदस्य विग्रहदर्शनावसरे वल्लभदेवेन 'सह रजसा रेणुना वर्तन्ते तानि सरजसानि सधूलीनि इति' उक्तमतो बहुव्रीहिसमासमङ्गीकुरुते इति सुस्पष्टं भवति। अत्र मल्लिनाथस्तु सह रजसा सरजसम् अचतुर इत्यादिना साकल्यार्थेऽव्ययीभावसमासान्तो निपातः बहुव्रीहि-अर्थे तु लक्षणया सरजस्का इत्यर्थः। अत एव न सरजसमिति अव्ययीभाव इति वामनः अथवा महाकविप्रयोगप्राचुर्यदर्शनात् अव्ययीभावदर्शनं प्रायिकमितिपक्षाश्रयणात् बहुव्रीहिरर्थोऽपि साधु एव।

अत्र वल्लभदेवेन बहुव्रीहिपक्षस्याश्रयणं कृत्वा विरतम्। मल्लिनाथेनैतत्पदविग्रहे अव्ययीभावः बहुव्रीहिश्च स्वीकृतः। अव्ययीभावसमासान्तनिपातदर्शकं सूत्रमपि दर्शितम्। बहुव्रीहिपक्षे सरजसं न भवति इति वामनाचार्यमतमुद्धृत्य लक्षणया बहुव्रीहिः साधितः।

सर्ग १३/२४ मुदितैस्तदति.... इति पद्ये अविनेयसंभ्रमविकासिभक्तिभिः इति द्वितीयचरणस्य विकासिभक्तिभिः सामासिकपदविग्रहविषये वैषधं विदधन् मल्लिनाथः कथयति यत् ननु विकासिभक्तिरित्यत्र कथं पूर्वपदस्य पुंवद् भावः..... मतभेदेन पूर्वपदस्य स्त्रीत्वे नपुंसकत्वे च रूपसिद्धिरस्तीति स्थितम्। मल्लिनाथेनात्र वृत्तिकारगणव्याख्यानभोजराजमतान्यालोक्य दृढभक्तिशब्दस्य सिद्धिवत् विकासिभक्तिशब्देऽपि सिद्धिः निर्बाधेवेति साधितम्।

इत्थमुभयोः व्याख्ययोः सामासिकपदविग्रहविवेचनावसरे मल्लिनाथस्य व्याख्यायामधिकं सूत्रनिर्देशपूर्वकं स्पष्टीकरणं सम्भवद् विकल्पानाञ्च विवेचनं सुस्पष्टं प्रतिभाति। वल्लभदेवः

सामासिकपदविग्रहे नाधिकव्याकरणसूत्राधारितं व्याख्यानं करोति, किन्तु समुचितार्थदर्शनं कारयति तत्रत्यान् विकल्पान् न विषदीकरोति इति एषा तस्य शैली वर्तते।

अत्र तु तत्कालीनव्याख्यानपद्धतिपरंपरैव कारणभूता न च व्याख्याकाराणां वैदुष्य- तारतम्यकारणता।

## वल्लभदेवमल्लिनाथयोः टीकयो: कृत्प्रत्ययविचार:

संस्कृतभाषायां मूलप्रकृतिरूपा धातवः तेषां प्रतियोगात् प्रत्यययोगाद् द्विविधानि पदानि निष्पद्यन्ते। तत्र तिङ्प्रत्यययोगे तिङन्तानि पदानि भवन्ति तिङ्भिन्नप्रत्यया: धातुना युज्यमाना: कृत्संज्ञका अभिधीयन्ते। कृतप्रत्ययशब्दानां प्रातिपदिकसंज्ञा भूत्वा सुप्रत्यययोगे सुबन्तानि नाम पदानि निष्पद्यन्ते। कृदन्तशब्दानामपि व्याकरणं पृथक्करणं वा क्वचित् क्वचित् क्रियमाणः अवलोक्यते।

सर्ग ३/७३ पद्येऽस्मिन् 'मान्तीः' इति पदस्य व्युत्पत्तिं दर्शयता मल्लिनाथेन। 'माते: शतरि ङीप्', 'आच्छीनद्योर्नुम्' इत्युक्तम्। वल्लभदेवेन तत्र न किञ्चित् व्याकरणमभिहितम्।

सर्ग ३/७७ पद्येऽस्मिन् 'उत्पित्सु' शब्दस्य व्याख्यां कुर्वन् वल्लभदेवो व्याकरणशास्त्रानुसारिणीमस्य पदस्य सिद्धिं दर्शयति यथा 'उत्पित्सव इति' सनिमीमेति इस् अभ्यासलोपः इत्युक्तम्। मल्लिनाथेनापि पतते: सन्नन्तात् उप्रत्यय: सति मीमेतित्यादिना इसादेशः अत्र लोपोऽभ्यासस्य इति अभ्यासलोपः इत्युक्तम्। उभयोः व्याख्याने समानता दृश्यते। तथा सत्यपि मल्लिनाथेन सूत्रलेखनमधिकतया च प्रत्ययलेखनमप्यधिकतया कृतम्।

सर्ग ३/३ पद्येऽस्मिन् पातुकशब्दस्य लषपतेत्युकञ् इति वल्लभदेवः। मल्लिनाथोऽपि 'उकञ्' प्रत्ययं लिखति। अत्रेदं विलोक्यते यत् यत्र विशेषप्रत्ययो भवति तत्र सति सारल्येऽपि द्वावप्युभौ टीकाकारौ निर्देशं कुरुतः।

सर्ग ८/२ अस्य पद्यस्य 'यान्तीनां' पदविवेचने 'आच्छीनद्योर्नुम्' इति वैकल्पिको नुमागमः इत्युक्त्वा मल्लिनाथ: 'यातीना'मित्यपि रूपं भवतीतीङ्गितं करोति, वल्लभदेवस्तु न किञ्चिदाह।

इत्थं कृत्प्रत्ययानां व्याख्यावसरे इदमवलोकनं भवति यद् मल्लिनाथ: शतृप्रत्ययान्त- कृदन्तानां कुत्रापि च स्त्रीलिङ्गवाचीनां शब्दानां

नुमागमविशिष्टानां व्युत्पत्तिं दर्शयति वल्लभदेवस्तु प्रायेणासिद्धप्रत्ययानां व्याख्यां कुर्वन् दृश्यते।

## वल्लभदेवमल्लिनाथयोः टीकयोः तिङन्तविवेचनम्

भाषायां प्रतिवाक्यमेकैकं क्रियापदमवश्यं भवति। संस्कृतभाषायां धातूनां प्रत्ययानां गणानाञ्च वैविध्यात् क्रियापदानां सुस्पष्टार्थप्रतीतये व्याख्याऽनिवार्या भवति। तादृशानाञ्च क्रियापदानां व्याख्यानं व्याख्याकारैः विधीयते। सामान्यत: सरलतयाऽनायासेन च येषां क्रियापदानामर्थाविवोध: संजायते, तेषां क्रियापदानां तु विशेषेण व्याख्या न क्रियते प्रायेणार्थमात्रं दीयते।

१/१७ विधाय तस्यापचितिं.....अस्य पद्यस्य व्याख्यायाम् अप्रीयतेति प्रीञो देवादिकस्य कर्तरि लङ् इति वल्लभदेवेन व्याख्यातम् तथैव च मल्लिनाथेनापि व्याख्यातम् प्रीयते देवादिकात् कर्तरि लङ्।

१/१८ अशेषतीर्थोपहृता: ,अस्य पद्यस्य व्याख्यायाम् 'अग्रहीत्' पदस्य व्याख्या वल्लभदवेन जग्राह इति पर्यायमात्रं दत्त्वा कृता। मल्लिनाथेन ग्रहेर्लुङ् इति व्याख्यायां तत्रापि लकार: प्रदर्शित:।

१/१९ स काञ्चन यत्र.... अस्य पद्यस्य व्याख्यायां 'न्यविक्षत' इति पदस्य आत्मनेपदत्वम् 'नेविश' इति सूत्रेण वल्लभदेवेन आत्मनेपदं दर्शितम्। तथा च 'जिगायेति' जेगित्वम् अभिहितम्। मल्लिनाथेनाप्यनयोः पदयोर्व्याख्या कृता। 'निपूर्वविशो लुङि नेविश:' इति आत्मनेपदे 'शल इगुपदादनिट: क्सः, 'जिगाय' पदव्याख्याने कुत्वविधायकं सूत्रं दर्शयति मल्लिनाथ 'सन्लिटोर्जे:'।

३/६२ निषेव्यमाणेन.....अस्य पद्यस्य विवेचने 'आह्यास्त' अस्य तिङन्तपदस्य व्याख्यां कुर्वाणेन वल्लभदेवेनेत्थमभिहितम्। आह्यास्तेति स्पर्धायामाङ् इत्यात्मनेपदम् 'च्ले: सिच् आत्मनेपदेष्वन्यतरस्याम्' इति अङ्ग विकल्पितः।

अस्य पदस्य व्याख्यायां मल्लिनाथेनोक्तम् यत् ह्यतेर्लुङ्ग स्पर्धायामाङ् इति आत्मनेपदम् 'लिपि सिचिह्वश्च' इति आत्मनेपदेष्वन्यतरस्यामिति च्लेरङभावपक्षे सिजादेश:।

अत्र वल्लभदेवेन मल्लिनाथेनेत्युभाभ्यां व्याख्याकाराभ्यां सूत्रनिर्देश-पुरस्सरमस्य क्रियापदस्य सिद्धिः प्रदर्शिता।

उभयव्याख्यां दृष्ट्वा तिङन्तपदव्याख्यानविषये इदं वक्तुं शक्यते यदुभाभ्यां व्याख्याकाराभ्यां विशिष्टानां लिट्लङादिक्रियापदानां सविस्तारं व्याख्या कृता। यत्राप्रचलितधातुर्भवति तत्रापि व्याख्या विशेषेण दीयते। तिङन्तपदानां वाक्येऽनिवार्यतया कवीनाञ्च वैविध्यपूर्णशब्दानां प्रयोगकारित्वात् क्रियापदानां प्राचुर्येण च व्याख्यावसरो भवति। बहूनां च सूत्राणां प्रदर्शनेन यत्र तत्र क्रियापदानां व्याख्या-व्याजेन बहूनां सूत्राणां निर्देशो भवति। व्याख्यापठनेन नैकेषामप्रचलितानां क्रियापदानां च परिचयो भवति, सूत्राणाञ्चापि पठनं स्पष्टता च भवति।

उभयोरपि तिङन्तपदानां व्याख्या स्वस्वस्थानेषु विशेषयोग्यतां दधाति।

***

# प्रकरणम् १२ –साहित्यविवेचनम्

## वल्लभदेवमल्लिनाथयोः टीकयोः अलङ्कारविवेचनम्।

संस्कृतकाव्येष्वलङ्काराणां प्राचुर्यं साहजिकमेव दृश्यते। अलङ्कारद्वारा काव्यस्य सौन्दर्यं ग्राह्यत्वञ्चाभिधीयते। अत एव वामनेनोक्तम् ‘काव्यं ग्राह्यमलङ्कारात् सौन्दर्यमलङ्कार:’। शिशुपालवधेऽप्यलङ्काराणां बाहुल्यं वैविध्यञ्च वर्तते। व्याख्यायां वल्लभदेवन मल्लिनाथेन चालङ्काराणां विश्लेषणं कृतम्। तद्विश्लेषणं कथं कृतमिति जिज्ञाशायां प्रथमं तावदलङ्कारविषये किञ्चित् विलोकनीयं भविष्यति।

यथालङ्काराणां विभाजनं क्रियते चेत् केचनशब्दालङ्कारा:, केचनार्थालङ्कारा:, केचनोभयालङ्काराश्च भवन्ति। श्री डो. रामचन्द्रत्रिवेदीमहोदयस्त्वलङ्काराणां वर्गीकरणमित्थं कृतवान् यथा -




→ काव्यप्रकाशटीकायाम् पृ. ३२

माघेऽलङ्कारविमर्श इत्यस्य ग्रन्थकारेण केऽलङ्काराः कुत्र गणनीया इत्यपि चिन्तितम् यथा –

**(अ) भेदाभेदप्रधानाः-** (१) उपमा, (२) उपमेयोपमा, (३) स्मरणम्।

**(आ) आरोपमूला:-** (१) रूपकम्, (२) परिणामः, (३) सन्देहः (४) भ्रान्तिमान् (५) अपह्नुतिः।

**(इ) अध्यवसायमूलौ-** (१) उत्प्रेक्षा, (२) अतिशयोक्तिः।

**(ई) गम्यौपगम्याश्रिताः-**(१) तुल्ययोगिता, (३) दीपकम्, (३) प्रतिवस्तुपमा, (४) निदर्शना, (५) दृष्टान्तः, (६) व्यतिरेकः (७) सहोक्तिः. (८) समासोक्तिः, (९) परिकरः (१०) अर्थश्लेषः, (११) अर्थान्तरन्यासः (१२) अप्रस्तुतप्रशंसा, (१३) पर्यायोक्तम्, (१४) व्याजस्तुतिः, (१५) आक्षेपः।

**(उ) विरोधमूला:-**(१) विरोधाभासः, (२) विभावना, (३) विशेषोक्तिः, (४) असंगतिः, (५) विषमम्, (६) विचित्रम्, (७) अधिकम्, (८) अन्योन्यम्, (९) विशेषः, (१०) समम्।

**(ऊ) शृंखलाबद्धमूलः-**(१) एकावली।

**(ए) वाक्यन्यायमूलाः-**(१) यथासंख्यम्, (२) पर्यायः, (३) परिवृत्तिः, (४) परिसंख्या, (५) अर्थापत्तिः, (६) समुच्चयः, (७) समाधिः।

**(ओ) लोकन्यायमूला:-**(१) प्रत्यनीकम्, (२) प्रतीपम्, (३) मीलितम्, (४) सामान्यम्. (५) तद्गुणः, (६) अतद्गुणः, (७) उत्तरम्।

**(औ) गूढार्थप्रतीतिमूला:-**(१) सूक्ष्मम्,(२) वक्रोक्तिः (३) स्वभावोक्तिः, (४) भावः, (५) भावशबलम्, (६) भावोदयः, (७) प्रेयः, (८) रसवद्, (९) उदात्तः, (१०) ऊर्जस्वी।

**माघेन शिशुपालवधे एतेऽलङ्काराः प्रयुक्ताः।**

१. **अतद्गुण: -**१० सर्गः-७६.

२. **अतिशयोक्तिः-**

१सर्गः-१३-२३-२५-२७-४७-६२-६६-७४.

द्वितीयसर्ग-१७-८२-१०७,

तृतीयसर्ग:-३-६-८-१२-१३-१४-२१-२४-२५-२७-३८-४४-५८-५९,

चतुर्थसर्ग:-२२-३८-४१-४६-४९-६२-६७,

पञ्चमसर्ग:-११,

षष्ठसर्ग:-१-२६-५६-७२,

सप्तमसर्ग:-४-२७-४१-४२-४८-५५-६२-६३,

अष्टमसर्ग:-२-७-२३-१५-१८-२२-२६-२७-२८-३१-३८-४४-४८-५३-५४-५७-५८-६५,

नवमसर्ग:-१६-२४-३७-३९-४३-५०-६५-७३-८५-८६,

दशमसर्ग:-५-६-१०-१७-१९-२५-४७-५०-५७-५९-६३-६५-७३,

एकादशसर्ग:-५-१६-२८-४७-५८,

द्वादशसर्ग:-१७-२९-५६-५७-५८-६०-६१-६५,

त्रयोदशसर्ग:-१०-१९-४३-४८-६२-६२-६४,

चतुर्दशसर्ग:-५-१०-११-१५-२२-२९-३०-३१-३९-४०-८०,

पञ्चदशसर्ग:-२५-२६-२७-२८-२९-३०-५२-५४-७४-७६-८४,

षोडशसर्ग:-५१-६३-७१-८३,

सप्तसर्ग:८-१५-३३-५२-६२-६३-६४-६६,

अष्टादशसर्ग:-२६-२९-३०-३९-४५-४६-४७-४८-५८-६०-६१-६५-७६,

एकोनविंशसर्ग:-२७-६८-१२५-११६,

विंशसर्ग:-२६-३०-५५-५७-६८-६३,

३. **अधिकम्** - १/१ २३, १३/४०, १४/७५, १७/४७.

४. **अनुमानम्** - ७/२२, १२/६९.

५. **अन्योन्यम्** - ९/३३, १९/२०.

६. **अपह्नुति:** - १/७५, ७/६.

७. **अप्रस्तुतप्रशंसा -** २-१०, ४६-४९, ५३, १६-२१, २२, २३, २४, २६, २७, २८, २९, ३०, २१, ३२, ४०.

८. **अर्थश्लेष: -** २/११२, ३/५७, ५/४, १२/८, १६/७, ९, १२, १३,

९. **अर्थान्तरन्यास: -** १/१४, १७, २९, ६९, ७२, ७३, २/१२, १३, ३५, ३७, ३८, ४०, ५१, ६५, ८०, ८५, १००, ३/३१, ४/१७, ५/६, १४, १९, ३७, ४१, ४२, ४४, ४७, ६/४३, ४५, ६३, ७/१, २७, ३८, ४३, ५०, ५१, ६१, ६८, ८/७, १०, १२, २०, २२, २८, ४५, ५४, ५५, ५७, ५८, ६०, ६९, ९/५, ६, १२, १६, २३, २९, ३३, ४३, ४४, ५१, ६२, ६८, ६९, १०/५, १८, २३, २८, ३५, ७९, ११/२५, ३३, ३५, ५७, ५९, ६४, १२/३२, ५२, १३/६, १७, ६८, १५/१, ४०, ४१, ४३, ८९, १६/४१, ४४, ४६, १७/५०, ५९, १८/२३, ६४, ६६, १९/११९, २०/७४.

१०. **अर्थापत्ति:-**१/३५, ३६, ३८, २/४३, ४/१९, ३९, ५७, ५/४७, ६/१६, ३९, ६५, ७/६८, ८/५०, ९/५७, १०/६, १५/४०, १६/५९.

११. **असङ्गति:-**१०/४६

१२. **आक्षेप:-**१५/८३

१३. **उत्तरम्-**१/२.

१४. **उत्प्रेक्षा-**१/७, ८, ९, १५, २१, २२, ४९, ५७, ६०, ७०, ७५, २/४, ७, ३२, ६९, ३/५, ६, ७, ९, १०, १५, १९, २९, ३३, ३९, ३५, ३९, ४०, ४१, ४२, ४३, ४६, ४९, ५५, ६९, ७०, ७१, ७२, ७३, ७७, ७८, ४/१, २, ४, ७, २५, ३२, ३५, ४२, ४३, ४६, ४७, ५०, ५८, ६८, ५/२, ३, ९, ११, १६, १९, २०, २७ ३०, ३१, ३३, ३८, ५१, ६९, ६/५, ६, ७, ८, १३, १९, ३४, ३६, ३९, ४२, ४४, ४५, ५०, ५३, ५२, ५३, ५४, ५८, ५९, ६२, ६४, ६५, ६६, ६७, ६९, ७०, ७८, ७/१३, २५, २६, २८, ३०, ४२, ५५, ५८, ६०, ६२, ६४, ६५, ८/३, ४, ८, १४, १५, १६, २७, ३३, ३४, ३५, ४०, ४२, ४८, ४९, ५०, ५१, ५३, ६०, ६२, ६३, ६६, ७१,

९/८, १५, १७, १८, २२, २५, २६, २८, ३०, ३४, ३९, ४०, ४२, ४९, ६३, ६४, ६६, ७०, ७१, ७२, ८०, ८४, १०/२, ६, ७, ९, ११, १४, ३०, ३४, ४५, ४६, ४८, ४९, ५०, ७४, ७५, ७६, ८४, ८५, ९१, ११/२२, १६, १८, २२, २४, ३०, ३१, ३८, ४३, ४४, ४५, ४६, ४९, ५१, ५३, ६०, ६१, ६२, ६३, १२/५, १७, १९, ४३, ५०, ६३, ६४, ६६, ७०, ७१, ७५, ७६, १३/२, ११, ११, १२, २५, २६, ३०, ३६, ३७, ३९, ४५, ४६, ४७, ६१, ५७, ६७, १४/२, २५, २८, २६, ७७, १५/३, ७, ८, ४७, ४९, ५१, ५६, ७८, ७९, ८६, ९०, ९४, १७/३, ५, ९, १०, १४, १६, २६, ३१, ३२, ३६, ४३, ४९, ५५, ५४, ६०, ६६, ६८, १८/१, ५, ७, ८, १०, २४, ४१, ४३, ४४, ४८, ५४, ६३, ६७, ६८, ७९, ७३, ७५, ७८, ७९, १९/२४, २८, ६८, ७०, ७१, ८१, १००, ११०, ११६, ११७, २०/४, ६, ८, १४, १६, २०, २८, ४५, ४८, ६४, ६८, ६९, ७०,

**१५. उदात्त: -** ४/६०, ११/३६, १३/५०-५८, ५९, २०/६६, ८४.

**१६. उपमा-**१/४, ५, ६, ७, ८, १२, १५, १९, २०, २१, २२, २४, २५, २८, ३९, ५३, ५४, ७२, ७५, २/५, ७, १०, १४, १८, २५, २८, ३९, ५३, ५३, ५४, ७२, ७५, २/५, ७, १०, १४, १८, २५, २८, ३१, ५७, ५९, ६१, ६४, ६९, ७२, ७४, ७८, ८१, ८४, ८६, ८७, ८८, ९०, ९१, ९२, ९५, ९६, ९७, ९९, ११०, ११६, ३/१, २, ४, ११, १७, २०, २४, २६, ३५, ३६, ३७, ४८, ४९, ५६, ६२, ६३, ६४, ६५, ६७, ७०, ७१, ७५, ४/५, ८, ११, १३, १४, २३, २४, २८, ३०, ३१, ३५, ३७, ५१, ५९, ६५, ६७, ५/१, ३, ४, ८, ११, १३, २६, २९, ३५, ३६, ४५, ५५, ५६, ५७, ६६, ६८, ६/४, ८, ९, १२, २३, २७, २८, ३४, ३५, ३६, ३७, ४६, ७१, ७२, ७३, ७५, ७/२३, ४६, ४७, ६६, ७३, ८/९, २८, ४९, ८/९, २८, ४९, ९/८, ९, १९, २८, ३०, ३२, ३६, ३९,५२, ५५, १०/१, १३,

१५, २५, ६४, ८३, ८२, ११/३, ६, ८, १४, ३९, ४०, ४२, ४५, ५४, ५५, ५६, ६८, ६२, ६५, ६६, १२/२, ४, ११, १४, १५, ३७, ४८, ५४, ५५, ६८, ६९, ७०, ७४, ७५, १३/५, १५, १८, १९, २०, २१, २२, २३, २४, २५, २७, ८, २९, ३३, ३७, ३४, ४१, ४२, ५२, ६१, ६५, १४/७, १९, १४, ४४, ५०, ५२, ७६, ७७, ८४, ८५, १५/२, ४, ५, ६, ९, १०, १३, १५, २०, ३३, ३४, ३५, ४४, ४८, ५०, ५१, ५२, ५५, ५८, ६२, ६९, ७३, ७४, ७५, ८०, ८६, ९०, ९२, ९३, १६/५, १०, १२, १४, १९, २४, ३२, ३७, ४३, ५०, ५२, ५३, ५८, ६४, ६५, ७२, ८०, १७/१, २, ७, १३, १७, १९, २३, २५, २९, ३८, ४३, ४४, ४६, ६२, ५६, ६७, १८/१, २, ४, ६, ९, १२, २०, २५, ३१, ३४, ३५, ३६, ३८, ४०, ४१, ४२, ४३, ५०, ५१, ५७, ५९, ७१, ५२, ८०, १९/१, २, ३, ४, ६, ७, १०, ११, १२, २२, २५, २६, ४१, ४३, ४५, ४७, ५२, ५३, ५४, ६१, ६४, ६५, ६६, ६७, ७४, ७५, ७६, ७९, ८३, ९३, ९८, १००, १०४, १११, ११६, २०/३, ५, ११, १२, १३, १७, १८, १९, २२, २३, २४, २७, ३०, ३१, ३४, ३५, ३८, ४१, ४३, ४४, ४५, ४६, ४७, ४९, ५१, ५३, ५४, ५७, ५९, ६०, ६१, ६२, ७१, ७३, ८१.

१७. **उपमेयोपमा-**११/१५, १३/४.

१८. **अर्जस्वी-**११/२६.

१९. **एकावली-**७/३, १०/३३.

२०. **काव्यलिङ्गम्-**१/३, २४, २६, ३५, ४१, ६१, ७१, २/४, ९, ३२, १०२, १०७, ११५, ३/१९, २३, ३२, ५२, ५९, ६३, ७९, ८१, ४/१, ५, १५, १७, २२, ४४, ५/५, १७, १८, २२, २३, २६, ६/३८, ४७, ६२, ७०, ९/१३, २९, ५९, १०/३, २३, ६१, ६६, ७३, ८३, ८४, ८८, ९०, ११/२, ५, १५, २३, ३४, ३६, ५४, ५५, १२/१, २४, २६, २९, ४२, ४४, ५३, ६१, ६२, ६५, ७७, १३/३, २६, ४८, १४/४, १५, २३, २४, २६, २७,

२९, ३१, ३२, ३५, ३८, ५१, ५७, ५९, ६१, ६२, ७९, ८२, ८७, १५/६, ११, १४, १८, १९, २२, २३, ३१, ३६, ३७, ३८, ४१, ४२, ४५, ५३, ५५, ५७, ५९, ५८, ७०, ७७, ७८, ८३, ८५, ९३, ९५, ९६, १६, ४५, ५२, ५४, ८५, १७/६, ३३, ३४, ५३, ६२, ६६, ६८, १८/३, १३, १६, १७, २०, २३, ३४, ३७, ५६, ५८, ६१, १९/१६, २१, ३१, ३५, ३८, ५३, ५७, ५८, ७८, ८०, ९७, ९९, १०१, २०/३, ७, ३२, ३४, ३६, ३७, ३९, ६३.

२१. **तद्गुणः -** १/९, २/२०, २१, ४/१४, १०/८६, १५/७, ४८, १७/४.

२२. **तुल्ययोगिता -** १/३, ४५, ५२, २/२४, २६, ४९, १०१, ३/५३, ५४, ५९, ६०, ४/१९, २७, ३८, ४०, ५/६, ६/४३, ७९, ७/५६, ८/३०, ५२, ९/२४, ४३, ५३, १०/४, ८, १३, ३९, ६९, ७१, ७५, ११/१५, ६४, १२/३५, ४५, ४९, १७/२२, ६५, १८/२, ९, ३३, ५५, ६५, १९/१८, ३२, ६२, ९५, ९७, १०३, ११३, ११५, २०/१५/

२३. **दीपकम् -** १/५५, २/१०९.

२४. **दृष्टान्तः -** २/२३, ३४, ६२, ७०, ८३, १४/८, १३, ४६, १५/१७, १७/१८, ४०, २०/४०.

२५. **निदर्शना -** ११६, ७५, २/२, १९, ३१, ४२, ६६, ३/३, ४७, ४/१३, २०, २६, २८, ३१, ४४, ५२ ५६, ६५, ६८, ५/२, ४९, ४/१३, २०, २६, २८, ३१, ४४, ५२, ५६, ६५, ६८, ५/२, ४९, ६/२१, ७/१५, ८/१८, ५६, ९/५३, ७८, १०/३१, ११/१६, ५०, १२/३४, १३/१३, १६/५८, १७/१२, ३०, १९/५९, २०/५०, ५६, ७५.

२६. **परिकरः -** १७/२१.

२७. **परिणामः -** २/७७, ४/५४, ९/७७, ३३/४०, १८/३९.

२८. **परिवृत्तिः** -१/५०, १५/४०, १८/१५.

२९. **परिसंख्या -** २/२, १४/४३, ४८, ५४, ५९.

३०. **पर्याय:** - ७/६९, २०/७८.

३१. **पर्यायोक्तम्** - २/६३.

३२. **प्रतिवस्तुपमा** - १/३८, २/८, २३.

३३. **प्रतीपम्** - १६/६१.

३४. **प्रत्यनीकम्** - ९/६३, १४/७८.

३५. **प्रेय:** - ६/७४, ९/२, ५४, १०/८०, १३/४६, १४/११.

३६. **भ्रान्तिमान्** - ३/ ४८, ५१, ४/४६, ५३, ५/३२, ६/११, ७/२४, ९/१८, ३५, १०/५, ११/५२, ३२, ४४, ४९, ५६, ६०, १५/९३, १८/५३, २०/७.

३७. **भाव:** - १३/४०, ४१, ४२.

३८. **भावशबलम्**-१५/८९.

३९. **भावोदय:** - ११/६९.

४०. **मीलितम्** - ६/४०, १०/२६, १२/१५.

४१. **यथासंख्यम्** - ९/५३, १०/१४, ३४, २०/१५.

४२. **रसवद्** - २/३०, ६/७५,

४३. **रूपकम्** - १/३४, ३९, २/३, ३८, ८२, ८९, ९२, ९३, १११, ११७, १३८,३/३९, ४/४८, ५/१३, ९, ६/४६, ५०, ५४, ५८, ६०, ६२, ६७, ७०, ७/७, २३, २५, ५७, ७४, ८/१४, २२, २७, ३३, ३९, ४६, ९/३, १०, ११, १८, २७, ३१, ३४, ३६, ४५, ४७, १०/५८, ७८, ११/१७, २१, ३८, ४४, ४७, ४९, १२/४९, १३/४८, १३/४८, ४५, ६१, १४/६, १६, २५, ३४, ५९, ७२, ७७, १९५, १२, ३९, ४४, ७१, १०६, १२०, २०/२, ३३, ७५, ७७.

४४. **वक्रोक्ति:** - १५/२३.

४५. **विचित्रम्** - १३/८.

४६. **विभावना** - १/१०, ४/५३, ७/५७, ८/६९, १०/२७, ४१, १३/१३, १५/२४, ८०, ८२.

४७. **विरोधाभास:** - १/१, ३६, ६७, २/६, १६, ३/३२, ४४, ५०, ४/१२, ५/५३, ६/६१, ७/५९, ७०, ८/५, ६, ३६, ३९, ९/६६, ७८, ८१, १०/६८, ७०, ८६, ८७, ८९, ११/४, २९, ३१, ५५, १२/३३, ५६, ६७, १२/८, ४९, ५५, ६६, १४/३५, ६२, ६९, ७०, ७२, ७४, ८३, ८८, १५/३०, १६/८, ६६, ६९, ७९, १७/६, ६७, ७३, १७/६, १८/१८, २२, २८, १९/२३, २७, ४६, ५६, ६७, ७३, १०५, १०९, २०/२९, ८२.

४८. **विषमम्** - १/५६, ६१, ६५, २/७८, ७९, ९/४५, ८,२८, ४२, ६५, ११/६४, १८/२, १५/१६.

४९. **विशेष:** - २/२५.

५०. **विशेषोक्ति:** - ८/६१, ९/१४, ७३, १०/२७, २८, ४३, १२/३१, १४/४५, ४७, १५/१९.

५१. **व्यतिरेक:** - १/२, २७, २/४६, ४८, ३/८२, ४/६४, ७/३९, ११/२७, २८, १४/२, ३, ४३, ६५, ६६, १८/३३, ७०, १९/१८, ५१, २०/७७.

५२. **व्याजस्तुति:** - १/३९, २/७०.

५३. **सन्देह:** - १८२, ८/२९, २०, १०/१४, २४, १८/४२.

५४. **समम्** - ७/५३.

५५. **समाधि:** - ६/४९, १०/२०.

५६. **समासोक्ति:** - १/४४, ५८, ६४, २/५२, ३/१५, २८, ४१, ६९, ४/१९, २९, ३४, ४७, ५/३, ४३, ५४, ६/२५, ७/२९, ८/२२, २६, ९/७, १०, ३९, १०/३८, ४०, ५१, ६२, ७२, ११/१४, २२, ४८, ६१, ६२, १५/९, १६/६२, १७/२४, ३७, ३८, ३९, १८/१४, १९/३५, ८५, ११, २०/६, ९, १०, २४, ७४.

५७. **समुच्चय:** - ६/७२, १४/३१, १५/६१, १८/७७.

५८. **सहोक्ति:** - ८/३१, १४/३७, ११/३२, १३/५३, १८/३४.

५९. **समान्यम्** - ३/४७, ८/५१, ११/३२, १३/५३, १८/३४.

६०. **सूक्ष्मम् -** ९/७६म् ८३.

६१. **स्मरणम् -** ८/६४.

६२. **स्वभावोक्तिः -** ३/१६, ६६, ६८, ८०, ५/५, १५, १७, २४, २५, ५८, ६१, ६२, ७/३३, ४५, ८/१, १९, ३१, ११/४, ७, ९, ११, १२/५, ६, ७, ९, १०, १८, २०, २२, २४, २८, ३१, ३४, ३७, ३८, ४०, ४२, ४७, ५१, ५४, ७३ ,७४, १४/२०, १५/३९, १७/३५ १८/११, ३२, ५२, २०/१९, ४२, ५२, ६७.

एवमत्र माघेन कस्मिन् सर्गे कस्मिन् श्लोके कश्चालङ्कारः प्रयुक्त इति ज्ञातमस्माभिः।

अत्र चाग्रेऽस्माभिर्विलोक्यते यत् श्रीवल्लभदेवस्यालङ्कारविवेचनं कीदृशं तर्हि तेन न सर्वत्रापितु क्वचित् क्वचिदलङ्कारनिर्देशस्तु कृतः। परं तेन यत्रोपमालङ्कारो भवति तत्र लिख्यते 'उपमीयते' यदि 'उत्प्रेक्षा' भवति तत्र 'उत्प्रेक्षते' एवम् नाममात्रं विलिख्यालङ्कारनिर्देशः क्रियते। केचन श्लोका: तादृशा अपि दृश्यन्ते यत्र तेन विशेषचर्चा विहिता यथा-गतं तिरश्चीन... १/२ पद्येऽस्मिन् वल्लभदेवेन महती चर्चाऽलङ्कारशास्त्रमाश्रित्य सलक्षणं कृता। तेन प्रायोऽर्थालङ्कारा एवं लिख्यन्ते। तथा च प्रसिद्धानामलङ्काराणां चर्चा तेन क्रियते तथा दृष्टपथमायति।

परं मल्लिनाथेनात्र शिशुपालवधस्य टीकायां प्राय: सर्वेषामपि पद्यानामलङ्कारनिर्देशः कृतः। तेनालङ्कारस्य लक्षणं लिख्यते परं यद्यपेक्षितं भवति शास्त्रार्थोऽपि क्रियते यथा - गतं तिरश्चीनम् १/१ पद्ये कृतः। तेन वल्लभदेवस्यालङ्कारनिर्देशो यदि नोचितो दृश्यते तर्हि नामोल्लेखपुरस्सरं तन्मतं योग्यं नेति तटस्थभावेन लिख्यते। तदर्थमपि १/२ टीका विलोकनीया। मल्लिनाथेनात्र दण्डिवामनविश्वनाथजगन्नाथादीनां मतान्यपि लिखितानि सन्ति। अतस्तस्य सलक्षणमलङ्कारविवेचनं भवति।

यदि भेददृष्ट्या विचारः क्रियते तर्हि वल्लभदेवस्य मल्लिनाथस्य च टीकयोः प्रायः अलङ्कारनामानि समानि दृश्यन्ते, परं दृष्टान्तार्थान्तरन्यासयो:, उपमोत्प्रेक्षयोः भेदः प्रवर्तते। यत्र वल्लभदेवो 'दृष्टान्तालङ्कारम्' कथयति तत्र मल्लिनाथ: 'अर्थान्तरन्यासम्' कथयति। यत्र च मल्लिनाथेनोपमा कथ्यते तत्र वल्लभदेव: 'उत्प्रेक्षाम्' वदति। एवमनयोः क्वचिन् मतभेदः प्रवर्तते।

❋❋❋

## वल्लभदेवमल्लिनाथयोः अन्वयविवेचनम्

शब्दानां युक्तियुक्तस्सम्बन्धोऽन्वय इत्यभिधीयते। पद्येषु वृत्तरक्षणार्थं संस्कृतभाषायां पदक्रमस्यानिवार्यताऽभावाच्च प्रायः कवयः काव्येषु कर्तृकर्मक्रियाक्रमं न रक्षन्ति। सामान्यरूपेण प्रथमं वाक्ये कर्ता भवति, ततश्च कर्म भवति, ततश्च क्रियापदं भवति। तदनुसारमेव विशेषण विशेष्ययोजनाऽपि भवति। काव्येष्वयं क्रमः न भवत्यत: टीकाकाराः श्लोकगतानि सर्वाण्यपि पदानि कर्तृकर्मक्रियापदनाञ्च विशेषणविशेष्यक्रमेण स्थापयन्ति। तत एव वाक्यस्यार्थ: पदार्थो वा भवितुमर्हति। अन्वयस्यापि द्वौ भेदौ स्तः एकः खण्डान्वयो द्वितीयो दण्डान्वयश्च। खण्डान्वयेऽल्पवाक्यानि भवन्ति, दण्डान्वये सम्पूर्णं वाक्यमेकमेव भवति।

अत्र वयं वल्लभदेवमल्लिनाथयोरन्वयपद्धतिं विलोकयामः।

प्रथम सर्गस्य द्वितीयं पद्यं पस्यामश्चेत् तत्र वल्लभदेवस्यान्वय इत्थं वर्तते। यथा -

गतं तिरश्चीन.....१/२ अन्वय:-जनै: आकुलम् ईक्षितम्, एतत् विसारि धाम अध: पतति किं तत् ? अनूरूसारथे: तिरश्चीनं गतं प्रसिद्धम्, हविर्भुजः ऊर्ध्वज्वलनं प्रसिद्धम्।

मल्लिनाथस्यान्वय: अनूरूसारथे: गतं तिरश्चीनं हविर्भुज: ऊध्वज्वलनं प्रसिद्धम्, सर्वतो विसारि धामाध: पतति किमेतदिति आकुलं जनैः ईक्षितम्।

द्वितीयसर्गे च अमृतं नाम यत् सन्त:...... २/२०७ पद्यस्य अन्वयं वल्लभदेव इत्थं करोति। यथा –

अमृतं नाम सन्त: मन्त्रजिह्वेषु जुह्वति मन्दर एव क्षुब्धः तेन क्षुभितस्य अम्भोधेः वर्णना शोभैव।

मल्लिनाथश्चेत्थं करोत्यन्वयम् अहो ! सन्त: मन्त्रजिह्वेषु जुह्वति तदेवामृतम्। यतो मन्दरक्षुब्धक्षुभिताम्भोधिवर्णना शोभैव।

अनेनास्माभिर्विलोकयितुं शक्यते यत् स्वल्पवाक्यान्याश्रित्य वल्लभदेव: सारल्येन खण्डान्वयपद्धत्या प्रथमं मुख्यवाक्यं विलिख्य ततश्च विशेषणविशेष्यचिन्तनं विदधाति। परं मल्लिनाथो दण्डान्वयपद्धतिमाश्रित्य यथाक्रमं विशेषणविशेष्योल्लेखपुरस्सरं समस्तमेव वाक्यं विलिख्यान्वयं करोति।

सर्वत्र तथा नास्ति क्वचित् तस्यान्वयेषु खण्डान्वयपद्धतिरपि विलोक्यते। परं क्वचिदपवादरूपेणैव विलोक्यते।

उपेयिवसि.....२/११४ पद्ये वल्लभदेवस्यान्वयः यथा - हे कृष्ण ! तव चरैः राजन्यकानि एकार्थानि कर्तारः। आजातशात्रवीं पुरीमुपेयुवांसि। कीदृशैः उपायज्ञैः।

अत्र उपायज्ञैः चरैः इति दूरान्वयः दृश्यते । चरै: राजन्यकानि एकार्थानि कर्तारः, तद्वाक्यं मल्लिनाथेन कथं लिख्यते तद् विलोकयमः।

मल्लिनाथस्यान्वयः - तव उपायज्ञैः चरै: एकार्थानि राजन्यकानि आजातशात्रवीं पुरीम् उपयुवांसि कर्तारः।

अत्र मल्लिनाथन 'एकार्थानि राजन्यानि' लिख्यते परं तत्र वल्लभदेवेन 'राजन्यानि एकार्थानि' इत्थं विलिख्य चराणां कर्मणो दर्शनं कारितम्। अत्र वल्लभदेवस्य अन्वये वैशिष्ट्यं दृश्यते। अनेनार्थे महान् भेदो जायते।

श्रीवल्लभदेवमल्लिनाथयोरन्वयविषये एतद्वक्तुं शक्यते यत् मल्लिनाथस्य दण्डान्वयपद्धतिः वल्लभदेवस्य खण्डान्वयपद्धतिः। वल्लभदेवस्यान्वये सारल्यं सूक्ष्मदृष्टिश्च वर्तते। मल्लिनाथस्यान्वये काठिन्यं दृश्यते। अतो ये सारल्यमिच्छन्ति तेषां कृते वल्लभदेवस्यान्वय उपकारको वर्तते। तथैव ये काठिन्यपराः विद्वांसस्तेषां कृते मल्लिनाथस्यान्वयो मनोरञ्जकः।

♦♦♦♦♦

## श्रीवल्लभदेवमल्लिनाथयोः टीकयोः कोशविवेचनम्।

प्राचीनटीकासु विलोक्यते यदन्वयेन सहैव टीकाकारा अन्वयक्रमेणैव पर्याय-शब्दानामुल्लेखं कुर्वन्ति। तेन वाचकस्यार्थबोधस्तु भवत्येव शब्दसमृद्धिरपि वृद्धिं याति। तत्र च क्वचित् पर्यायशब्दमेव यच्छन्ति, क्वचिच्चैकस्य शब्दस्यानेके शब्दाः दीयन्ते, क्वचिच्च ध्वन्यर्थं श्लेषार्थं वा दर्शयितुं कस्याप्येकस्यैव शब्दस्यानेकार्थान् कुर्वन्ति। अत एव कविः करोति **काव्यानि रसं जानन्ति पण्डिता:। तरु: प्रसूयते पुष्पाणि मरुद्वहति सौरभम्।** पद्यमिदं प्रसिद्धिं गतम्। अयञ्चावसरो माघकाव्ये सुलभ एव वर्तते। कारणं शिशुपालवधे तु श्लेषालङ्कारस्य प्राचुर्यं वर्तते तत्र च पञ्चदशसर्गे निन्दास्तुतिसमन्वितानि पद्यान्यपि वर्तन्ते। अतः यावत् कोशज्ञानमधिकं तावदर्थावबोध: स्पष्टो जायते।

वल्लभदेव: प्राय: कस्यचित् शब्दस्य पर्यायमात्रं यच्छति। परं यदि नूतनः शब्दो भवति तर्हि तस्यानेकान् पर्यायशब्दान् ददाति। कोशसन्दर्भोऽपि क्वचित् दीयते। यत्र व्यङ्ग्यार्थो भवति तत्रापि पर्यायशब्दं विशेषं दत्वाऽर्थद्वयं स्पष्टं कुरुते। एतदर्थञ्च वल्लभदेवेन अमरनिघण्टु- विश्ववैजयन्तीहलायुधकोशानां सन्दर्भो दीयते।

परं मल्लिनाथस्तु प्रायः प्रतिपद्यं कोशसन्दर्भं ददात्येव। स च ध्वनिसम्प्रदायप्रशंसक इति ज्ञायते। अतस्तस्य टीकायां ध्वनेः प्राचुर्यं दृश्यते। तस्माच्च कोशसन्दर्भोऽनिवार्यो भवति।

मल्लिनाथ: अगत्स्यानेकार्थाभिधानचिन्तामणि-अभिधानरत्नमालाऽमर, त्रिकाण्ड विश्ववैजयन्तीशब्दार्णवसज्जनहलायुधहेमचन्द्रादीनां बहूनां कोशानां सन्दर्भं यच्छति। तस्मात् वल्लभदेवापेक्षया मल्लिनाथस्य कोशज्ञानं विशेषमिति न सन्देहः।

♦♦♦♦♦

## वल्लभदेवमल्लिनाथयोः ध्वनिविचारविवेचनम् ।

काव्यस्य व्यंग्यार्थो ध्वनिरित्यभिधीयते। अस्य च सम्प्रदायस्य प्रवर्तक आनन्दवर्धनः। तेन च ध्वन्यालोके 'काव्यस्यात्मा ध्वनिरिति' उक्तम्। अत एव ध्वन्यालोके तेन भणितम्।

**प्रतीतयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।**
**यत्तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गेषु।। ध्वन्यालोके १-४**

ईदृशं ध्वनेर्महत्त्वं ज्ञात्वा टीकाकारा यत्रावसरं प्राप्नुवन्ति तत्र ध्वन्यर्थं प्रदर्शयन्ति। क्वचित् कवेः सोऽर्थोऽभिमतो भवति, तर्हि क्वचित् टीकाकार एव स्वज्ञानेन ध्वन्यर्थं प्रकटीकरोति। टीकाकारो वस्तुध्वनिम् अलङ्कारध्वनिम्, रसध्वनिं वाऽऽश्रित्यार्थभेदं करोति।

तत्र वल्लभदेवः क्वचित् व्यङ्ग्यार्थं प्रकटीकरोति, परं तटस्थभावेनैव तेनान्योऽर्थो लिख्यते। दूतसंवादे तु यथा अर्था: शक्या आसन् तथा सर्वेऽपि लिखिताः। अतस्तस्य व्यङ्ग्यार्थज्ञानं समीचीनमेव वर्तते।

मल्लिनाथस्तु तदर्थं प्रयत्नवान् दृश्यते। तस्य ध्वनिसम्प्रदाये पक्षपात इव दृश्यते। अतो यत्रावसरो मिलति तत्र कोशबलेनानेकार्थान् प्रकटीकरोति।

वल्लभदेवस्येदं साहजिकं दृश्यते, मल्लिनाथस्य च व्यङ्ग्यार्थकथने विशिष्टा रुचिर्ज्ञायते। अत एवात्र यदा वयं वल्लभदेवटीकामाश्रित्य माघकाव्यं पठामस्तदा तत् काव्यं सरलं सहजं चेत्यनुभूतिं कुर्मः, परं मल्लिनाथटीकामाश्रित्य माघकाव्यं पठामस्तदा तु तत्र काठिन्यं नवीनत्वञ्चानुभवामः।

♦♦♦♦♦

## वल्लभदेवमल्लिनाथयो: टीकयोः रसविवेचनम् ।

काव्यशास्त्रे रसालङ्काररीतिवक्रोक्तिध्वन्यादयः सम्प्रदायाः प्रवर्तन्ते। तत्र सर्वप्राचीनः सम्प्रदाय: रससम्प्रदायो यस्य सम्प्रदायस्य स्थापना भरतमुनिना नाट्यशास्त्रे कृता। रस्यते आस्वाद्यते इति रसः। स एव काव्यस्यात्मतत्त्वम् वर्तते। अस्य सम्प्रदायस्य मुख्यसूत्रं 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति:' अर्थात् विभावानुभावव्यभिचारिभावानां संयोगाद् रसनिष्पत्ति: भवति। अत्र च रति-शोक-हास-क्रोध-उत्साह–विस्मय-भय-जुगुप्सा इमे भावा वर्तन्ते, तेभ्य: क्रमश: शृङ्गार-करुण-हास्य-रौद्र-वीर-अद्भुत-भयानक-बीभत्सादयः रसाः निष्पद्यन्ते। एतादृशमस्य महत्त्वं विलोक्य विश्वनाथेन काव्यस्य लक्षणमेव 'वाक्यं रसात्मकं काव्य'मिति कथितम्। अतः काव्याभ्यासावसरे रसभावज्ञानमनिवार्यमेवान्यथा काव्यस्यार्थज्ञानं परमनुभूतिस्तु नैव जायते।

वल्लभदेवस्यटीकायां रसचर्चा क्वचिदपवादरूपेण वर्तते। परं मल्लिनाथेन प्रतिसर्गं प्रायः रसस्योल्लेखः कृतः। तेन महाकाव्यलक्षणानुसारं समीचीना रसचर्चा कृता वर्तते। मल्लिनाथस्य रसालङ्कारध्वनिचर्चास्तु नितान्तं योग्याः।

♦♦♦♦♦

## वल्लभदेवमल्लिनाथवो: टीकयो: चित्रालङ्कारविवेचनम्

पण्डितयुगे माघस्य समय आसीत्। तदानीं संस्कृतभाषा नृपभवनाश्रिता विद्वद्भोग्या चावर्तत। यदि पण्डितसमाजे स्थानं प्राप्तव्यं तर्हि किञ्चिदद्भुतं लेखनीयमावश्यकमासीत्। तदानीं तदानीन्तनाः पण्डिता अपि भारवेरदम्मकुर्वन्नतो

यदि समाजादरो नृपभवनाश्रयश्च प्राप्तव्योऽथवा यशः प्राप्तव्यं, तर्हि भारवेरपि किञ्चिदग्रे गमनीयं भवेत्। अतो माघेन भारविरेवादर्शरूपेण स्वीकृतः। तद्दर्शितपथमेवाश्रित्य काव्यरचनां कृतवान्।

भारविणा स्वल्पं विषयं महाभारतादुद्धृत्य किरातार्जुनीयमष्टादश-सर्गसमन्वितं बृहत्महाकाव्यं लिखितम्, तथा चानेनापि तथैव महाभारतादेव विषयं स्वीकृत्य विंशतिसर्गसमन्वितं तस्मादपि बृहत्तरं महाकाव्यं विरचितम्। उभयोरपि काव्ययोर्वीररसः प्राधान्यं भजते। परं तत्र रसात्पाण्डित्यचातुरीप्रदर्शने विशेषः प्रयत्नो दृश्यते। वैदुष्यस्पर्धा वाऽन्या कापि स्पर्धा यथा यथा पराकाष्ठां याति तथा तथा तीव्रा तीव्रतरा च जायत इति सर्वत्र दृष्टिपथमायाति। इयमपि पाण्डित्यप्रदर्शनस्पर्धा भारवेः किरातार्जुनीये पञ्चदशसर्गे माघस्य शिशुपालवधे चैकोनविंशे सर्गे पराकाष्ठां प्राप्ता। स्पर्धाऽन्धाः समाजे क्वचिदप्युत्तमाधममूल्याङ्कनं न कुर्वन्ति। यतो हि काव्येषु चित्रकाव्यन्त्वधमं स्मृतमलङ्कारविद्भिस्तथापि तदेव काव्यप्रकारं स्वीकृत्य भारविणा पञ्चदशश्लोकाः, माघेन च तस्मादप्यधिकं द्वाविंशतिश्लोका लिखिताः।

यद्यपि सामान्यानां तत्र चित्रकाव्ये प्रवेशो न सरलस्तथापि सर्वत्रातृप्तमनसां पण्डितानान्तु तच्चित्रकाव्यं परमविश्रामभूमिः।

यदि भारवेर्माघस्य वा परिचयो दातव्यो भवति तदा चित्रकाव्यस्य चर्चा विशेषं स्थानमर्हति। तत्तु तयोरपूर्वं वैशिष्ट्यं तत्र च टीकाकाराणामपि सम्यक् परिचयो भवति। चित्रकाव्यविषयेऽस्माभिर्यत्र लेखनं पठितं तत्र प्रायः सर्वत्र वल्लभदेवमल्लिनाथटीकयोरेव प्रतिबिम्बदर्शनं जातम्। अतोऽत्र चित्रकाव्यचिन्तनावसरः संप्राप्तः।

♦♦♦♦♦

## अथ चित्रकाव्यचर्चा

चित्रकाव्यविषये मम्मटेन कव्यप्रकाशे 'शब्दचित्रं वाच्यचित्रमव्यग्यं त्ववरं स्मृतम्' इति लिखितम्। परमत्र किञ्चिन्लेखनीयमेतस्मादेवापतितं यतो हि चित्रकाव्यं सर्वत्र निन्द्यं न भवति। भारविणा माघेन च रसानुभूतिबाधा न भवेत् तथैतस्य प्रयोगः कृतः, अपरञ्च काव्यस्यान्तिमे भागेऽस्य प्रयोगो विहितः, एतस्मादपि न कथातन्तुच्छेदानुभूतिर्जायते। यथा मुखे कृष्णवर्णो न शोभते यदि

सम्पूर्णं मुखमेवावृतं कृष्णवर्णेन, परं यदि क्वचिदेकस्थाने स्वल्पं तिलमात्रं कृष्णचिह्नं चन्द्रमसो लक्ष्मेव शोभावृद्धिं विदधाति। अतो महाकाव्यस्योत्तरार्धे यदि कवयः स्ववैदुष्यप्रदर्शनाय विदुषाञ्च मनोविनोदाय चित्रकाव्यरचनां कुर्वन्ति तर्हि तत्तु नितान्तं प्रशस्यं कविकर्मोच्यते।

अत एव कवय एनं पन्थानमाश्रित्य काव्यानि लिखन्ति। ये परिपक्वपाण्डित्यपूर्णा भवन्ति त एव कवयः शब्दचित्रात्मककाव्यानां रचनां कर्तुं प्रभवन्ति। माघेनापि स्ववैदुष्यदर्शनायैकोनविंशे सर्गे युद्धवर्णने चित्रालङ्कारालङ्कृतकाव्यानि विलिख्य चित्रकाव्यस्य योग्यसमये योग्यस्थले योग्य एवं प्रयोगो विहितः, तस्मादत्र चित्रकाव्यप्रयोगो गुणायते। एवञ्चासमयेऽस्थानेऽपर्याप्तमात्रायां कस्यापि प्रयोगो दोषाय एव भवतीति कस्य न विदितम्। मम्मटेन विश्वनाथेन च चित्रकाव्यलक्षणानि लिखितानि। परं तत्र मम्मटस्य चित्रकाव्यविषये 'कष्टं काव्यमिति' कथनं चित्रकाव्यस्य महत्त्वं वर्धयत्येव कारणं यद् यत् साधिष्ठं भवति तत्र काठिन्या नुभूतिस्तु भवत्येव। अतो नेदं गर्हितं काव्यं परं श्रेष्ठमेव। यथा विद्यावतां भागवते परीक्षा भवति तथैव कवीनामपि चित्रकाव्ये कवित्वपरीक्षणमेव जायते।

माघेन शब्दक्रीडानन्दस्तु 'न्यधायिषाताम्' (१/१३), अभिन्यवीविशत् (१/१५), अचूचुरत् (१-१६), प्रतिचस्करे (१/४७), अनुचकम्पिरे (१.६१), विभराम्बभूवे (३.२), आसेदिरे (३.८०), यियक्षमाणेन (२.१), लिलङ्घयिषतः (२.५८), दन्दह्यते (२.११), आदिस्थलेषु व्याकरण- विशेषतां दर्शयता प्राप्तः, परं चित्रालङ्कारे तेन तस्य शब्दानन्दस्य पराकाष्ठा प्राप्ता। भारविमनुसृत्य कृतं चित्रालङ्कारनिरूपणं तस्य पाण्डित्यप्रकर्षं वर्धयति। व्याकरणविशिष्टानां पदानां प्रयोगावसरेऽपि तेन शब्दानन्दक्रीडां कर्तुं शक्यते परं रसानुभूतिबाधा न भवेदिति विचार्य तेन चित्रालङ्कारस्य रचना महाकाव्यस्यान्तिमे भागे कृतेति तस्यौचित्यज्ञानं दर्शयति।

अथ चित्रालङ्कारविषये विचारयामस्तर्हि चित्रालङ्कारस्य द्वादशप्रमुखभेदाः षट् सप्तत्यधिकशतमुपभेदाश्च सन्ति। ततश्चेत्थं वक्तुं पार्यते यच्चित्रालङ्कारस्य षट् प्रमुखभेदाः षोडशोपभेदाश्च भारविकाव्ये माघकाव्ये च प्रयुक्ताः सन्ति। यदि शिशुपालवधस्यैव विवेचनं क्रियते तर्हि तत्र चित्रालङ्कारप्रमुखभेदेषु **वर्णचित्राख्यः** प्रथमः भेदो वर्तते, यस्मिन् वर्णानां

चित्रोत्पादिका रचना भवति। वर्णचित्रप्रभेदेषु समस्ते पादे कस्यचिदेकस्य वर्णस्य स्थितिर्भवति, तस्मात् सम्पूर्णे पद्ये चत्वार एव वर्णा भवन्ति।

(१) यथा - जजौजोजाजिजिज्जाजी, तं ततोऽतितताातितुत्।
भाभोऽभीभाभिभूभाभूरारारिरिरीररः॥ (१९.३)

पूर्वस्मिन् पद्येप्रथमचरणे जकार:, द्वितीयचरणे तकारः, तृतीयचरणे भकार:, चतुर्थचरणे रेफश्च वर्तते। वर्णद्वययुक्तः द्विवर्णः द्वितीयो वर्णचित्रप्रभेदो विलोक्यते।

यथा –

(१) भूरिभिर्भारिभिभीरैर्भूभारैरभिरेभिरे।
भेरीरेभिभिरभ्राभैरभरुभिरिभौरिभाः॥ (१९.६६)
पूर्वलिखितपद्ये भुर् इति वर्णद्वययुक्ता रचना वर्तते।

(२) नीलेनानालनलिननिलीनील्ललनालिना।
ललनालालनेनालं लीलालोलेन लालिना।। (१९.८४)
पूर्वलिखितपद्ये न् ल् इति वर्णद्वयम्।

(३) विभावी विभवी भाभो विभाभावी विवो विभीः।
भावाभिभावी भावावो भवाभावो भुवो विभुः।। (१९.८६)
पूर्वलिखिते व् भ् इति वर्णद्वयं वर्तते।

(४) प्रापे रूपी पुराऽरेपाः परिपूरी पर: परे:।
रोपैरपारैरुपरि पुपूरेऽपि पुरोऽपरैः॥ (१९.९४)
पूर्वलिखितपद्ये प्-र् इति वर्णद्वयम्।

(५) लोकालोकी कलोऽकल्ककलिलोऽलिकुलालकः।
कालोऽकलोऽकलिः काले कोलकेलिकिलः किल।। (१९.९८)
पूर्वपद्ये ल्-क् इति वर्णद्वयम्।

(६) वररोऽविवरोवैरिविवारी वारिरारव:।
विववार वरो वैरं वीरो रविरिवौर्वर:॥ (१९.१००)
पूर्वपद्ये व्-र् इति वर्णद्वयम्।

(७) राजराजी रुरोजाजेरजिरेऽजोऽजरोऽरजाः।
रेजारिजूजोर्जार्ज्जी रराजर्जुरजर्जर:॥ (१९. १०२)
पूर्वपद्ये ज्-र् इति वर्णद्वयम्।

(८) क्रूरारिकारी कोरेककारकः कारिकाकरः।
कोरकाकारकरक: करीर: कर्करोऽर्करुक्।। (१९.१०४)
पूर्वपद्ये क्-र् इति वर्णद्वयस्य योगः।

(९) दारी दरदरिद्रोऽरिदारूदारोऽद्रिदूरदः।
दूरादरौद्रोददरद्रोदोरुद्वारुरादरी॥ (१९.१०६)
पूर्वपद्ये द्-र् इति वर्णद्वयस्य योगः।

(१०) शूरः शौरिरशिशिरेराशाशैराशुराशिशः।
शरारुः श्रीशरीरेशः शुशूरेऽरिशिरः शरैः॥ (१९.१०८)
पूर्वदर्शितश्लोके श्-र् इति वर्णद्वयस्य योगः।

अस्माभिर्दशपद्येषु **'द्वयक्षर:'** नाम द्वितीयो वर्णचित्रालङ्कारप्रभेदो विलोकितः।

अथैकवर्णयुतः **'एकाक्षर:'** नाम तृतीयवर्णचित्रप्रभेदो विलोक्यते।

**दाददो दुद्ददुद्दादी दादादो दूददीदयोः।**
**दुद्दादं दददे दुद्दे ददाददददोऽदद:॥ (१९.११४)**

पूर्वपद्ये दइत्येक एव वर्णो दरीदृश्यते।

शिशुपालवधे चित्रालङ्कारस्य द्वितीय: प्रधानभेद: स्थानचित्रसंज्ञः, यस्मिन् भेदे समानोच्चारण- स्थानीयवर्णानामाश्चर्योत्पादिका रचना वर्तते। स्थानचित्रप्रभेदेषु ओष्ठस्थानीयवर्णरहितः अतः शेषचतुरुच्चारणस्थानीयवर्णरचना-युक्तो निरौष्ठ्य इति संज्ञित: प्रथमः प्रभेदः।

यथा –

**दधानैर्धनसादृश्यं लसदायदंशनैः।**

**तत्र काञ्चनसच्छाया ससृजे तै: शराशनि:॥ (१९.११)**

इत्यौष्ट्यवर्णरहितं पद्यम्।

अथ तालुस्थानीयवर्णवर्जितः अतालव्यसंज्ञको द्वितीयः स्थानचित्रप्रभेदो विलोक्यते।

**नामाक्षराणां मलिता मा भूद्भर्तुरतः स्फुटम्।**
**अगृह्णन्त पराङ्गानामसूनस्रन्न मार्गणाः॥ (१९.११०)**

पूर्वपद्यम् इस्वर-चवर्गवर्ण-य्-श् व्यंजनरहितमस्ति तस्माद् **अतालव्य-संज्ञकस्य** द्वितीयस्य स्थानचित्रप्रभेदस्योदाहरणम्।

अत्र स्मरणीयं यत् सः **‘अतालव्यसंज्ञकः’** स्थानचित्रप्रभेदो भारविकाव्ये न दृश्यते।

ततः चित्रालङ्कारस्य तृतीयः प्रमुखभेदः **‘स्वरचित्राख्यः’** वर्तते। यस्मिन् भेदे स्वरस्य चित्रोत्पादिका रचना भवति।

स्वरचित्रप्रभेदेष्वेकः स्वरयुक्तसकलवर्णवानतः संयोगाभाववान् **‘असंयोगः’** नाम स्वरचित्रप्रभेदः शिशुपालवधे विलोक्यते। अयमपि माघकाव्य एव दृश्यते न तु किरातार्जुनीये।

यथा –

**निपीडनादिव मिथो दानतोयमनारतम्।**
**वपुषामदयाघातादिभानामभितोऽगलत्।। (१९६८)**

इत्थं तत्र संयोगाक्षररहितं पद्यं दृश्यते।

अथ शिशुपालवधे चित्रालङ्कारस्य चतुर्थो मुख्यभेदः **‘गतिचित्राख्यः’** वर्तते। यस्मिन् भेदे वर्णानां नियतगत्यात्मिका चित्रोत्पादिका रचना भवति। गतिचित्र-प्रभेदषु यत्र श्लोकश्लोकार्धपाद- पदार्धानां विपर्यस्तावृत्यानन्तरश्लोकश्लोकार्धपादपादार्धरचना क्रियते, तत्र **श्लोकश्लोकार्धपाद- पादार्धप्रतिलोमानुलोमसंज्ञकाः** चत्वारः प्रभेदा भवन्ति। तेषां प्रभेदानां गतप्रत्यागतेति नामान्तरमपि विद्यते।

यथा –

| | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ | १३ | १४ | १५ | १६ |
| वा | ह | ना | ज | नि | मा | ना | से | सा | रा | जा | व | न | मा | त | तः। |
| १७ | १८ | १९ | २० | २१ | २२ | २३ | २४ | २५ | २६ | २७ | २८ | २९ | ३० | ३१ | ३२ |
| म | त्त | सा | र | ग | रा | जे | भे | भा | री | हा | व | ज्ज | न | ध्व | निः।। |

(१७.३३)

पूर्वलिखितश्लोकयोः प्रथमश्लोकगतवर्णानां विपर्यस्तावृत्या दर्शितक्रमेण द्वितीयश्लोक- रचनया श्लोकप्रतिलोमानुलोमप्रभेदो वर्तते।

अपरञ्च –

विदितं दिवि केऽनीके तं यातं निजिताजिनि।
विगदं गवि रोद्धारो योद्धा यो नतिमति न॥ (१९.९०)

तत्र पूर्वपद्ये श्लोकगतवर्णानां विपर्यस्तावृत्या तेषामेव पदानां समानार्थदायिका समाना श्लोकान्तररचनापि साधयति विशिष्टं दुष्करञ्च श्लोकप्रतिलोमानुलोमप्रभेदम्।

अपरञ्च –

१ २ ३ ४५६ ७ ८ ९ १० ११ १५ १३ १४ १५ १६
तं श्रिया घनयाऽनस्तरुचा सा र त या त या।
१६ १५ १४ १३ १२ ११ १० ९८ ५ ६ ५४३ २१
या त या त र सा चा रुस्त न याऽनघया श्रितम्॥ (१९.८८)

शिशुपालवध एव न तु किरातार्जुनीये पूर्वलिखितप्रभेदो दृश्यते। श्लोकपूर्वार्धगतवर्णानां प्रदर्शितक्रमेण विपर्यस्तावृत्या श्लोकोत्तरार्धरचनया श्लोकार्धप्रतिलोमानुलोमप्रभेद: कथ्यते।

अपरञ्च –

१२ ३ ४ ५ ६ ७ ८ ८७६५४३२१
वारणागगभीरा सा, साराऽभीगगणारवा।
१ २ ३ ४ ५ ६ ७८ ८७६ ५ ४ ३ २ १
कारितारिवधा सेना, नासेधा वरतारिका।। (१९.४४)

पूर्वपद्ये पूर्वपादगतवर्णानां दर्शितक्रमेण विपर्यस्तावृत्या उत्तरपादरचनया पादप्रतिलोमा- नुलोमप्रभेदो वर्तते।

अपरञ्च –

१ २ ३ ४ ४३ २ १ ५ ६७ ८८७ ६५
नानाजाववजानाना सा जनौघघनौजसा।
९१० ११ १२ १२ ११ १० ९ १३ १४ १५ १६ १६ १५ १४ १३
परा नि हाऽहा नि राप तान्वि या त तयाऽन्वितो॥ (१९४०)

पूर्वलिखितप्रभेदोदाहरणं भारविकाव्ये न प्राप्यते केवलमत्र शिशुपालवध एव प्राप्यते। प्रतिपादपूर्वार्धगतवर्णानां निदर्शितक्रमेण विपर्यस्तावृत्या तदुत्तरार्धरचनया पादार्धप्रति- लोमानुलोमप्रभेदः कथ्यते।

अथ च शिशुपालवधे द्वितीयो गतिचित्रप्रभेदो नाम्ना **'अर्धभ्रम:'** यत्र पादार्धानामेव, भ्रमणे पादार्ध: प्राप्यते।

यथा –

अभीकमतिकेनेद्धे भीतानन्दस्य नाशने।
कनत्सकामसेनाके मन्दकामकमस्यति॥ (१९७२)

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| १<br>अ | ९<br>भी | १७<br>क | २५<br>म | ३२<br>ति | २४<br>के | १६<br>ने | ८<br>द्धे |
| २<br>भी | १०<br>ता | १८<br>न | २६<br>न्द | ३१<br>स्य | २३<br>ना | १५<br>श | ७<br>ने |
| ३<br>क | ११<br>न | १९<br>त्स | २७<br>का | ३०<br>म | २२<br>से | १४<br>ना | ६<br>के |
| ४<br>म | १२<br>न्द | २०<br>का | २८<br>म | २९<br>क | २१<br>म | १३<br>स्य | ५<br>ति |

पूर्वलिखितपद्ये पादार्धानां कोष्ठाङ्कदर्शितक्रमेण भ्रमणे पादार्धलाभाद् अर्धभ्रमो नाम गतिचित्रप्रभेदः वर्तते।

ततश्च शिशुपालवधे नयनविषयमायाति सर्वतोभद्रसंज्ञस्तृतीयो गतिचित्रप्रभेदो यत्र सर्वत: सर्वपादानां भ्रमणे श्लोक: सम्पूर्णो लभ्यते।

स का र ना ना र का स का य सा द द सा य का।
र सा ह वा वा ह सा र ना द वा द द वा द ना॥(१९.२७)

| | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | |
|---|---|---|---|---|---|---|---|---|---|
| १ | स | का | र | ना | ना | र | का | स | १ |
| २ | का | य | सा | द | द | सा | य | का | २ |
| ३ | र | सा | ह | वा | वा | ह | सा | र | ३ |
| ४ | ना | द | वा | द | द | वा | द | ना | ४ |
| ५ | ना | द | वा | द | द | वा | द | ना | ५ |
| ६ | र | सा | ह | वा | वा | ह | सा | र | ६ |
| ७ | का | य | सा | द | द | सा | य | का | ७ |
| ८ | स | का | र | ना | ना | र | का | स | ८ |
| | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | |

अथ च **गोमूत्रिकासंज्ञकः** गतिचित्रप्रभेदो लिख्यते।

यथा - प्रवृत्ते विकसद्ध्वानं साधनेऽप्यविषादिभिः।
वव‍ृषे विकसद्दानं युधमाप्य विषाणिभिः॥ (१९४६)




पूर्वलिखितो गोमूत्रिकासंज्ञको गतिचित्रप्रभेदो वर्तते। यत्र दुष्करादभुता चैकान्तरितसमानुवर्णरचना भवति। यया प्रदर्शितपङ्क्तिगत्या श्लोकार्धलाभेन गोमूत्रिकासंज्ञकोऽयं गतिचक्रप्रभेद: कथ्यते।

अथ च माधकाव्ये चित्रालङ्कारस्य पञ्चम: प्रमुखभेदों **'गूढसंज्ञक:'** दृश्यते, यः कश्चिच्छब्दोऽर्थो वा कविना गुप्ततया प्रदत्तो वर्तते।

शिशुपालवधे गूढप्रभेदेषु गूढचतुर्थपादाख्य: प्रभेद:, यत्र श्लोकस्य चतुर्थपादगतवर्णाः शेषपादेषु निलीना विद्यन्ते।

यथा – शरवर्षीमहानादः स्फुरत्कार्मुककेतनः।
नीलच्छविरसौ रेजे केशवच्छलनीरदः॥ (१९.९६)

श्लोकेऽस्मिन् चतुर्थपादगतवर्णानां शेषपादेषु निलीनतया गूढचतुर्थपादाख्यश्चित्रालङ्कारभेदो वर्तते।

ततोऽयं मुरजबन्धो विलोक्यते यथा –




केवलं शिशुपालवध एव चित्रालङ्कारस्य षष्ठः प्रमुखभेदो बन्धचित्राख्यो वर्तते। माघकाव्येऽपि मुरजाकारवर्णरचनामयः मुरजबन्धः, यत्र स्वरवर्णरचनामय: चक्रबन्धश्चेति लभ्येते द्वौ प्रभेदौ।

तत्र - सा सेना गमनारम्भे रसेनासीदनारता।

तारनादजना मत्तधीरनागमनामया॥ (१९.२९)

पूर्वलिखितपद्ये दर्शितक्रमेण मुरजाकारवर्णरचनयाऽस्ति मुरजबन्ध:।

अपि च -

सत्त्वं मानविशिष्टमाजिर भसादालय भव्यः पुरो
लब्धाधक्षयशुद्धिरुद्धुरतर श्रीवत्सभूमिर्मुदा।
मुक्त्वा काममपास्तभी: परमृगव्याधः स नादं हर रेकैधै: समकालमभ्रमुदयी
रापैस्तदाऽऽतस्तरे॥(१९.१२०)




[अत्र चक्रबन्धे दक्षिणपार्श्वे वर्णरहिते चक्रखण्डे 'म्' – 'भ्र' इति वर्णौ वाच्यौ सुधीभि: सं] पूर्वपद्ये षडक्षएरयुक्तचक्राकारवर्णरचनया चित्रदर्शितरीत्या तृतीयवलये 'माघकाव्यमिद', पष्ठे वलये च 'शिशुपालवध:' इति कविकाव्यनामाङ्कनेन च कविकाव्यनामाङ्क: षडक्षर: चक्रबन्धाख्यः चित्रालङ्कारप्रभेदोऽस्त्यपरः।

अन्ते चेदं वक्तुं शक्यते यत् शिशुपालवघे वर्णचित्रस्थानचित्रस्वरचित्रगति-चित्रगूढचित्रबन्धचित्राणां षण्णां चित्रालंकारप्रमुखपद्यानां रचना विलोक्यते। अपरञ्च शिशुपालवधे एकाक्षरपादः, द्वक्षर:, एकाक्षरः, निरौष्ठयः, अतालव्य:, असंयोग:, श्लोकप्रतिलोमानुलोम:, श्लोकार्धप्रतिलोमानुलोम:, पादप्रतिलोमानुलोम:,

पादार्ध- प्रतिलोमानुलोम:, अर्धभ्रम:, सर्वतोभद्र:, गोमूत्रिका, गूढचतुर्थपादः, मुरजबन्धः, चक्र- बन्धश्चेति षोडशचित्रालङ्कारप्रभेदाः। अत्र शिशुपालवधे द्व्यक्षरस्य श्लोकदशकम्, श्लोकप्रतिलोमानुलोमस्य पद्यद्वयम्, शेषचतुर्दशप्रभेदानामेकैकं पद्यमिति संकलनेन षड्विंशतिपद्यानि चित्रालङ्कारमण्डितानि। एते चित्रालङ्काराः माघकवेः कौशलं शास्त्रार्णवे चागाधं तरणकौशलं प्रदर्शयन्ति।

♦♦♦♦♦

## वल्लभदेवमल्लिनाथयो: टीकयो: वृत्तविवेचनम्

संस्कृतभाषा शब्ददृष्ट्या समृद्धा भाषा वर्तते। यत्र कस्यचिदेकस्य शब्दस्य कृते नैके शब्दा: प्राप्यन्ते। तस्मात् कारणादेव लघुगुरुवर्णमाश्रित्य यमतरजभनसादिगणसमूहञ्चाश्रित्य वृत्तरचनां कर्तुं शक्यते। तत्र नैकानि वृत्तानि सूक्ष्मातिसूक्ष्मनियमबद्धानि विलोक्यन्ते तत्रापि कारणन्तु शब्दसमृद्धिरेव। नान्यत्र कुत्रापि संस्कृतभाषां विहायैतादृशं सुन्दरं स्पष्टं च वृत्तस्वरूपं दृश्यते। तत्र च वृत्तरचनायां निपुणोऽयं माघकवि:। महाकाव्यलक्षणानुसारं विलोकयामश्चेत् समस्तेऽपि सर्गे किमप्येकमेव वृत्तं भवति परमन्ते कतिपयश्लोकेषु वृत्तपरिवर्तनम् कर्तव्यमिति नियम: परं माघेनेदमस्वीकृत्यैव चतुर्थसर्गेऽनेकवृत्तानां परिचयो दत्त:। इदमेव माघस्य वृत्तविषयकं पाण्डित्यं प्रकटीकरोति।

कस्मिन् पद्ये किं वृत्तं वर्तते तज्ज्ञानं भवति चेद् वयं काव्यगानं कर्तुं प्रभवामो नान्यथा तच्छ्रव्यम्। अत: टीकाकारा वृत्तपरिचयं यच्छन्ति। वृत्तशास्त्रं गणितशास्त्रवद् वर्तते तत्र रीतिनामभेदो वा क्वचित् भवति, किन्तु यथा गणिते १ + १ = २ एव भवति तथैवात्रापि मात्रानुसारमक्षरानुसारञ्च परिचयो नाम वा भवति। प्राचीनसमये तु गायत्र्यादिच्छन्दसां स्वरूपे सारल्यं विलोक्यते परं नूतने वृत्तस्वरूपे काठिन्यं दृश्यते। वृत्तरचनायामपि गच्छता कालेन पाण्डित्यप्रवेशो जात:। यस्य कवे: कल्पनाबलं समीचीनं भवति किन्तु शब्दसमृद्धिर्यदि समीचीना न भवति तर्हि तस्य काव्येषु वृत्तवैविध्यं न सम्भवति। अत: यावद् वृत्तवैविध्यं तावेदेवाधिकं पाण्डित्यमिति नियम:। पिङ्गनाथश्चास्य वृत्तशास्त्रस्य महानाचार्यो जात:। प्राय: सर्वे तत्कृतामेव वृत्तव्याख्यामनुसरन्ति।

श्रीवल्लभदेवमल्लिनाथयो: व्याख्ययो: दृष्टि: क्रियते चेत् द्वाप्युभौ टीकाकारौ सर्गारम्भ एव वृत्तनामोल्लेखं कुर्वन्ति। मध्ये च यत्र वृत्तपरिवर्तनं भवति तत्राप्युल्लेखो विधीयते। क्वचिच्च वल्लभदेवस्य टीकायां प्रसिद्धवृत्तनामानि प्राप्यन्ते, येषां वृत्तानां प्रसिद्धेषु छन्दोग्रन्थेषूपलब्धिस्तु दुर्लभैव। यथा 'श्रिया जुष्टं....' माघकाव्यस्यान्तिमे पद्ये वल्लभदेवेन 'सुवृत्ता' नाम वृत्तं कथ्यते यस्य लक्षणञ्च 'सुवृत्ते: गौडं खं सदनुलघंव: पञ्चस्वाङ्गषौ' इति दत्तं वर्तते। यच्चपूर्णमशुद्धं दृश्यते। तत्रैव मल्लिनाथेन 'रसत्र्वैश्चैय्यौन्सौ ररगुरुयुता मेघविस्फूर्जिता स्यात्' इति वृत्तलक्षणं दत्त्वा मेघविस्फूर्जितावृत्तमिति तस्य समीचीन: परिचयो दत्त:। वल्लभदेवस्य समये कदाचिदिदमेव वृत्तं सुवृत्तनाम्ना प्रसिद्धं स्यादिति।

अन्यत्र चास्मिन् महाकाव्ये मल्लिनाथेन 'वंशस्थ - (१) पुष्पिताग्रा-शार्दूलविक्रीदितम्, (२) औपच्छन्दसिक-द्रुतविलम्बितमालिनी (३) उपजाति-धृतश्री, (४) उपजाति-वसन्ततिलका-पुष्पिताग्रा-द्रुतविलम्बित-शालिनि-पथ्या-प्रहर्षिणी-जलधरमाला-द्रुतविलम्बित-प्रतिमाक्षरा-कुररीरुता-स्त्रग्विणी-मत्तमयूर-दोधक-आर्या-जलोद्धतगति-रथोद्धता-भ्रमरविलसित-मालिनी-पृथ्वी-वंशपत्रपतित, (५) वसन्ततिलका-शिखरिणी, (६) द्रुतविलम्बित-उपजाति-तोटक-औपच्छन्दसिक-कुटजा-मत्तमयूर, (७) पुष्पिताग्रा-मन्दाक्रान्ता-मालिनी, (८) प्रहर्षिणी-अतिशायिनी, (९) प्रतिमाक्षरा-वंशस्थ-मन्दाक्रान्ता, (१०) स्वगता-मालिनी, (११) मालिनी-महामालिनी, (१२) इन्द्रवंशा-वंशस्थ-हरिणी, (१३) मञ्जुभाषिणी, (१४) रथोद्धता-इन्द्रवज्रा-वसन्ततिलका-प्रहर्षिणी (१५) उद्गता (१६) वैतालियाख्यंमात्रावृत्तम्-प्रहर्षिणी-शालिनी-शार्दुलविक्रीडितम् (२०) औपच्छन्दसिकम्-वसन्ततिलका-मेघविस्फूर्जिता-इत्यादीनां वृत्तानां नामोल्लेखपूर्वकं सलक्षणं परिचयो दत्त:। मल्लिनाथेन क्वचित् अनुष्टुभ्सदृशानां सरलानां वृत्तानां लक्षणं न दीयते। क्वचिच्च पुनरुक्तिं त्यक्तुं वृत्तं तु पूर्वमुक्तमग्रे वक्ष्यते वा तथा लिख्यते। परं प्राय: सर्वेषामपि वृत्तानां मल्लिनाथेन समीचीन: परिचयो दत्त:। तत्र वल्लभदेवेन वृत्तानां केवलमभिधानमेवोक्तं क्वचिच्च लक्षणान्यपि कथितानि। परं वल्लभदेवस्य मल्लिनाथवद् वृत्तानां स्पष्टता नास्ति।

♦♦♦♦♦

## उपसंहृतिः

एवमत्र साहित्यव्याकरणविवेचनेनास्माभिर्ज्ञातं यद् द्वाप्येतौ व्याख्याकारौ स्वस्वस्थानेषु विशेषयोग्यतां धारयतः, परमेकस्याद्यस्य प्राचीना शैली वर्तते, तर्ह्यन्यस्य विशिष्टा नूतना शैली वर्तते। अनयोर्विवेचने समयसमाजभिन्नत्वात् साम्येऽपि विरोधस्तर्हि क्वचिद् विरोधे सत्यपि साम्यमनुभूयते।

यथा कूलद्वयान्वितैव नदी शोभते तथा च सागरसङ्गमधिगच्छति तथैवात्र वल्लभदेवेन-मल्लिनाथद्वय्यान्वितैव माघविद्या सभोषसारधिं प्रापयितुमलम्।

❋❋❋

# विभागः - ४

# प्रकरणम्- १३

## पाठभेदः

पाठभेदनामकेऽस्मिन् प्रकरणे पाठभेदविषये विस्तृता चर्चा प्रस्तूयते।

प्रथमं तावज्ज्ञातव्यं यत् कस्मात् पाठभेदाः प्रभवन्ति। तत्र कारणेष्वनेकेषु सत्स्वपि प्राथमिकं कारणं मुद्रायन्त्राभाव एव। अतः कविनैकवारं विलिख्य लेखकेभ्यः (लिपिकरेभ्यः) प्रदीयते। तच्च भिन्नभिन्नलेखका लिखन्ति तेषु केचन सामान्या भवन्ति ये कविकृतपाठमेवानुलिखन्ति परं केचन लेखका विद्वांसो भवन्ति ते क्वचित् स्वमत्यनुकारं काव्यसौन्दर्यलोलुपाः सन्तः परिवर्तनं कुर्वन्ति। अन्यच्च केचन श्रुतलेखनं कुर्वन्ति, तत्र व्यवधानकारणात् तथा च पूर्वानुमानात् पाठभेदा भवन्ति। इमे भिन्नभिन्नपाठा भिन्नभिन्नविवेचकैः टीकाकारैर्वा प्राप्यन्ते, अतः टीकायामपि स एव भेदः प्रवर्तते।

परमन्यदपि चिन्तनीयं भवति यन्न केवलं लेखका एव तत्र पाठभेदकारणीभूताः परं टीकाकारा अपि क्वचित् काव्यसौन्दर्यवृद्ध्यर्थं पाठपरिवर्तनं कुर्वन्ति, विशेषतो ये विवेचकाः स्वयं कवयोऽपि भवन्ति।

शिशुपालवधेऽपि तथा पाठभेदाः प्रवर्तन्ते। वल्लभदेवेनादौ मङ्गलाचरणकाव्यानि लिखितानि तत्र चार्थसौन्दर्यं दृश्यते। मल्लिनाथेन चादौ मङ्गलाचरणकाव्यानि रचितानि यत्र 'शारदा शारदाम्भोजवदना वदनाम्बुजे सर्वदा सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात्' आदिपद्येषु यमकाद्यलङ्काराणां सौन्दर्यं विशेषतो दृश्यते। अतः द्वावप्येतौ टीकाकारौ यदा यदा भिन्नपाठं स्वीकुरुतस्तदा तदा तयोः काचिद् विशिष्टा दृष्टिरपि भवत्येव, अत एव चिन्तनविषयः।

अत्र विचारं कुर्मस्तदा सामान्यरूपेणानयोर्विवेचकयोः पाठभेदेषु समस्तव्यस्तभेदः यथा – "पतन् पतङ्गः......", "पतत्पतङ्गः....."(१-१२), स्वरभेदः यथा 'द्विजावली....' 'द्विजावली.... (१-२५)', समानार्थभेदः यथा 'शत्रूणां नितरां.... शत्रूणामनिशम्.....(१.७५)', अर्थभेदः यथा 'रसभाग... रसभाव(२.५)', पदभेदः यथा 'खुरहतो.....पादाहतो....(३.२८)', क्रमभेदः यथा 'शिरसा प्रणतः...प्रणतः शिरसा'.....(१६.४) तुल्याः पाठभेदाः प्राप्यन्ते।

तुलनात्मकेऽध्ययनेऽस्माभिर्यत्र विशेषः पाठभेदो दृष्टस्तत्र चर्चा कृता। तद् विशिष्टं पाठं विलोक्य तस्याभ्यासं कृत्वेदमनुमीयते यद् वल्लभदेवस्य

विशेषार्थप्राप्यतेऽर्थगौरवाय च पाठभेदप्रवृत्तिर्दृश्यते, तथा च मल्लिनाथस्यालङ्कारशोभाभिवृद्धये पाठपरिवर्तनप्रवृत्तिः। वल्लभदेवोऽर्थविशिष्टं पाठं स्वीकरोति तथा च मल्लिनाथः शब्दविशिष्टं पाठमङ्गीकरोति।

एतच्चर्चितमतो द्विरुक्तिभयात् कानिचिदेवोदाहरणानि विलिख्य स्पष्टीक्रियते।

यथा-

**धूमाकारं दधति पुरः सौवर्णे वर्णेनाग्नेः सदृशि तटे पश्याऽमी।**
**श्यामीभूताः कुसुमसमूहेऽलीनां लीनां श्रेणीमिह तरवो बिभ्राणाः।।(४.३०)**

श्लोकोऽयं चतुर्थसर्गात् गिरिवर्णनादुद्धृतः, पद्येऽस्मिन् वृक्षाणां पुष्पेषु स्थिताः भ्रमराणां समूहा धूमतुल्या अदृश्यन्तेति वर्णनं वर्तते। तत्र वल्लभदेवेन 'अलीनां लीनां श्रेणीमिह' इति पाठः स्वीकृतः कारणं तस्यार्थग्रहणविशिष्टा रुचिः परमत्र मल्लिनाथेन 'अलीनां लीनामालीमिह....' इत्थं पाठं स्वीकृत्य लकारवृद्धिं विधाय वर्णानुप्रासरचना कृता।

अन्यत्रापि-

**दानं ददत्यपि जडैः सहसाधिरुढे को विद्यमानगतिरासितुमुत्सहेत।**
**यद्दन्तिनः कटकटाहतरान्मिमङ्क्षोर्मङ्क्षूदपातिपरितैः पटलेरलीनाम्।(५.३७)**

पद्यमिदं पञ्चमसर्गात् सेनानिवेशवर्णनादुद्धृतम्। अत्र कश्चित् मदजलसमन्वितो गजो जलप्रवेशं विदधात्यतः तद्गण्डस्थलस्थिता भ्रमरा अन्यत्र गतिं चक्रुरिति वर्णनम्। अत्रार्थान्तरन्यासालङ्कारः वर्तते, यतो हि दानसमन्वितमपि गजं जलावृतं भ्रमरास्त्यजन्ति तथैव दानरतमपि जडैरावृत्तं दातारं जनास्त्यजन्ति। अत्र विशेषेण सामान्यसमर्थरूपोऽर्थान्तरन्यासस्तु स्पष्ट एव।

अत्र वल्लभदेवेन 'दानं ददत्यपि जडैः.....' इत्थं पाठः स्वीकृतः, मल्लिनाथेन 'दानं ददत्यपि जलैः....' इति पाठः स्वीकृतः। अत्र यदा 'जडैः' लिख्यते तदा 'मूर्खैः' इत्येवार्थो भवति यो हि पर्याप्तः, परं यदा 'जलैः' लिख्यते तदा 'जलं गो कलले नीर ह्रीबेरे च जडेऽन्यवत्' इति विश्वः। जलैर्जडैर्नीरैश्च इति मल्लिनाथः सप्रमाणं जलैः इत्यत्र नीरैः जडैः चेत्थयर्थद्वयं दर्शयत्यतोऽत्र श्लेषप्रणितोऽर्थान्तरन्यासो विशिष्टं शब्दसौन्दर्यं चमत्कृतिं च दधाति।

अन्यच्च –

**अरमयन् भवनादचिरद्युतेः किल भयादपयातुमनिच्छवः।**
**यदुनरेन्द्रगणं तरुणीगणास्तमथ मन्मथमन्मनभाषिणः।।(६.४०)**

षष्ठेऽस्मिन् सर्गे ऋतुवर्णनं वर्तते। अत्र युवतीनां यादवनृपैस्सह विलासो वर्णितः। अर्थविचारः क्रियते तर्हि विद्युद्भयान्विताः परमार्थतस्तु न निर्गन्तुकामा अव्यक्तमधुरभाषिणः युवतिगणा यादवनरेन्द्रगणमरमयन्निति भावः।

अत्र वल्लभदेवेनान्तिमे चरणे 'मन्मथमन्मनभाषिण' इति पाठः स्वीकृतः। परं मल्लिनाथेन 'मन्मथमन्थरभाषिण' इति पाठः स्वीकृतः। पद्येऽस्मिन् इदं पदं यवतिगणविशेषणं वर्तते। अत्र 'मन्मथमन्मनभाषिणः' इत्थं स्वीक्रियते तदा वल्लभदेवमतेन 'मन्मनशब्दोऽत्र' अव्यक्तमधुरवाचको देशीपदम्' नाम ताः किमपि मधुरं गीतवत्यः तत्र व्याकरणशुद्धिविचारः क्रियते तदा न समीचीनं तत् परं प्रेम्णि भाषामहत्त्वं न भवत्यतः वल्लभदेवस्यार्थविचारो योग्यः।

मल्लिनाथेनात्र 'मन्थर' पदं स्वीकृतं येन 'युवतयः सालसमवदन्' तथार्थप्रतीतिर्जायते। अत्र मन्थरशब्दः कोशप्रमाणयुतस्तस्माद् व्याकरणदृष्ट्या योग्यः।

परं वल्लभदेवस्यार्थविशिष्टा दृष्टिरेवात्र योग्या कारणं पूर्वस्मिन् काले युवतयः शिक्षणवञ्चिता आसन्, अन्यच्चैता ग्रामबाला अतस्तत्र देशीपदस्योच्चारणमेव स्वाभाविकं प्रतिभाति।

अन्यच्च-

**शिरसाप्रणतः करिष्यते सकलैरेत्य समं नराधिपैः।**
**तव शासनमांशु भूपतिः परवानद्य यतम्त्वयैव सः।।(१६.४)**

षोडशेऽस्मिन् सर्गे शिशुपालदूतस्य संवादो वर्तते, यत्र दूतवाक्येऽर्थद्वयं वर्तते। एकः प्रियार्थोऽपरश्च परुषार्थः।

प्रियार्थस्तु-शिशुपालः शीघ्रमेवागत्यान्यनृपैः सह शिरसा प्रणतः सन् तवाज्ञापालनं विधास्यति यतो हि त्वमेव तस्य प्रभुः।

परुषार्थः- स चैद्योऽन्यनृपैः सहागत्य तव निग्रहं करिष्यति, यतो हि सः त्वयैव शत्रुवान् वर्तते।

अत्र मल्लिनाथेन 'प्रणतः शिरसा' इति पाठः स्वीकृतः, परं वल्लभदेवेन 'शिरसा प्रणतः....' इति पाठः स्वीकृत। अत्रार्थ विचारो विधीयते तर्हि दूतवाक्येऽर्थद्वयं समस्तेऽपि सर्गे दृश्यते तथैवात्रापि द्वावेवार्थौ स्तः, अतः प्रणतः शिरसा..... इति,

वल्लभदेवस्य पाठे प्रियार्थे 'शिरसा प्रणतः....' तथा च परुषार्थे 'शिरसा अप्रणतः......' इति सन्धि विचार्यार्थद्वयं कर्तुं शक्यते। तेन च तथैवार्थद्वयं प्रकटीकृत्य व्याख्यायां लिखितम्।

अतोऽर्थविचारः क्रियते तर्हि सर्वत्र वल्लभदेवस्य पाठोऽनुकूलो दृश्यते। तथा चालङ्कारचमत्कृतिविषये विचारः क्रियते तदा मल्लिनाथस्य पाठो नितरां श्लाघ्यः।

अत्रापि तथैवानुमानं कर्तुं शक्यते यदत्र रससम्प्रदायो ध्वनिसम्प्रदायश्च कारणम्।

✹✹✹

# प्रकरणम्-१४

## क्रमभेद

श्लोकानां पौर्वापर्यविपर्यय: क्रमभेद: कथ्यते। यदा लेखका लिखन्ति तदा क्वचिदनवधानात् क्रमभेदो भवितुमर्हति. क्वचिच्च प्रसङ्गानुसारं प्रवाहनित्यत्वं स्थापयितुं लेखका विवचका वा क्रमपरिवर्तनं स्वेच्छया कुर्वन्ति। अथवा यदि किमप्येकं पद्यं प्रमादवशाद् वा प्रक्षिप्तमिति मत्वा त्यक्तं भवति तदानीमपि क्रमभेदो भवितुमर्हति।

इयमेव चर्चा शिशुपालवधस्य वल्लभदेवमाल्लिनाथयो: टीके लक्ष्यीकृत्य क्रियते, तर्हि शिशुपालवधे मुख्यत्वेन चर्तुषु स्थानेषु श्लोकानां क्रमभेदो दृश्यते। प्रथमसर्गे शिशुपालस्य पूर्वजन्मनां पराक्रमवर्णनावसरे रावणपराक्रमवर्णने ६३, ६४, ६५, ६६ श्लोकेषु दृश्यते। ततश्च द्वितीयसर्गे पूर्वार्धे २४, २५, २६, २७, २८ पद्येषु तथा चोत्तरार्धे ८१ तः ९० पद्येषु क्रमभेद: दृश्यते। यत्र यज्ञनिमन्त्रणे समागते सति तत्र गन्तव्यं शिशुपालवधो वा विधेय इति विषयमादाय श्रीकृष्णबलरामोद्धवा एकीभूय चर्चां कुर्वन्ति। तत्रादौ भगवतः श्रीकृष्णस्य कुत्र गन्तव्यमिति प्रश्न:, तदुत्तरदाने प्रथमं बलराममतं यत्र क्रमभेदः प्रवर्तते, ततश्चोद्धवोक्तिषु क्रमभेदो दृश्यते। तदनन्तरं दशमसर्गे मद्यपानसुरतक्रीडावर्णने ८, ९, १० पद्येषु क्रमभेदो दृश्यते।

पूर्वलिखितेषु पद्यानां क्रमभेदेषु वर्ण्यविषयप्रवाहे न काचित् बाधा दृश्यते। उभयोरपि वल्लभदेवमल्लिनाथयोर्विवेचकयोः पद्यानां पौर्वापर्यविपर्ययेणात्र कथावर्णनप्रवाहस्त्वविच्छिन एव वर्तते। अतोऽत्र क्रमपरिवर्तने न कश्चिद् विशेषो हेतुर्दृश्यते। तस्मादिदमेवानुमीयते यदत्रानवधानादेवायं क्रमभेदो जातः स्यादिति। अथवा लेखकानामेव प्रमादजन्योऽयं पद्यानां क्रमभेद:।

✵✵✵

# प्रकरणः-१५

# प्रक्षिप्तश्लोकाः

## प्रक्षिप्तपद्यानि

(१)

**सर्गः-१५**

ननु सर्व एव समवेक्ष्य कमपि गुणमेति पूज्यताम्।
सर्वगुणविरहितस्य हरेः परिपूजया कुरुनरेन्द्रको गुणः। __________ ।। १ ।।

न महानयं न च  बिभर्तिगुणसमतया प्रधानताम्।
स्वस्य कथयति चिराय पृथग्जनतां जगत्यनभिमानतां दधत्_______ ।।। २ ।।

रहितं कलाभिरखिलाभिरकृतरसभावसंविदम्।
क्षेत्रविदमपदिशन्ति जनाः पुरवाह्यमेनमगतं विदग्धताम्। ________ ।। ३ ।।

अतिभूयसाऽपि सुकृतेन दुरुपचर एष शक्यते।
भक्तिशुचिभिरुपचारपरैरपि न ग्रहीतुमभियोगिभिर्नृभिः। ________ ।। ४ ।।

व्रजति स्वतामनुचितोऽपि सविनयमुपासितो जनैः।
नित्यमपरिचितचित्ततया पर एव सर्वजगतस्तथाप्ययम्।_________ ।। ५ ।।

उपकारिणं निरुपकारमनरिमग्रियं प्रियम्।
साधुमितरमबुधं बुधमित्यविशेषतः सततमेष पश्यति। __________ ।। ६ ।।

उपकारकस्य दधतोऽपि  बहुगुणतया प्रधानताम्।
दुःखमयमनिशमाप्तवतो न परस्य किंचिदुपकर्तुमिच्छति।_________ ।। ७ ।।

स्वयमक्रियः कुटिलमेष तृणमपि  विधातुसक्षमः।
भोक्तुमविरतमलज्जतया फलमीहते परकृतस्य कर्मणः। __________ ।। ८ ।।

य इमं समाश्रयति कश्चिदुदय विपदोर्निशकुलम्।
तस्य भवति जगतीह कुतः पुनरुद्भवो विकरणत्वमेयुषः। _________ ।। ९ ।।

गुणवन्तमप्ययमपास्य जलमखिलमव्यवस्थितैः।
याति सुचिरमतिबालतया धृतिमेक एव परिवारितो जडैः। _______ ।। १० ।।

सुकृतोऽपि सेवकजनस्य बहुदिवसखिन्न चेतसः।
सर्वजलविहित निर्विदयं सुकृदेव दर्शनमुपैति कस्यचित्। _________ ।। ११ ।।

स्वजने सखिष्वनुगतेषु नियतमनुरागवत्स्वपि।
स्नेहममृदयः क्षपयन्निरपेक्ष एष समुपैति निर्वृतिम्। ______________ ।। १२ ।।

क्षणमेष राजसतयैव जगदुदयदर्शितोद्यतिः।
सत्त्वहिकृतमतिः सहसा तमसा विनशयति सर्वमावृतः। __________ ।। १३ ।।

अभिहन्यते यदभिहन्ति परितपति यच्चतप्यते।
नास्य भवति वचनीयमिदं चपलात्मिका प्रकृतिरेव हीदृशी। _______ ।। १४ ।।

अति सत्त्वयुक्त इति पुंभिरयमतिशयेन वर्ण्यते।
सूक्ष्मसतिभिरथ चापगते समुपैति नाल्पमपि सत्त्वसंकरम्।________ ।। १५ ।।

प्रलयं परस्य महतोऽपि सततमिह निःसुखे गुणाः।
यान्ति जगदपि सदोषमदः स्वरुचैव पश्यति गुणान्द्विषन्नयम्।______ ।। १६ ।।

क्षितिपीठमम्भसि निमग्नमदहरतः यः परः पुमान्।
एष किल स इति कौरबुधैरभिधीयमानमपि तत्प्रीयते। __________ ।। १७ ।।

नरसिंहमूर्तिरयमेव दितिसुतमदारयन्नरवैः।
आप्तजनवचनमेतदपि प्रतिपत्तुमोमिति जनोऽयमर्हति।___________ ।। १८ ।।

अपहाय तुङ्गमपि भानमुचितमवलम्ब्य नीचताम्।
स्वार्थकरणपटुरेष पुरा बलिना परेण सह संप्रयुज्यते। ___________ ।। १९ ।।

क्रमते नभो रभसयैव विचयति विश्वरूपताम्।
सर्वमतिशयगतं कुरुते स्फुटमिन्द्रजालमिदमेष मायया ___________ ।। २० ।।

